B.13.

SARADATILAKA

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

Bepin Beharee Neugie, M.A.,
Solicitor.
Bagh Bazar.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शारदा

॥श्रीका... ...ाभैरेंइनी दिवाकरछापाखाने पोथीशारदाटीकागूढार्थदीपिकासहित दाऊके
प्रति... ...रनके इहां वाः महीपनारायनपांडे काः मातादयाल जिसेलेनाहोयउसेचान
... ...वचरनकेदुकानपरमिलेगा॥ संवत्१९४० मि॰ कार्तिकसुदी ७ वार रवि ॥

LITHOGRAPH No I

Śāradātilaka

with comm (GŪḌHĀRTHADĪPIKĀ)

of MĀDHAVABHAṬṬA

Benares Samvat 1941 Śaka 1806 (? 1863 AD)

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शारदा

॥श्रीकाशीविश्वनाथपुरीमेमहल्लाभदैनीदिवाकरछापाखानेपोथीशारदाटीकागूढार्थदीपिकासहित दाऊके
मतियासेशुद्धकरकेछपाशिवचरनकेइहाँ वाः महीपनारायनपांडे काः मातादयाल जिसेलेनाहोयउसेचान
चौकमेकुंजगलीकेपासशिवचरनकेदुकानपरमिलेगा॥ संवत्१९४० मि॰ कार्तिकशुदी७ वाररवि ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शारदा

॥श्रीकाशीविश्वनाथपुरीमेमहल्लाभदैइनी दिवाकरछापाखानेपोथीशारदाटीकागूढार्थदीपिकासहित दाऊके प्रतियासेशुद्धकरकेछपाशिवचरनकेइहाँ बाः महीपनारायनपांडे काः मातादयाल जिसेलेनाहोयउसेचान नीचोकमेकुंजगलीकेपासशिवचरनकेदुकानपरमिलेगा॥ संवत्१९४०मि·कार्तिकसुदी७ वाररवि ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शारदा

॥ श्रीकाशीविश्वनाथपुरीमेमहल्लाभदैइनी दिवाकरछापाखाने पोथीशारदाटीकागूढार्थदीपिकासहित दाऊके
प्रतियासेशुद्धकरकेछपाशिवचरनकेइहाँ वाः महीपनारायनपांडे काः माताद्याल जिसेलेनाहोयउसेचान
नीचौकमेकुंजगलीकेपासशिवचरनकेदुकानपरमिलैगा॥ संवत्१९४० मि· कार्त्तिकसुदी७ वाररवि ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥श्रीगणेशायनमः॥ भवंभवानींतत्पुत्रंगणेशंविघ्नभंजनं॥नमस्यामिंतथाभक्त्यासर्वकार्यार्थसिद्धये १ नत्वाविशुद्धविज्ञानंसर्वज्ञंरामभारथी
त्रिविक्रमार्यमुनिनाततशिष्येणसुधीमता॥२॥शारदातिलकाख्यस्यग्रंथस्यक्रियतेमया ॥टीकावालप्रवोधायनाम्नागूढार्थदीपिका॥३॥प्रारिप्सि
तस्यग्रंथस्यविघ्नेनपरिसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिपालनायचविशिष्टदेवतानमस्कारःकर्तव्यः।ग्रंथस्यविषयप्रयोजनसंवंधाधिकारि
णाश्चप्रदर्शनीयाः प्रवृत्यंगत्वेनेत्येवंसगुणानिर्गुणभेदेनदेवतानमस्कारकृतेनतत्सर्वंदर्शयितुमाचार्यआह नित्यानंदेत्यादिश्रपमर्थः।तन्महःवोयुष्मानव्या
त्पापादितिसंवधः।किंतत्येनमहसा——चराचरात्मकमिदंजगत्व्याप्तमनुस्यूतं।चरंजंगमं।अचरंस्थावरं।तदुभयात्मकं।कथंभूतंजगत्।शव्दार्थरूपंना
मरूपात्मकमित्यर्थः॥कथंभूतंतन्महः।नित्यानंदवपुः।नित्यश्चासावानंदश्चेतिनित्यानंदः।सएववपुःशरीरंयस्यतथाआनंदैकरसस्वभावमित्यर्थः।के

॥श्रीगणेशायनमः॥नित्यानंदवपुर्निरंतरगलत्पंचाशदर्णैःक्रमाद्व्याप्तंयेनचराचरात्मकमिदंशव्दार्थरूपंजगत्।शव्द
ब्रह्मयदूचिरेसुकृतिनश्चैतन्यमंतर्गतंतद्वोव्यादनिशंशशांकसदनंवाचामधीशंमहः॥१॥

१ व्याप्तंनिरंतरगलत्पंचाशद्वर्णैः
अनवरतमभिव्यक्तपंचाशद्वर्णैः।तथाचानिरंतरंअवछिन्नैवकथंक्रमात्।तदुक्तंभवति।महसोमूलकारणाजन्यत्वात्पंचाशद्वर्णानांतत्कार्यरूपेजगति
तद्वारातद्व्याप्तिःसिद्धेतिपुनःकिंविशिष्टंयदेतदंतर्गतंप्रत्यक्चैतन्यं।तदेवसुकृतिनःतपोधनाःशव्दब्रह्मेत्यूचिरेअवोचन् अनिशंसर्वदा।पुनःक
थंभूतं।शशांकश्चंद्रस्तस्यसदनंआलयम्।अधिष्ठानमितियावत्।पुनःकीदृशं।वाचामधीशं।वागधिपतिमित्यर्थः।गूढार्थस्तु॥ नित्यानंदवपु राम॰
रित्यनेनप्रयोजनंसूचितं।निरंतरगलत्पंचाशद्वर्णैरितिविषयोनिर्दिष्टः॥एवंविधप्रयोजनार्थीअधिकारीत्यर्थःसूचितशास्त्रंतत्साध्यमितिसाध्यसा १
धनसंवंधलक्षणःसंवंधःसूचितः।इतिप्रथमश्लोकार्थः॥एवंशिवशक्त्यात्मकत्वात्सकलप्रपंचजातस्यसगुणत्वेनशिवरूपमभिधायनिर्गुणरूपमभिधत्ते।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अंतः स्मितेति। अस्यार्थः। वः युष्माकं नवेंदुमौलेरंतःपुरं मंगलं कल्याणं दिशतु। प्रयच्छतु। करोतु॥ नवश्चासाविंदुश्च नवेंदुरिति द्वितीयश्चंद्रमाः सः मौलौ यस्य
स नवेंदुमौलिः तस्य शिवस्य अंतःपुरं स्त्र्यगारं तेन तत्र त्पाभवपत्नी लक्ष्यते॥ कथं आदरात्॥ अनुग्रहात्। कीदृशं अंतःपुरं त्रिलोकविभवस्य हेतुः त्रयाणां लो
कानां विभवो विस्तरः। तस्य कारणं पुनः कथंभूतं इंदीवरोदरसहोदरनेत्रशोभि॥ इंदीवरस्य उदरं मध्यं तरः तस्य सहोदरे अपवादसदृशे नेत्रे ताभ्यां शोभिवि
राजमानं दीप्यमानं॥ यद्वा पुनः कीदृशं इंदुकलावतंसं॥ इंदोः कलासैव अवतंसं शिरोभूषणं यस्य तत्तथा। कर्णभूषणं वा। पुनः कीदृग्विधम्॥ अंतःस्मितोल्ल
सितं ईषद्धासेन शोभितं॥ अथवा॥ अंतःस्मितवत् शुभ्रमित्यर्थः। एवंविधा शुभ्रा सा परमेश्वरस्य जगन्निर्माणादौ सहकारिणी शक्तिर्युष्माकं कल्याणं सर्वदा

अंतस्मितोल्लसितमिंदुकलावतंसमिंदीवरोदरसहोदरनेत्रशोभि॥ हेतुस्त्रिलोकविभवस्य नवेंदुमौलेरंतःपुरं दिशतु मंगल
मादराद्वः॥२॥ संसारसिंधोस्तरणैकहेतून्वंदे गुरून्मूर्द्धि शिवस्वरूपान्॥ रजांसि येषां पदपंकजानां तीर्थाभिषेकश्रिय
मावहंति॥३॥ सारं वक्ष्यामि तंत्राणां शारदातिलकं शुभं॥ धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम्॥४॥ शब्दार्थसृष्टि
र्मुनिभिश्छंदोभिर्दैवतैः सह॥ विधिश्च यंत्रमंत्राणां तंत्रेऽस्मिन्नभिधीयते॥५॥ १ प्रयच्छतु इति श्लोकार्थः॥२॥ यस्य देवे परा भ
क्तिर्यथा देवे तथा गुरौ इति न्यायात्॥ देवतानमस्कारानंतरं गुरुनमस्कारं करोति। संसारेति॥ गुरून्मूर्द्धि वंद्यामहे॥ कथंभूतान् शिवस्वभावान्। दे
वरूपान्। पुनः कीदृशान्। संसार एव सिंधुर्वा सिंधुः। दुस्तरत्वात्॥ तस्य तरणोलंघने एकहेतून्। असाधारणकारणभूतान्। उद्देशद्वारा एषां गुरू
णां पदपंकजानां रजांसि धूलयः तीर्थेषु अभिषेकः तीर्थाभिषेकः तस्य श्रीः तज्जनितं पुण्यं तमावहंति॥ वदंति॥ कुर्वंति प्रयच्छंतीति वा श्लोकार्थः॥३॥
गुरुदेवतानमस्कारानंतरं ग्रंथनामपूर्वकं प्रतिज्ञां कुरुते सारमित्यादिना॥ तंत्राणां मंत्रशास्त्राणां॥ उत्तरार्द्धेन प्रयोजनमाह॥ ग्रंथप्रतिपाद्यं संक्षे
पतो दर्शयति॥४॥ शब्दार्थेति॥ मुनिभिर्ऋषिभिः संक्षेपतः शब्दसृष्टिं वक्तुं सगुणनिर्गुणाभेदं परमेश्वरे दर्शयति॥५॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

निर्गुणेति॥ प्रकृतेरन्यः केवलः सकलो विद्यासंभिन्नः॥६॥ इदानीं सृष्टिमाह॥ सच्चिदानंदेति॥ प्रलये सूक्ष्मस्वरूपेणाऽध्यस्ता विद्यासहितात्परमेश्वराच्छक्तिरजायत॥ अयमर्थः॥ सूक्ष्मरूपेणाऽध्यस्ता विद्या यासैव परशक्तिः तस्याः सूक्ष्मरूपं परिहाय या घनीभूता गुणवैषम्येन स्थूलरूपेणावस्थानं जननं नाम ततो नादः तदनंतरं नादः। तस्यैव सृष्ट्युपयोगित्वं तच्छब्दात्मिकावस्था नादः बिंदुः तस्या एव सत्वादिगुणमध्ये कार्यानुगुणे सत्वे रजसि तमसि वा उत्थानावस्था भवति॥ सैव बिंदुरित्युच्यते॥७॥ परशक्तिरिति एवं बिंदुमूलप्रकृतिविकारः॥ अत एव शक्तिमयः पुनस्त्रिधा भवति॥ त्रैविध्यमेव दर्शयति॥८॥ बिंदुरिति॥ केन प्रकारेण स्थूलसूक्ष्मपरत्वेनेति॥ प्रपंचसारे स बिंदुर्भवति त्रिधेत्यादिना॥ ननु सर्वप्रपंचस्य शिवशक्तिमयत्वात्कथं शक्तिमयत्वमेवेत्यत आह॥ बिंदुरिति॥ किं

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः॥ निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः॥६॥ सच्चिदानंदविभवात्सकलात्परमेश्वरात्॥ आसीच्छक्तिस्ततो नादो नादाद्बिंदुसमुद्भवः॥७॥ परशक्तिमयः साक्षात्त्रिधासौ भिद्यते पुनः॥ बिंदुर्नादो बीजमिति तस्य भेदाः समीरिताः॥८॥ बिंदुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः॥ समवायः समाख्यातः सर्वागमविशारदैः॥९॥ रौद्री बिंदोस्ततो नादाज्ज्येष्ठा बीजादजायत॥ वामा ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः॥१०॥ ते ज्ञानेच्छाक्रियात्मानो वह्नींद्वर्कस्वरूपिणः॥ भिद्यमानात्पराद्बिंदोरव्यक्तात्मा रवोऽभवत्॥११॥ शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः॥ शब्दब्रह्मेति शब्दार्थं शब्दमित्यपरे जगुः॥१२॥ तत्प्रमाणमत आह॥९॥ सर्वेति॥ तैरेव बिंदुनादबीजैर्यथाक्रमं रुद्रब्रह्मविष्णूनां रौद्रीज्येष्ठावामेति तिस्रः शक्तयो जाता यंतरत्यत आह १० रौद्रीति॥ वक्ष्यमाणोपयोगित्वेन एषां रुद्रादीनां स्वरूपमाह॥ ज्ञानरूपो रुद्रः॥ इच्छारूपो ब्रह्मा॥ क्रियारूपो विष्णुः॥ सर्वत्र व्यवहारेषु जानाति इच्छति॥ प्रयतते एष क्रमः॥ इदानीं शब्दसृष्टिं कथयति भिद्यमानादित्यादिना परात्॥ बिंदोः उद्भूतलक्षणात्पूर्वोक्तात् शिवशक्तिमयाद्बिंदोरित्यर्थः॥ ननु निरंतरात्परस्याव्यक्तत्वं नाम शब्दविशेषरूपेणाविभाव्यमानाखंडस्वरूपत्वं तमेव निर्विशेषाखंडशब्दमात्रं शब्दब्रह्मेति श्रुतिविदः संगिरंतेरत्यत आह॥११॥ शब्दब्रह्मेति॥ स्फोटपक्षनिराकरणार्थमाह॥ शब्दब्रह्मेति॥ शब्दार्थमिति॥ किं दूषणमनयोर्भूषणाय चेत्याशंकयरक्षानयेत्याह॥१२॥

नहि तेषामिति ॥ अयं भावः । तेषां शब्दो वा शब्दार्थो वा शब्दब्रह्मेति वादिनां । उभयोः शब्दतदर्थयोर्जडत्वात् ॥ अर्थावबोधकत्वायोगात् । स्वमतमाह चैतन्यमिति ।
अपि निगूढस्वार्थावबोधान्यथानुपपत्त्या कल्प्योऽप्यखंडस्फोटोऽप्यर्थावबोधको न भवति ॥ शब्दार्थावपि बोधकौ न भवतः । किंतु स्वरक्रमादिविशिष्टैः श्रोत्रग्राह्यै
वर्णात्मकैः शब्दैरनुमीयमानमखंडशब्दतन्मात्रलक्षणार्थं चैतन्यविशिष्टं शब्दब्रह्मेति विद्वांसो विदांचक्रुः । अत एव स्वरादिविशिष्टशब्दतन्मात्रानुमापकाः श्रो
त्रग्राह्या एव शब्दाश्चैतन्यसंसृष्टतदर्थावबोधकाः । शरीरे तः शब्दोत्पत्तिप्रकारं संक्षिप्योच्यते । तत्राप्यकुंडलीरूपमिति । तत्रापि चैतन्यं प्राप्य ॥ इदानीं स्वा
गमानुसारेण शिवादिपंचोत्पत्तिमाह ॥ १४ ॥ अथेति । विंदुः शिव इत्यनंतत्वात् कालशब्देन शिवशक्त्योः संबंधः स्वीक्रियते ॥ कलाशब्देन शक्तिः शक्तिमतोरभेदश्चि

नहि तेषां तयोः सिद्धिर्जडत्वादुभयोरपि ॥ चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः ॥ १३ ॥ तत्राप्यकुंडलीरूपं प्राणिनां देहमध्यगं
॥ वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः ॥ १४ ॥ अथ विंद्वात्मनः शंभोः कालबंधोः कलात्मनः ॥ अजायत जगत्साक्षी सर्व
व्यापी सदाशिवः ॥ १५ ॥ सदाशिवोद्भवस्त्वीशस्ततो रुद्रसमुद्भवः ॥ ततो विष्णुस्ततो ब्रह्मा तेषामेवं समुद्भवः ॥ १६ ॥ मूलभूतात्त
तोऽव्यक्ताद्विकृतात्परवस्तुनः ॥ आसीत्किल महत्तत्त्वं गुणांतःकरणात्मकं ॥ १७ ॥ अभूत्तस्मादहंकारस्त्रिविधः सृष्टिभेदतः । वै
कारिकादहंकाराद्देवा वैकारिका दश ॥ १८ ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥ तैजसादिंद्रियाण्यासंस्तन्मात्राक्रम
योगतः ॥ १९ ॥ भूतादिकादहंकारात्पंचभूतानि जज्ञिरे ॥ शब्दात्पूर्वं वियत्स्पर्शाद्वायू रूपाद्धुताशनः ॥ २० ॥ क्षयाकलात्मन इत्युक्तं

अतः सशक्तिकाच्छिवादेव सदाशिवादीनामुत्पत्तिरिति बोद्धव्यं । इदानीमर्थसृष्टिमाह ॥ कलाभूतादिति ॥ अस्मादेव शिवादित्यर्थः । गुणांतःकरणात्मकमिति ।
गुणाः सत्वादयः । अंतःकरणं चतुष्टयं । तदात्मकं महत्तत्त्वमासीदित्यर्थः ॥ तस्मान्महत्तत्वादहंकारो वैकारिकतैजसभूतादिकैः भिन्नो जायत इत्यत आह अ
भूत्तस्मादिति ॥ कथंभूतादहंकारात् ॥ केषामुत्पत्तिरित्यत आह क्रमेण वैकारिकादिना । तन्मात्राक्रमयोगत इति ॥ शब्दादितन्मात्राक्रमयोगत इति । एवं पं
चभूतानामेवोत्पत्तिप्रकारमाह ॥ शब्दात्पूर्वमिति ॥ शब्दात् शब्दतन्मात्रादिति । एवमुत्तरत्रापि तेषां भूतानां वर्णानामाह ॥ १९ ॥ २० ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्वेतं वियदित्यादिना क्रमेण तेषां विशेषगुणानाह। शब्देत्यादिना॥ उत्तरोत्तरतत्कार्योपयोगितया तेषां मंडलानि कथ्यंते॥ वृत्तं दिव इत्यादिना॥ तेषां मंडलानां व
र्णानाह॥ तत्तद्भूतसमेति॥ २४॥ इदानीं तत्तद्भूतोत्पत्तिकलाः क्रमेण प्रदर्श्यंते। धरात इति॥ २५॥ निवृत्त्याद्या इति॥ २६॥ नाराज्ज्ञत्रियाः॥ तत्कथनोपयोगमाह

रसादंभः क्ष्मा गंधादिति तेषां समुद्भवः॥ श्वेतं वियन्मरुत्कृष्णो रक्तोऽग्निर्विशदं पयः॥ २१॥ पीना भूमिः पंचभूतान्येकैकाधारतो विदुः॥
शब्दस्पर्शरूपरसगंधा भूतगुणाः स्मृताः॥ २२॥ वृत्तं दिवस्तत्त्वबिंदुलांछितं मातरिश्वनः॥ त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेंदुसंयुतं
॥ २३॥ अंभोजमंभसो भूमेश्चतुरस्रं सवज्रकं॥ तत्तद्भूतसमाभानि मंडलानि विदुर्बुधाः॥ २४॥ वर्णैः स्वैरचितान्याहुः स्वस्वनामा
वृतान्यपि॥ धरादिपंचभूतानां निवृत्त्याद्याः कला स्मृताः॥ २५॥ निवृत्तिः सप्रतिष्ठा स्याद्विद्या शांतिरनंतरं॥ शांत्यतीतेति विज्ञे
यानादेहसमुद्भवाः॥ २६॥ पंचभूतात्मकं सर्वं चराचरमिदं जगत्॥ अचरा बहुधा भिन्ना गिरिवृक्षादिभेदतः॥ २७॥ चरास्तु त्रिविधाः
प्रोक्ताः स्वेदांडजजरायुजाः॥ स्वेदजाः कृमिकीटाद्या अंडजाः पन्नगादयः॥ २८॥ जरायुजा मनुष्याद्यास्तेषु नृणां निगद्यते उद्भवः पुं
स्त्रियोर्योगे शुक्रशोणितसंयुतात्। बिंदुरेको विशेद्गर्भे उभयात्मा क्रमादसौ॥ रजोधिका भवेन्नारी भवेद्रेतोधिकः पुमान्॥ ३०॥ पू
र्वकर्मानुरूपेण मोहपाशेन यंत्रितः॥ कश्चिदात्मा तदा तस्मिं जीवभावं प्रपद्यते॥ ३१॥ अथ मात्राहृतैरन्नपानाद्यैः पोषितः क्रमा
त्। दिनात्पक्षात्ततो मासाद्वृद्धेतततो देहवान्॥ ३२॥ दोषैर्दूष्यैः सुखं प्राप्तो व्यक्तिं याति निजेंद्रियैः॥ वातपित्तकफा दोषा दूष्याः स्युः स
प्तधातवः॥ ३३॥ त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि तान्विदुः ज्ञानेंद्रियाणि श्रोत्रं त्वग्दृग्जिह्वा नासिका विदुः ३४ ज्ञानेंद्रियार्थाः श
ब्दाद्याः स्मृताः कर्मेंद्रियाण्यपि। वाक्पाणिपादपाय्वंधुसंज्ञान्याहुर्मनीषिणः। वचनादानगतयो विसर्गानंदसंयुताः। कर्मेंद्रियार्थाः
संप्रोक्ता अंतःकरणमात्मनः ३६॥ पंचभूतेति॥ इदानीमर्थसृष्टिं व्यनक्ति। चरा इत्यादि॥ स्वेदांडजजरायुजा इत्याद्युक्तम्॥ तानेव विविच्य द
र्शयति २७ स्वेदजा इत्यादिना कश्चिदित्यारभ्य अंतःकरणात्मन इत्यंतः स्पष्टार्थः॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अन्तःकरणचतुष्टयमाह ॥ मन इति ॥ अष्टौ प्रकृतयः प्रदर्श्यते ॥ षोडश विकृतयश्चेति ॥ दशेत्यारभ्य अष्टाविंशत्यंतेन तन्मात्रा इत्यादिना विकृतयः ॥ अ

मनो बुद्धिरहंकारश्चित्तं च परिकीर्तितं ॥ दशेंद्रियाणि भूतानि मनसा सह षोडश ३७ विकारास्युः प्रकृतयः पंच भूतान्यहंकृतिः ॥ अव्यक्तं महदित्यष्टौ तन्मात्राश्च महानपि ॥ ३८ ॥ साहंकारा विकृतयः सप्त तत्त्वविदो विदुः ॥ अग्नीषोमात्मको देहो विंदुर्यद्दुभयात्मकः ॥ ३९ ॥ दक्षिणांशः स्मृतः सूर्यो वामभागो निशाकरः ॥ ॥ नाडीर्दश विदुस्तासु मुख्यास्तिस्रः प्रकीर्तिताः ॥ ४० ॥ इडा वामे तनोर्मध्ये सुषुम्णा पिंगला परे ॥ मध्ये तास्वपि नाडी स्यादग्नीषोमस्वरूपिणी ॥ ४१ ॥ गांधारी हस्तिजिह्वाख्या सपूषालंबुषा मता ॥ यशस्विनी शंखिनी च कुहूः स्युः सप्त नाडयः ॥ ४२ ॥ नाड्योऽनंताः समुत्पन्नाः सुषुम्णा पंचपर्वसु ॥ मूलाधाराद्गतः प्राणस्ताभिर्व्याप्नोति तां तनुं ॥ ४३ ॥ वायवोऽत्र दश प्रोक्ता वह्न्योऽत्र दश स्मृताः ॥ प्राणाद्याः मरुतः पंच नागः कूर्मो धनंजयः ॥ ४४ ॥ कृकरः स्याद्देवदत्त इति नामभिरीरिताः ॥ अग्नयो दोषदूष्येषु संलीना दश देहिनः ॥ ४५ ॥ बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतिः ॥ शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः ॥ ४६ ॥ स्नाय्वस्थिमज्जानः शुक्रात्वङ्मांसास्राणि शोणितात् ॥ षाट्कौशिकमिदं प्रोक्तं सर्वदेहेषु देहिनां ॥ ४७ ॥ इत्थंभूतस्तथा गर्भे पूर्वजन्म शुभाशुभं ॥ स्मरंति पूति दुःखात्मा छिन्नदेहो जराय्वणा ॥ ४८ कालक्रमेण स शिशुर्मातरं क्लेशयत्यपि ॥ संपीडितशरीरोऽथ जायतेऽयमवाङ्मुखः ॥ ४९ ॥

ग्नीषोमात्मकमित्यार

भ्य जायतेऽयमवाङ्मुख इत्यन्तशरीरवर्णनोऽयमर्थः स्पष्टः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जननानंतरमित्यारोदितुमिच्छतीत्युक्तं भपवेगेसौ जंतुर्भयनिर्वृत्त्यर्थं किमपि वक्तुमपलिखति॥ तस्यैव चरुरुदिषोर्विवक्षावशेन प्रयत्नो जायते स भावः परा
ख्यः स एव नाभिदेशं प्राप्य पश्यंतीं संज्ञां लभते॥ स एव हृदयं प्राप्तो मध्यमाख्यसंज्ञां प्राप्नोति। वक्त्रे वैखरीति च। निशब्देन कंठादितत्स्थानान्यभिधीयंते॥ ता
नि प्राप्य स्वरादिक्रमविशिष्टरूपेणाभिव्यक्तो वैखरीत्युच्यते॥ ततश्चेत्यारभ्य एकधेत्यंतग्रंथेन कुंडलिनी स्वरूपं वर्णयति त्रिधामशब्देन त्र्यग्निसो

सगांतिष्ठति निश्चेष्टो भीत्यारोदितुमिच्छति। ततश्चैतन्यरूपा सा सर्वगा विश्वरूपिणी॥ ५०॥ शिवसन्निधिमासाद्य नित्यानंद
गुणोदया॥ दिक्कालाद्यनवच्छिन्ना सर्ववेदानुगा शुभा॥ ५१॥ परापरविभागेन परशक्तिरियं स्मृता॥ योगिनां हृदयांभोजे
नृत्यंती नित्यमंजसा॥ ५२॥ आधारे सर्वभूतानां स्फुरंती विद्युदाकृतिः। शंखावर्तक्रमाद्देवी सर्वमावृत्य तिष्ठति॥ ५३॥ कुंड
लीभूतसर्पाणामंगश्रियमुपेयुषी॥ सर्वदेवमयी देवी सर्वमंत्रमयी शिवा॥ ५४॥ सर्वतत्त्वमयी साक्षात्सूक्ष्मात्सूक्ष्मतरा विभुः॥
त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी॥ ५५॥ द्विचत्वारिंशद्वर्णात्मा पंचाशद्वर्णरूपिणी॥ गुणिता सर्वगात्रेषु कुंडली परदेव
ता॥ ५६॥ विश्वात्मना प्रबुद्धा सा सूते मंत्रमयं जगत्॥ एकधा गुणिता शक्तिः सर्वविश्वप्रवर्तिनी॥ ५७॥ वेदादिबीजं श्रीबी
जं शक्तिबीजं मनोभवं॥ प्रासादं तुंबुरं पिंडं चिंतारत्नं गणेश्वरं॥ ५८॥ मार्तंडं भैरवं दौर्गं नारसिंहं वराहजं॥ वासुदेवं हयग्रीवं
बीजं श्रीपुरुषोद्भवं॥ ५९॥ अन्यान्यपि च बीजानि तदोत्पादयति ध्रुवं॥ यदा भवति सा संविद्द्विगुणीकृतविग्रहा॥ ६०॥ ॥

मसूर्या उच्यंते॥ कुमारस्य शरीरे सुषुम्णाख्येन परमेश्वरेणानुविद्धा परा शक्तिः कुंडलिनी मूलाधारान्निर्गच्छंती। मंत्रजालानि तदनुबद्धानि चान्यानि वस्तूनि
त्राणि च॥ सूक्ष्मरूपेणोत्पादयतीत्याह॥ एकधा गुणिता शक्तिरित्यादिना॥ तत्र तत्र षट्चक्रा योनिगुणा तया सुषुम्णा तः परमेश्वरेणायो सो संसर्गः॥ पद्याशीना
तं त्र्यंगुलिसंयोगः परस्याशक्तेः। एवं गुणितशब्देनोच्यते। वेदादिबीजं प्रणवः॥ ॐ स्पष्टार्थमपरम् ५०॥ ५१॥ ५२॥ ५३॥ ५४॥ ५५॥ ५६॥ ५७॥ ५८॥ ५९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गुणत्रयं सत्वादि धामत्रयं। अग्नीषोमसूर्यादि देवानां त्रयं ब्रह्मादयः॥ वर्णत्रयं अकार उकार मकाराः। त्रिपुष्करं तीर्थस्थानविशेषः। स्वरा उदात्तादयः। शक्ति
त्रयं प्रभुमंत्रोत्साहशक्तयः ब्रह्माविष्णुमहेश्वराणां शक्तयः॥ वृत्तित्रयं॥ अध्यापनयाजनप्रतिग्रहाः॥ नाडीत्रयं सुषुम्नादिः त्रिवर्गः धर्मार्थकामाः पद्मि

हंसवर्णौ परात्मानौ शब्दार्थौ वा सरक्षये॥ सृजत्येषा परा देवी तदा प्रकृतिरूपिणी॥ ६१॥ यद्यदन्यज्जगत्यस्मिन्युग्मं तत्तद
जायत॥ त्रिगुणीकृतसर्वाङ्गी चिद्रूपा शिवगेहिनी॥ ६२॥ प्रसूते त्रैपुरं मंत्रं मंत्रं शक्तिविनायकं॥ पाशाद्यं त्र्यक्षरं मंत्रं त्रैपु
रं चंडनायकं॥ ६३॥ सौरं मृत्युंजयं शाक्तं शांभवं विनतासुतं॥ वागीशीं त्र्यक्षरं मंत्रं नीलकंठं विषापहं॥ ६४॥ यत्रं त्रिगु
णितं देव्या लोकत्रयं गुणत्रयम्॥ धामत्रयं सा वेदानां त्रयं वर्णत्रयं शुभं॥ ६५॥ त्रिपुष्करं स्वरान्देवी ब्रह्मादीनां त्रयं
त्रयं॥ वह्नेः कालत्रयं शक्ते स्वयं वृत्तित्रयं महत्॥ ६६॥ नाडीत्रयं त्रिवर्गं सा यद्यदन्यत्त्रिधामतं॥ चतुःप्रकारगणिता शांभवी
शर्मदायिनी॥ ६७॥ तदानीं पद्मिनीबंधोः करोति चतुरक्षरं॥ चतुर्वर्णं महादेव्या देवीतत्वचतुष्टयम् ६८॥ चतुरः सागरा
नंतःकरणानां चतुष्टयम्॥ सूक्ष्मादींश्चतुरो भावान्विष्णोर्मूर्तिचतुष्टयम्॥ ६९॥ चतुष्टयगणेशानामात्मादीनां च
तुष्टयम्॥ ओजापूजादिकं पीठं धर्मादीनां चतुष्टयम्॥ ७०॥ दमकादीन्गजान्देवी यद्यदन्यच्चतुष्टयम्॥ पंचधा
गणिता देवी शंभोः सर्वार्थसाधिनी ७१॥

१ नीवंधोः सूर्यस्यादिबीजानि॥ वनतिसूक्ष्मादिभावाः॥ परापश्यन्ती त्युच्यते॥ विष्णोर्मूर्ति
चतुष्टयं वासुदेवादि॥ आत्मचतुष्टयं॥ आत्मांतरात्मा परमात्मा ज्ञानात्मानः॥ दिविपीठाः॥ उड्याणजालंधरपूर्णगिरिकामरूपाख्याः॥ धर्मादि
चतुष्टयम्॥ धर्मज्ञानवैराग्यादि॥ ६१॥ ६२॥ ६३॥ ६४॥ ६५॥ ६६॥ ६७। ६८। ६९। ७०॥ गजा दमकादयः॥ ७१॥

मूर्तिपंचकमीशानादि। कलाश्चात्रैव वक्ष्यंते॥ तत्र ब्रह्म ऋचः॥ ईशानः सर्वविद्यानामित्याद्यः॥ षडाधारान्॥ मूलाधारनाभिहृदयकंठभ्रूमध्यद्वा

त्रिपुरापंचकूटं सा तस्याः पंचाक्षरं द्वयं॥ पंचरत्नं महादेव्याः सर्वकामफलप्रदं॥७२॥ पंचाक्षरं महेशस्य पंचवर्णानात्म
तः संमोहनादिकान्पंच कामबाणान्सुरद्रुमान्॥ पंचप्राणादिकान्वायून्पंच वर्णान्महेशितुः॥ मूर्तिः पंच कलाः पंच पंच ब्रह्म
ऋचः क्रमात्॥७४॥ सृजत्येषा पराशक्तिर्वेदवेदार्थरूपिणी॥ षोढा सा गणिता देवी धत्ते मंत्रं षडक्षरं॥७५॥ षट्कूटं त्रिपुरामं
त्रं गाणापत्यं षडक्षरं॥ षडक्षरं हिमरुचेर्नारसिंहं षडक्षरं ७६ ऋतून्वसंतप्रभवान्षण्मोदादीनाणाधिपान्॥ कोशानूर्मी
न्रसान्भक्तीः शाकिन्याद्याः षडध्वनः॥७७॥ यंत्रं षड्गुणितं शक्तेः षडाधारानजीजनत्॥ षड्विधं यज्जगत्यस्मिन्सर्वं तत्परमेश्व
री ७८॥ सप्तधा गणिता नित्या शंकरार्द्धशरीरिणी सप्तार्णं त्रिपुरामंत्रं सप्तवर्णं विनायकं॥७९॥ सप्तकं व्याहृतीनां सा सप्त
वर्णं सुदर्शनं॥ लोकान्गिरीन्स्वरान्धातून्मुनीन्द्वीपान्ग्रहानपि॥८०॥ समिधः सप्तसंख्याताः सप्तजिह्वा हविर्भुजः॥ अन्य
त्सप्तविधं यच्च तदस्याः समजायत॥८१॥ अष्टधा गणिता शक्तिः शिवमष्टाक्षरं द्वयं॥ विष्णोः श्रीकरनामानं मंत्रमष्टाक्षरं
परं॥८२॥ अष्टाक्षरं हरेः शक्तेरष्टाक्षरयुगं परं॥ भानोरष्टाक्षरं दौर्गमष्टार्णं परमात्मनः॥८३॥ अष्टार्णं नीलकंठस्य वासुदेवा
त्मकं मनुम्॥

दशांतान्॥ शक्तित इत्यादिनाग्रे प्रदर्शयंति॥ शब्दब्रह्ममयी विभुः इत्यंतः प्राक्तनो ग्रंथः स्पष्टार्थः॥७२।७३।७४।७५।७६।७७।७८।७९।८०। ८१। ८२। ८३॥

॥८४॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८॥ ८९॥ ९०॥ ९१॥ ९२॥ ९३॥ ९४॥ ९५॥ ९६॥ ९७॥ ९८॥ ९९ ॥ ॥

यंत्रंकामार्गलंदिव्यंदेवीयंत्रंघटार्गलं॥गंधाष्टकंशुभंदेवीदेवानांहृदयंगमं ८४ त्रास्याद्याभैरवान्सर्पान्मूर्तीराशावसूनपि॥८५
अष्टपीठंमहादेव्याअष्टाष्टकसमन्वितं॥अष्टौचप्रकृतोर्विघ्नान्वक्रतुंडादिकान्क्रमात्॥८६॥अणिमादिगुणानागान्वह्नेर्मूर्ती
यमादिकान्॥अष्टात्मकंजगत्यन्यत्सर्वंवितनुतेतदा॥८७॥गुणितानवधानित्यासूतेमंत्रंनवात्मकं॥नवकंशक्तितत्वानां
तत्वरूपामहेश्वरी॥नवकंपीठशक्तीनांशृंगारादीन्रसान्नव॥माणिक्यादीनिरत्नानिनववर्गयुतानिसा॥८९॥नवकंप्राणदूती
नांमंडलंनवकंशुभं॥यच्चान्यन्नवात्मकंलोकेसर्वमस्याउदेतिच॥९०॥दशधागुणिताशंभोर्भाविनीभवदुःखहा॥दशाक्षरंगणपतेस्त्व
रितायादशाक्षरं॥९१॥दशाक्षरंसरस्वत्यायक्षिण्याश्चदशाक्षरं॥वासुदेवाक्षरंमंत्रंअम्बारूढादशाक्षरं॥९२॥त्रिपुरादशकूटंसा
त्रिपुराघादशाक्षरं॥नाम्नापद्मावतीमंत्रंरम्यमंत्रंदशाक्षरं॥९३॥दशकंशक्तितत्वानांतत्वरूपामहेश्वरी॥नाडीनांदशकंविष्णो
रवतारान्दशक्रमात्॥९४॥दशकंलोकपालानांयच्चान्यत्सृजत्यसौ॥एकादशक्रमात्सैवगुणितासाजगन्मयी॥९५॥रुद्रैकादशि
नीमाद्यांशतेरेकादशाक्षरं॥एकादशाक्षरंवाण्यारुद्रानेकादशक्रमात्॥९६॥समुद्गिरतिसर्वज्ञागुणिताद्वादशक्रमात्॥नित्या
मंत्रंमहेशान्यावासुदेवात्मकंमतं॥९७॥राशीन्मासान्हरेर्मूर्तीर्यंत्रंसाद्वादशात्मकं॥अन्यदेतादृशंसर्वंयतदस्याअजायत॥
९८ ॥ चतुर्विंशतितत्वात्मायदाभवतिशोभना॥ गायत्रींसवितुःशंभोर्गायत्रींमदनात्मिकां ॥ ९९ ॥

॥ ॥

गायत्रीविष्णुगायत्रींगायत्रींत्रिपदात्मनः॥गायत्रींदक्षिणामूर्तेर्गायत्रींशंभुपोषितः॥१००॥चतुर्विंशतितत्वानितस्या
मासन्यरात्मनि॥द्वात्रिंशद्भेदगणितासर्वमंत्रमयीविभुः॥१०१॥सूतेमृत्युंजयंमंत्रंनारसिंहंमहामनुं॥लवणाख्यंमनुंमं
त्रंवरुणास्यमहात्मनः॥१०२॥हयग्रीवमनुंदौर्गंवाराहंवह्निनायकं॥गणेशितुर्महामंत्रंमंत्रंसेनाधिपस्यच॥१०३॥मंत्रं
श्रीदक्षिणामूर्तेर्मालामंत्रंमनोभुवः॥त्रिभुवनवासिन्याअघोराख्यंमहामनुं॥१०४॥भद्रकालीमनुंलक्ष्म्यामाला
मंत्रंयमात्मकं मंत्रंसादेवकीसूनोर्मंत्रंश्रीपुरुषोत्तमं॥१०५॥श्रीगोपालमनुंभूमेर्मनुंतारामनुंक्रमात्॥महामंत्रंमहा
लक्ष्म्यामंत्रंभूतेश्वरस्यच॥१०६॥क्षेत्रपालात्मकंमंत्रंमंत्रमापन्निवारकं।सूतेमातंगिनींविद्यांशुभोदयां १०७ अ
नेनक्रमयोगेनगणिताशिववल्लभा॥ षट्त्रिंशतिचतत्वानिशिवानिरचयत्यसौ ॥ १०८ ॥ अन्यान्मंत्रांश्चयंत्राणिशु
भदानिप्रसूयते ॥ द्विचत्वारिंशतामूलेगणिताशिववल्लभा ॥ १०९ ॥ साप्रसूतेकुंडलिनीशब्दब्रह्ममयी
विभुः ॥

एवमर्थसृष्टिंप्रपंच्य। शब्दसृष्टिंप्रपंचयति॥ शक्तिंततइत्यादिना॥ शक्तिर्नाममूलकारणस्यशब्दस्याघुन्मुखीकरणावस्थां॥ ततोध्वनिः॥ ततस्तदनंतरंनादःशब्दस्य
यावस्थात्यंतसूक्ष्मान्निरोधिकादीनांस्वरूपंस्वयमेवाग्रेकथयिष्यति॥ ततः पूर्वोक्तपरापश्यंतीत्यादिक्रमेणवर्णमालिकांसृजतीत्यर्थः॥ कथंभूतांवर्णमालि

शक्तिंततोध्वनिस्तस्मान्नादस्तस्मान्निरोधिका॥११०॥ ततोर्द्धेंदुस्ततोबिंदुस्तस्मादासीत्परात्ततः॥ पश्यंतीमध्यमावा
णीवैखरीसर्गजन्मभूः॥१११॥ इच्छाज्ञान क्रियात्मासौतेजोरूपागुणात्मिका॥ क्रमेणानेनसृजतिकुंडलीवर्णमालिकां
॥११२ अकारादिसकारांताद्विचत्वारिंशदात्मिकां॥ पंचाशद्वारगुणितापंचाशद्वर्णजालिकां॥११३॥ सूतेतद्वर्णतोभि
न्नात्कलारुद्रादिकान्क्रमात्॥ निरोधिकाभवेद्वह्निरर्द्धेंदुःस्यान्निशाकरः॥११४॥ अर्कःस्यादुभयोर्योगेबिंद्वात्मातेजसां
निधिः॥ जातावर्णायतोबिंदोःशिवशक्तिमयादतः॥११५॥ अग्नीषोमात्मकास्तेस्युःशिवशक्तिमयाद्रवेः॥ येनसंभव
मापन्नाःसोमसूर्याग्निरूपिणः॥११६॥ इतिशारदातिलकेप्रथमः पटलः समाप्तः॥

कां॥ नपुंसकान्विहायअकारादिक्ष
कारांताइत्येकः पक्षः॥ पंचासद्वारगुणिताकुंडलिनीअकारादिपंचाशद्वर्णमालिकांप्रसूतइत्यपरः॥ एषमुख्यः॥ उत्तरत्रप्रयोगोपयोगितयावर्णाना
मग्नीषोमात्मकत्वंसोमसूर्याग्निरूपत्वंचतन्निमित्तंदर्शयति॥ जाताइत्यादिना॥ इतिश्रीपं॰ त्रिविक्रमोदारकृतौशारदाटीकायांगूढार्थदीपिकायांप्रथमःपट

शा॰ ति॰ टी॰ गू॰ ७

संक्षेपतो वर्णानामुत्पत्तिमभिधायेदानीं तेषामेव स्पष्टतयोत्पत्तिं कथयितुं कलाव्युत्पत्तिं च कथयितुं द्वितीयपटल आरभ्यते॥ ततो व्यक्तिरित्यादिना॥ तत्र सोमसूर्याग्नि
रूपत्वं क्रमेण स्वरव्यापकानां दर्शयति॥ एषु स्वरादिना तत्त्वात्मनः। इति चतुर्विंशतितत्त्वरूपाः॥ यतो मकारः सूर्यस्वरूपः पुरुषः। अं इति विंदुः शिवस्वरूपो ज्ञेयः॥
अः इति विसर्गः। शक्तिस्वरूपः शक्तिसहितात्परमेश्वराज्जगदुत्पत्तिर्यतः। तस्माच्छिवशक्त्यात्मकाद्द्वयोः समुदायात् पंचभूतानामुत्पत्तिरिति वक्तुं भूतानां वर्णभेदमाह॥ त

ततो व्यक्तिं प्रवक्ष्यामि वर्णानां वदने नृणां॥ प्रेरिता मरुता नित्यं सुषुम्णारंध्रनिर्गताः॥ १॥ कंठादिकरणैर्वर्णाः क्रमादीरिता भवंति ते
एषु स्वराः स्मृताः सौम्याः स्पर्शाः सौराः शुभोदयाः २॥ आग्नेया व्यापकाः सर्वे सोमसूर्याग्निदेवताः॥ स्वराः षोडश विख्याताः स्पर्शा
स्ते पंचविंशतिः॥ ३॥ तत्त्वात्मानः स्मृताः स्पर्शा मकारः पुरुषो यतः॥ व्यापका दश ते कामधनधर्मप्रदायिनः॥ ४॥ ह्रस्वः स्वरेषु
पूर्वोक्तः परो दीर्घः क्रमादिमे॥ शिवशक्तिमयास्ते स्युर्विंदुसर्गावसानकाः॥ ५॥ विंदुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशाकरः
॥ स्वराणां मध्यमं पद्मं चतुष्कं तु नपुंसकं॥ ६॥ पिंगलायां स्थिता ह्रस्वा इडायां संगताः परे॥ सुषुम्णामध्यगा ज्ञेयाश्चत्वारो ये नपुं
सकाः॥ ७॥ विना स्वरैस्तु नान्येषां जायते व्यक्तिरंजसा॥ शिवशक्तिमयान्प्राहुस्तस्माद्वर्णान्मनीषिणः॥ ८॥ कारणात्पंचभूता
नामुद्भूता मातृकापरा॥ ततो भूतात्मका वर्णाः पंच पंच विभागतः॥ ९॥ वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात्॥
पंचह्रस्वाः पंचदीर्घा विंद्वंताः संधिसंभवाः १०॥ पंचशः कादयः षक्षलसहांताः समीरिताः॥ सोमसूर्याग्निभेदेन मातृकावर्ण
संभवाः॥ ११॥ अष्टत्रिंशत्कलास्तत्तन्मंडलेषु व्यवस्थिताः॥ ॥ ॰ ॥ ॰ ॥ ॥

तो भूतात्मका इति ह्रस्वाः॥ अ इ उ ऋ ऌ दीर्घाः आ ई ऊ ॠ ॡ॥ संधिविधृता ए ऐ ओ औ अं विसर्गस्य कारणत्वात्पृथक्कृत्य गण्यते॥ पंचशः का सम॰
दयः॥ यकारादयः॥ पंच॥ पंच षक्षलसहांताः॥ एवं भूतानां दश विज्ञेयाः॥ तत्त्वज्ञानप्रकारस्त्वग्रे वक्ष्यते॥ सोमसूर्याग्निभेदेन स्वरस्य पृथक्त्वमाप ७
॥ कं रूपं तु मातृकावर्णसमुदायात् यथाक्रमं षट्त्रिंशत्कला उत्पद्यंत इत्याह॥ ॰ ॥ ॰ ॥ ॥

अमृतामानदाइत्यादिना॥ ततः सप्रयोगे प्रयोगितयाइदानीं पंचाशद्वर्णेभ्य एव रुद्रस्य श्रीकंठादिमूर्तयस्तच्छक्तयस्तथा विष्णुमूर्तयश्च तावत्यश्च शक्तयश्च निरूप्यंते

अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः॥१२॥ शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा॥ पूर्णा पूर्णामृताः कामदायिन्यः स्व
रजाः कलाः॥१३॥ तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः॥ सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा॥१४॥ कभाद्या वसुदाः
सौराष्टडांता द्वादशेरिताः धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी १५ सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि॥ यादीनां
दशवर्णानां कला धर्मप्रदा इमाः अभयेष्टकराध्येयाः श्वेतपीतारुणाः क्रमात्॥ तारस्य पंचभेदेभ्यः पंचाशद्वर्णगाः कलाः॥१७॥
सृष्टिर्ऋद्धिः स्मृतिर्मेधा कांतिर्लक्ष्मीर्द्युतिः स्थिरा॥ स्थितिः सिद्धिरिति प्रोक्ताः कचवर्गकलाः क्रमात्॥१८॥ अकाराद्ब्रह्मणोत्प
न्नास्तप्तचामीकरप्रभाः एताः करधृताक्षस्रक्पद्मजद्रूपकुंडिकाः॥१९॥ जरा च पालिनी शांतिरैश्वरी रतिकामिके॥ वरदाह्लादिनी प्री
तिर्दीर्घास्युष्टतवर्गजाः २०॥ उकाराद्विष्णुनोत्पन्नास्तमालदलसन्निभाः॥ अभीतिदरचक्रेष्टवाहवः परिकीर्तिताः॥२१॥ तीक्ष्णा
रौद्री भया निद्रा तंद्री क्षुत्क्रोधिनी क्रिया॥ उत्कारी मृत्युरेताः स्युः कथिताः पपवर्गजाः॥२२॥ रुद्रेणामार्णादुत्पन्नाः शरच्चं[illegible]ाः
॥उद्वहंत्योभयं शूलं कपालं बाहुभिर्वरं २३॥ ईश्वरेणोदिता बिंदोः पीताश्वेतारुणासिता॥ अनंता च षवर्गस्या जपाकुसुमसन्निभाः
॥२४॥ अभयं हरिणं टंकं दधाना बाहुभिर्वरं निवृत्तिः सप्रतिष्ठा स्याद्विद्या शांतिरनंतरं २५॥ इंधिका दीपिका चैव रेचिका मोचिका परा॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा २६ व्यापिनी व्योमरूपाः स्युरनंताः स्वरसंभवाः॥ सदाशिवेन संजाता नादादेताः सितविग्र
२७ अक्षस्रक्पुस्तकगुणाकपाला ढक्करांबुजाः॥ न्यासे नु योजयेदादौ षोडशस्वरगाः कलाः॥२८॥ इति पंचाशदाख्याताः कलाः सर्वस

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीकंठ इत्यादिना ॥ कलशादिषु न्यासादिषु चोपयोगितया ॥ इदानीं मनूनां मंत्रविद्याविभागेनेत्यादिना ॥ अधुना मंत्राणां प्रबोधकाल एव फलदायकता तत
श्रीकंठानंतसूक्ष्माश्च त्रिमूर्तिरमरेश्वरः ॥ २९ ॥ अर्घीशो भारभूतिश्च तिथीशः स्थाणुको हरः ॥ झिंटीशो भौतिकः सद्योजातश्चानुग्रहे
श्वरः ॥ अक्रूरश्च महासेनः षोडश स्वरमूर्तयः ॥ पश्चात्क्रोधीशचंडीशपंचांतकशिवोत्तमाः ॥ ३१ ॥ अथैकरुद्रकूर्मैकनेत्राह्वचतुराननाः ॥ अ
जेशसर्वसोमेशास्तथा लांगलिदारुकौ ॥ ३२ ॥ अर्द्धनारीश्वरश्चोमाकांतश्चाषाढिदंडिनौ ॥ स्युरत्रिमीनमेषाख्या लोहितश्च शिखी ततः
३२ ॥ छगलंडद्विरंडेशौ महाकालाख्यवालिनौ ॥ भुजंगेशपिनाकीशखड्गीशाख्यबकास्ततः ॥ ३३ ॥ श्वेतभृग्वीशलकुलिशि[illegible]
स्ततः ॥ एते रुद्राः स्मृता रक्ता धृतशूलकपालकाः ॥ ३४ ॥ पूर्णोदरी स्याद्विरजा शाल्मली तदनंतरं ॥ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा स
मीरिता ॥ ३५ ॥ सुदीर्घमुखि गोमुख्यौ दीर्घजिह्वा तथैव च ॥ कुंडोदर्यूर्द्ध्वकेशी च तथा विकृतमुख्यपि ॥ ३६ ॥ ज्वालामुखी ततो ज्ञेया प
श्चादुल्कामुखी तथा सुश्रीमुखी च विद्यामुख्येताः स्युः स्वरशक्तयः ॥ ३७ ॥ महाकाली सरस्वत्यौ सर्वसिद्धिसमन्विते ॥ गौरी त्रैलोक्य
विद्या स्यान्मंत्रशक्तिस्ततः परं ॥ ३८ ॥ आत्मशक्तिर्भूतमाता तथा लंबोदरी मता ॥ द्राविणी नागरी भूयः खेचरी चापि मंजरी ॥ ३९ ॥ रू
पिणी वीरिणी पश्चात्काकोदर्यपि पूतना ॥ स्याद्भद्रकाली योगिन्यौ शंखिनी गर्जिनी तथा ॥ ४० ॥ कालरात्रिश्च कुब्जिन्या कपर्दिन्यपि
वज्रया ॥ जया च सुमुखेश्वर्या रेवती माधवी तथा ॥ ४१ ॥ वारुणी वायवी प्रोक्ता पश्चाद्रक्षोवधारिणी ॥ ततश्च सहजा लक्ष्मीर्व्यापिनी मा
ययान्विता ॥ ४२ ॥ एता रुद्रांकपीठस्थाः सिंदूरारुणविग्रहाः ॥ रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः ॥ ४३ ॥ केशवो नारायणो माध
वो गोविंदविष्णवः ॥ मधुसूदनसंज्ञोन्यः स्यात्त्रिविक्रमवामनौ ॥ ४४ ॥ श्रीधरश्च हृषीकेशः पद्मनाभस्ततः परं ॥ दामोदरो वासुदेवः संक
र्षण इतीरिताः ॥ ४५ ॥ प्रद्युम्नश्चानिरुद्धश्च स्वराणां मूर्तयस्त्विमाः ॥ पश्चाच्चक्री गदी शार्ङ्गी खड्गी शंखी हली पुनः ॥ ४६ ॥ मुसली शूल
संयुक्ता पाशी स्यादंकुशी पुनः मुकुंदो नंदजो नंदी नरो नरकजिद्धरिः ॥ ४७ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दर्शयति॥ आग्नेया इत्यादिना निर्दिष्टा मंत्राः फलदा प्रकार इत्येवं मंत्राणां दोषं तन्निराकरणोपायं च दर्शयति॥ छिन्नादिदोषदुष्ट इत्यादिना प्रत्येकं तेषां छिन्नादिदुष्टानां
कृष्णः सत्यः सात्वतः स्याच्छौरिः शूरो जनार्दनः॥ भूधरो विश्वमूर्तिश्च वैकुंठः पुरुषोत्तमः॥ ४८॥ बली बलानुजो बालो वृषघ्नश्च वृषः पुनः
हंसो वराहो विमलो नृसिंहो मूर्तयो हलां॥ ४९॥ केशवाद्या इमे श्यामाश्चक्रशंखलसत्कराः॥ कीर्तिः कांतिः स्तुतिः पुष्टिर्धृतिः क्षांतिः क्रि
यादया॥ ५०॥ मेधा सहर्षा श्रद्धा च लज्जा लक्ष्मीः सरस्वती॥ प्रीती रतिरिमाः प्रोक्ताः क्रमेणास्वरशक्तयः॥ ५१॥ जया दुर्गा प्रभा सत्या चंडी
वाणी विलासिनी॥ विजया विरजा विश्वा विनदा सुनदा स्मृतिः॥ ५२॥ ऋद्धिः समृद्धिः शुद्धिः स्या द्बुद्धिर्भुक्तिर्मतिः क्षमा॥ रमोमा क्लेदिनी
क्लिन्ना वसुधा वसुदा परा ५३ परायणा सूक्ष्मा संध्या प्रज्ञा प्रभा निशा॥ अमोघा विद्युता चैव कीर्त्याद्याः सर्वकामदाः ५४ एताः प्रियतमां
केषु निषण्णाः सस्मितानना॥ विद्युद्दामसमानांग्यः पंकजाभपवाहवः ५५ मातृकावर्णभेदेभ्यः सर्वे मंत्राः प्रजज्ञिरे मंत्रविद्याविभागेन द्वि
विधा मंत्रजातयः॥ ५६ मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः पुनः॥ स्त्रीपुंनपुंसकात्मानो मंत्राः सर्वे समीरिताः ५७ पुंमंत्रा हुंफडंताः स्यु
र्द्विठांतास्तु स्त्रियो मताः॥ नपुंसका नमोंताः स्युरित्युक्ता मनवस्त्रिधा॥ ५८॥ शस्ताः स्तेत्रिविधा मंत्रा वश्यशांत्याभिचारके॥ अग्नीषोमात्म
का मंत्रा विज्ञेयाः क्रूरसौम्ययोः॥ ५९॥ कर्मणां विहिता तत्व विपत्मायाः समीरिताः। आग्नेया मनवः सौम्या भूयिष्ठं ह्यमृताक्षराः ६०॥
आग्नेयाः संप्रबुद्ध्यंते प्राणे चरति दक्षिणे॥ भागेन्यस्मिंस्थिते प्राणे सौम्या बोधं प्रयांति च ६१ नाडीद्वयगते प्राणे सर्वे बोधं प्रयां[ति]
यच्छंति फलं सर्वे प्रबुद्धा मंत्रिणां सदा ६२ छिन्नादिदुष्टा मंत्रास्ते पालयंति न साधकं॥ छिन्नो रुद्धः शक्तिहीनः पराङ्मुख उदीरितः।
६३। वधिरो नेत्रहीनश्च कीलितः स्तंभितस्तथा॥ दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः ६४ भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्च्छि
तः। हतवीर्यश्च हीनश्च प्रध्वस्तो बालकस्तनः॥ ६५॥ कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा॥ निर्बीजः सिद्धिहीनश्च मंदः कूटस्तथा
पुनः ६६ निरंशकः सत्वहीनः केकरो बीजहीनकः। धूमितालिंगितौ स्यातां मोहितस्तु क्षुधार्तकः ६७ अतिदृप्तोंगहीनः स्यादतिक्रुद्धः समीरितः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शां. ति. लक्षणान्याह। मनोरित्यादिना॥ अनिलं वायुबीजं यकारः संयुक्तं ककारादिना वियुक्तं। केवलं स्वराक्रांतं॥ भूबीजं लकारः। मायां ह्रींकारः। ब्रह्मविष्णुमहेश्वरतत्वा। एवः

टी. मू. अतिक्रूरश्च सव्रीडः शांतमानस एव च॥ ६८॥ स्थानभ्रष्टस्तु विकलः सोतिवृद्धः प्रकीर्तितः। निस्नेहः पीडितश्चापि वक्ष्याम्येषां च लक्षणं॥ ६९

९ मनोर्यस्यादिमध्यांतेष्वानिलबीजमुच्यते। संयुक्तं वा वियुक्तं वा स्वराक्रांतं त्रिधा पुनः। ७०। चतुर्धा पंचधा वाथ स मंत्रश्छिन्नसंज्ञकः। आ

दिमध्यावसानेषु भूबीजद्वयलांछितः ७१ रुद्धमंत्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः॥ मायात्रितत्वश्रीबीजरावहीनश्च यो मनुः ७२ शा

क्तिहीनः स कथितो यस्य मध्ये न विद्यते कामबीजं मुखे माया शिरस्यंकुशमेव च ७३ असौ पराङ्मुखः प्रोक्तो हकारो बिंदुसं[illegible] श्री

चांतमध्ये बिंदुर्वा न भवेद्बधिरः स्मृतः ७४ पंचवर्णो मनुर्यः स्याद्रेफार्केंदुविवर्जितः। नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः ७५

आदिमध्यावसानेषु हंसः प्रासादवाग्भवौ। हकारो बिंदुमाञ्जीवो रावश्चापि चतुष्कलः ७६ मायानमामि च पदं नास्ति यस्मिन्स कीलितः

एकं मध्ये द्वयं मूर्ध्नि यस्मिन्नस्त्रपुरंदरौ ७७ विद्यते स तु मंत्रः स्यात्स्तंभितः सिद्धिरोधकः। वह्निर्वायुसमायुक्तो यस्य मंत्रस्य मूर्द्धनि ७८

सप्तधा दृश्यते तं तु दग्धं मन्वीत तंत्रवित्। अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यतेक्षरैः ७९ त्रस्तः सोभिहितो यस्य मुखे न प्रणवः स्थितः।

शिवो वा शक्तिरथवा भीताख्यः स प्रकीर्तितः ८० आदिमध्यावसानेषु भवेन्मार्णचतुष्टयं॥ यस्य मंत्रः स मलिनो मंत्रविज्ञैर्विवर्जयेत् ८१

यस्य मध्ये दकारो वा क्रोधो वा मूर्द्ध्नि द्विधा। अस्त्रं तिष्ठति मंत्रस्य स तिरस्कृत ईरितः ८२ भ्यो द्वयं हृदयं शीर्षे वषट्वौषट्च मध्यतः। यस्या

सौ भेदितो मंत्रस्त्याज्यः सिद्धिषु सूरिभिः ८३ त्रिवर्णो हंसहीनो यः सुषुप्तः समुदाहृतः। मंत्रो वाप्यथवा विद्या सप्ताधिकदशाक्षरः ८४

फट्कारपंचकादिर्यो मदोन्मत्त उदीरितः। तद्वदस्त्रं स्थितं मध्ये यस्य मंत्रः स मूर्छितः ८५ विरामस्थानगं यस्य हृतवीर्यः स कथ्यते। आ

दौ मध्ये तथा मूर्ध्नि चतुरस्त्रयुतो मनुः ८६ ज्ञातव्यो हीन इत्येष यः स्याद्दशदशाक्षरः एकोनविंशत्यर्णो वा यो मंत्रस्तारसंयुतः ८७। राम

क्रौं कामबीजं क्लीं। अंकुशः क्रौं। रुद्रः वकारः। सकारो वा॥ अर्कः हकारः। चंद्रः कलारूपं। अस्त्रं फट्। पुरंदरः लकारः। क्रोधः हूंकारः शिवो बिंदुः। शक्तिः विसर्गः॥ ९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हल्लेखांकुशबीजाढ्यस्तं प्रयत्नं प्रचक्षते ॥ सप्तवर्णो मनुर्बालः कुमारोष्टाक्षरः स्मृतः ८८ षोडशार्णो युवा प्रौढश्चत्वारिंशल्लिपिर्मनुः ।
।त्रिंशदर्णश्चतुःषष्टिवर्णो मंत्रोशताक्षरः ८९ चतुःशताक्षरश्चापि वृद्ध इत्यभिधीयते । नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः ९०
यस्यावसाने हृदयं शिरोमंत्रश्च मध्यतः । शिखा वर्म च नस्यातां वौषट्फट्कार एव वा ९१ शिवशक्त्यर्णहीनो वा स निर्बीज ईरितः
एषु स्थानेषु फट्कारः षोढा यस्मिन्प्रदृश्यते ९२ स मंत्रः सिद्धिहीनः स्यान्मंदः पंक्त्यक्षरो मनुः । कूर एकाक्षरो मंत्रः स एवोक्तो निरंशकः
९३ द्विवर्णः सत्वहीनः स्याच्चतुर्वर्णश्च केकरः । षडक्षरो बीजहीनः सार्द्धसप्ताक्षरो मनुः ९४ सार्द्धद्वादशवर्णो वा धूमितः स तु निंदि
तः । सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः ९५ विंशत्यर्णस्त्रिंशदर्णो यः स्यादालिंगितस्तु सः । द्वात्रिंशदक्षरो मंत्रो मोहितः परिकी
र्तितः ९६ चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः । क्षुधार्तः स तु विज्ञेयश्चतुस्त्रिंशतिवर्णकः ९७ एकादशाक्षरो वापि पंचविंशतिव
र्णकः । त्रयोविंशतिवर्णो वा मंत्रो दृप्त उदाहृतः ९८ षड्विंशत्यक्षरो मंत्रः षट्त्रिंशद्वर्णकस्तथा त्रिंशदेकोनवर्णो वाप्यंगहीनोभिधीय
ते ९९ अष्टाविंशत्यक्षरो यस्त्वेकत्रिंशदथापि वा । अतिक्रूरः स कथितो निंदितः सर्वकर्मसु १०० त्रिंशदक्षरको मंत्रस्त्र यस्त्रिंशदथापि वा
अतिक्रूरः स गदितो निंदितः सर्वकर्मसु ॥ १०१ ऊनचत्वारिंशदर्णः सप्तत्रिंशदथापि वा कथ्यंते त्वतिरिक्तं तं मंत्रं मंत्रविशारदाः १०२
चत्वारिंशकमारभ्य द्विषष्टिर्यावदापतेत् । तावत्संख्या निगदिता मंत्राः सप्रौढसंज्ञकाः १०३ ॥ पंचषष्ठ्यक्षरा ये स्युर्मंत्रास्ते शतमान
साः । एकोनशतपर्यंतं पंचषष्ट्यक्षरादितः १०४ ये मंत्रास्ते निगदिताः स्थानभ्रष्टाश्च पाठधैः । त्रयोदशाक्षरा ये स्युर्मंत्राः पंचदशा
क्षराः १०५ विकलास्तेभिधीयंते शतं सार्द्धशतं तथा । शतद्वयं द्विनवतिरेकहीना यथवापि सा १०६ शतत्रयं यावत्संख्यानि ः
स्नेहास्ते समीरिताः ॥ चतुःशतान्यथारभ्य यावद्वर्णसहस्रकं ॥ १०७ ॥ अतिवृद्धः स योगेषु परित्याज्यः सदा बुधैः । सहस्रार्णो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ति॰ दुष्टमंत्राणां दोषापगमनानंतरेण फलजनकत्वाभावक फलदोषापगमोपायमाह॥ दोषदुष्टेत्यादिना॥ स्वतारराशिकोष्ठनामनुकूलान्भजेत्युक्तम्। तत्र वर्णे

टी॰गू॰ १० धिकामंत्रा दंडकाः पीडिता हूयाः। १०८ द्विसहस्राक्षरा मंत्राः खंडशः शतधाकृताः॥ ज्ञातव्यास्तेत्र रूपास्ते मंत्रा एते यथास्थिताः १०९
तथा विद्यास्त्रवोद्धव्या मंत्रिभिः काम्यकर्मसु॥ दोषानिमानविज्ञाय यो मंत्रान्भजते जडः ११० सिद्धिर्न जायते तस्य कल्पकोटिशतैर
पि। इत्यादिदोषदुष्टांस्तान्मंत्रानात्मनि योजयेत् १११ शोधयेद्गुरुहृदयवनो वह्न्यायोनिमुद्रया॥ मंत्राणां दश कथ्यंते संस्काराः सिद्धिदायि
नः ११२ जननं जीवनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमलीकरणाप्यायने पुनः ११३ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः।
मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतं ११४ प्रणवांतरितान्कृत्वा मंत्रवर्णान्जपेत्सुधीः। एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः
११५। मंत्रवर्णान्समालिख्य ताडयेच्चंदनांभसा प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतं ११६ विलिख्य मंत्रं तं मंत्री प्रसूनैः करवीरजैः
तन्मंत्राक्षरसंख्यातैर्हन्यात्तेन बोधनं ११७ स्वतन्त्रोक्तविधानेन मंत्री मंत्रार्णसंख्यया॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशु
द्धये ११८ संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत्। मंत्रे मलत्रयं मंत्री विमलीकरणं त्विदम् ११९ तारव्योमाग्निमनुयुक् दं
डो ज्योतिर्मनुर्मतः। कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः १२० तेन मंत्रेण विधिवदेतदाप्यायनं मतं। मंत्रेण वारिणा मंत्रं
तर्पणं तर्पणं स्मृतं॥ १२१ तारमायारमायोगे मनोर्दीपनमुच्यते॥ जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं १२२ संस्कारा द
श संप्रोक्ताः सर्वमंत्रेषु गोपिताः। यान्कृत्वा संप्रदायेन मंत्री वांछितमश्नुते १२३ स्वताराराशिकोष्ठानामनुकूलं भजेन्मनुं॥ राम॰ १०

भ्य एव नक्षत्राणामुत्पन्नत्वात्॥ केभ्यः वर्णेभ्यः कस्य कस्य नक्षत्रस्योत्पत्तिरित्याशंक्य नक्षत्राणां वर्णविभागमाह॥ ॰ ॥ ॰ ॥

प्रापलोभेति॥ अयंभावः॥ प्रा इति द्विसंख्या॥ लव्या॥ अआइतिवर्णद्वयाद्श्विन्या उत्पत्तिः॥ पइति एकसंख्या १ तयाइकाराद्भरणी॥ लोइतिर ई उ ऊ एभ्यः कृत्तिका
॥ भा ४ ऋ ॠ लृ ॡ एभ्यो रोहिणी॥ त्य १ ए एतस्मान्मृगशिरा॥ प॥ दुः १ ऐ एतस्मादार्द्रा॥ प्रा २ ओ औ द्वाभ्यां पुनर्वसुः॥ ज्यः १ कः एतस्मात्पुष्यः॥ रु २ खग
द्वाभ्यां अश्लेषा॥ द्र २ घङ द्वाभ्यांमघा १० स्या १ च एतस्मात्पूर्वाफाल्गुनी॥ ११॥ त्र २ छज द्वाभ्यामुत्तराफाल्गुनी। रु २ झञ द्वाभ्यां हस्तः। रु २ टठ द्वाभ्यां चित्रा
। कः ड एतस्मात्स्वाती॥ रं ढण द्वाभ्यां विशाखा॥ लो तथदइ एभ्योऽनुराधा॥ कध १ ज्येष्ठा॥ २ लो ३ नपफा मूलं। प १ ब पूर्वाषाढा। प १ भ उत्तराषाढा १ म श्रवणाः। प्रा २

प्रापलोभापटुः प्राज्यरुद्रस्यात्ररुरुःकरं १२४ लोकलोपपटुः प्रापः स्वलोघोमेषुभेदिताः॥ वर्णाः क्रमात्स्वरांत्यौ तु रेवत्यंतगतौ त
दा १२५ जन्मसंपद्विपत्क्षेमः प्रत्यरिः साधको वधः। मित्रं परममित्रं च जन्मादीनि पुनः पुनः १२६ वालेगोरं खुरं शेरां शमीशो
भेति राशिषु॥ क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः १२७ लग्नं धनं भ्रातृबंधुपुत्रशत्रुकलत्रकाः। मरणं धर्मकर्माय व्यया
द्वादश राशयः॥ १२८ चतुरस्रे लिखेद्वर्णाश्चतुःकोष्ठसमन्विते॥ अकारादिक्षकारांतान्स्वनामाद्यक्षरादितः १२९॥ सिद्धादीन्क
ल्पयेन्मंत्री कुर्यात्सिद्धादिभिः पुनः॥ सिद्धादीन्सिद्धिदः सिद्धो जपात्साध्यो हुतादिभिः १३० सुसिद्धः प्राप्तिमात्रेण साधकं भक्ष
येदरिः। सिद्धार्णा बांधवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः १३१ सुसिद्धाः पोषका ज्ञेयाः शत्रवो घातकामताः। दीपस्थाने समाश्रित्य
हंतं कर्मफलप्रदम् १३२ चतुरस्रां भुवं भित्वा कोष्ठानां नवकं लिखेत्॥ पूर्वकोष्ठादि विलिखेत्स प्तवर्गाननुक्रमात् १३३ लक्षमीशेम
ध्यकोष्ठे स्वरान्युग्मक्रमाल्लिखेत्। दिक्षु पूर्वादितो यत्र क्षेत्राख्याद्यक्षरस्थितं १३४ मुखं तत्तस्य जानीयाद्धस्ताव भयतः स्थितौ॥

यर एतयोर्धनिष्ठा॥ यः १ ल शतभिषा॥ ख २ वश पूर्वाभाद्रपदा। लो षसह उत्तराभाद्रपदा। घो ४ अं अः लक्षः। एभ्यः रेवती॥ इति श्लोकार्थः। विंदुविसर्गौ रेवत्यं
शगतौ ज्ञेयौ॥ अथ राशिमैत्रीमाचष्टे॥ वालेति। स्प वा ४ अ आ इ ई मेषः। ल ३ उ ऊ ऋ वृषः २। गो ३ ॠ लृ ॡ मिथुनः। ३। रं २ ए ऐ कर्कः। ४। खु २ ओ औ सिंहः। पा रं २ अं
अः शषसहलक्षाणि कन्या शेषः। कवर्गस्तुला ७ चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुंभः॥ भ ४ यरलव मीनः। इति राशिषु भेदिता वर्णाः।
इति श्लोकार्थः राशीनां फलमाह॥ लग्न इत्यादि। सिद्धसाध्यनिरूपणप्रकारमाह। चतुरस्रेत्यादि। तेषां फलमाह। सिद्धादिति। सिद्धादिवर्णानां बांधवादीना—ह॥

शा॰ ति॰ टी॰ गू॰ ११ ।कूर्मचक्रे लेखनं तत्फलं चाह। १३६। चतुरस्रमिति। मंत्रजपस्थानं चाह। पुण्यक्षेत्रेत्यादिना। जपकाले नाहारनियममाह।। भैक्ष्यमित्यादिना।। ४१।। इन्द्रा
कोष्ठे कुक्षी। उभे पादौ द्वे शिष्टं पुच्छमीरितं १३५ क्रमेणानेन विभजेन्मध्यस्थमपि भागतः। मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः १३६
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात्।। पुच्छस्थः पीड्यमे मंत्री बंधनोच्चाटनादिभिः १३७ कूर्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसा
धनं।। पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तकं १३८ तीर्थप्रदेशाः सिंधूनां संगमाः पावनं वनं। उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः १३९
देवतायतनं कूलं समुद्रस्य निजं गृहं। साधनेषु प्रशस्यंते स्थानान्येतानि मंत्रिणां १४० भैक्ष्यं हविष्यं शाकानि विहितानि फलं पयः। मूलं
लं सक्तुर्यवौ तप्त्वा भक्ष्याण्येतानि मंत्रिणां १४१ पुरुषार्थसमावाप्त्यै सत्शिष्यो गुरुमाश्रयेत्। मातृतः पितृतः शुद्धः शुद्धभावी जितेंद्रि
यः १४२ सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित्। परोपकारनिरतो जपपूजादितत्परः १४३ अमोघवचनः शांतो वेदवेदार्थपारगः।
योगमार्गानुसंधायी देवताहृदयंगमः। १४४ इत्यादिगुणसंपन्नो गुरुरागमसंमतः। शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः १४५
अधीतवेदकुशलो दूरमुक्तमनोभवः। हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः १४६ स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः
वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः १४७ त्यक्ताभिमानो गुरुषु जातिविद्याधनादिभिः। गुर्वाज्ञापालनार्थं हि प्राणव्ययरतोद्यतः
१४८ विहत्य च स्वकार्याणि गुरुकार्यरतः सदा।। दासवन्निवसेच्चास्तु गुरौ भक्त्या सदा शिशुः १४९ कुर्वन्नाज्ञां दिवा रात्रौ गुरुभक्तिपराय
णः। आज्ञाकारी गुरोः शिष्यो मनोवाक्कायकर्मभिः १५० यो भवेत्स तदा ग्राह्यो नेतरः शुभकांक्षया। मंत्रपूजारहस्यानि यो गोपयति सर्वदा।।
त्रिकालं यो नमस्कुर्यादागमाचारतत्त्ववित्। स एव शिष्यः कर्तव्यो नेतरः स्वल्पजीवनः १५२ एतादृशगुणोपेतः शिष्यो भवति नापरः।
एकाब्देन भवेद्योग्यो ब्राह्मणोऽब्दद्वयान्नृपः १५३ वैश्यो वर्षैः त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोः। सशुश्रूषुः परिश्रात्यो दीक्षायोग्यतादि राम॰
नौ गुरुशिष्यलक्षणमाह। मातृतः पितृत इत्यादिना। शिष्यस्य गुरुसेवाविधानमाह। एकाब्देत्यादिना १५४ ।। इति गूढार्थदीपिकायां द्वितीयः पटलः ।। ।। ११

अथेदानीं दीक्षांगवास्तुपूजामंडपकरणकुंडादिनिर्माणंचयथावद्वक्तुंतृतीयपटलमारभ्यते॥ततोवक्ष्यामीत्यादिना॥तत्रप्रथमंवास्तुप्रकारः॥तत्पूजाप्र

ततोवक्ष्यामिदीक्षांगंवास्तुयागपुरःसरं॥कृतेनयेनमंत्रज्ञोदीक्षायाःफलमश्नुते॥१॥राक्षसंवास्तुनामानंहत्वाधिष्ठापतत्तनुं॥
स्थितास्त्रिपञ्चाशद्देवास्तेभ्यःपूर्वंवलिंहरेत्॥२॥वलिमण्डलमेतेषांयथावदभिधीयते।पूर्वापरायतंसूत्रंविन्यसेदुत्तमानतः ३
तन्मध्यंकिञ्चिदालंव्यमत्स्यौद्वौपरितोलिखेत्॥तयोर्मध्येस्थितंसूत्रंविन्यसेद्दक्षिणोत्तरं॥४॥द्वाभ्यांद्वाभ्यांतथाग्राभ्यांकोणेषु
मकरान्लिखेत॥मत्स्यमध्येस्थिताग्राणितत्रसूत्राणिपातयेत्॥५॥चतुरस्रंभवेत्तत्रचतुःकोष्ठसमन्वितं॥तत्पुनर्विभजेन्मंत्री
चतुःषष्टिपदंयथा॥६॥ईशानाद्रक्षसोयावद्यावदग्नेःप्रभंजनः॥एवंसूत्रद्वयंस्यात्कर्णसूत्रंसमाहितः॥७॥ब्रह्माणंपूजयेदादौ
मध्येकोष्ठचतुष्टये॥दिक्चतुष्कोष्ठपूर्वादियजेदार्यमनंतरं ८ विवस्वंततोमित्रंमहीधरमतःपरं॥कोणार्द्धकोष्ठद्वंद्वेषुवह्न्या
दिपरितःपुनः ९ सावित्रंसवितारंचशक्रमिंद्रजयंपुनः॥रुद्रंरुद्रजयंविद्वानापंचाप्यापवत्सकं १० तत्कर्णसूत्रोभयतःकोष्ठद्वंद्वे
षुदेशिकः॥शर्वंगुहंचार्य्यमणंजंभकंपिलिपिञ्छकं॥११॥चरकींचविदारींचपूतनामर्चयेत्क्रमात्॥अर्चयेद्दिक्षुपूर्वादिसार्द्धो
च्यंतपदेष्विमान् १२॥अष्टावष्टौविभागेनदेवान्देशिकसत्तमः॥क्रमादीशानपर्जन्यजयंताःशक्रभास्करौ १३ सत्योवृषांतरिक्षौच
दिशिप्राच्यामवस्थिताः॥अग्निःपूषाचवितथोयमश्चगृहरक्षकः १४ गंधर्वोभृंगराजश्चमृगोदक्षिणदिग्गताः॥निर्ऋतिर्दौवारिकश्चसु
ग्रीववरुणौततः॥१५॥पुष्पदंतासुरौशेषरोगौप्रत्यक्दिशिस्थिताः॥वायुर्नागश्चमुख्यश्चसोमेभल्लाटएवच॥१६॥अर्गलाख्यो
दित्यदितीकुवेरस्यदिशिस्थिताः॥उक्तानामपिदेवानांपदान्यापूर्वंपंचभिः १७ रजोभिस्तेषुयैतेभ्यःपापसान्नैर्वलिंहरेत्॥अयंवा
स्तुवलिःप्रोक्तःसर्वसम्पत्समृद्धिदः १८ नक्षत्रराशिवाराणामनुकूलेशुभेहनि॥ततोभूमितलेशुद्धेतुषांगारविवर्जिते॥ १९॥

वारंचनिगद्यते॥कृतेरचनाप्रकारपुरःसरंकथयति॥१॥२॥३॥४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥१३॥१४॥१५॥१६॥१७॥१८॥ १९॥

प्रागेवमंडलनिर्माणेत्यादिना॥मंडपरचनाप्रकारंदर्शयति।ततोभूमितलेत्यादिना॥त्र्यंकुरारोपणप्रकारंतन्मंडलरचनाप्रकारश्चरःसंरंकथयामिप्रागेवेत्यादिना॥श्रं

पुण्याहंवाचयित्वातुमंडपंरचयेच्छुभं।पंचभिःसप्तभिर्हस्तैर्नवभिर्वामितांतरं॥२०॥षोडशस्तंभसंयुक्तंचत्वारस्तेषुमध्यगाः॥अष्टह
स्तसमुच्छ्रायाःसंस्थाप्याद्वादशाभितः॥२१॥पंचहस्तप्रमाणास्तेविच्छिद्राऋजवःशुभाः॥तत्पंचमांशंनिखनेन्मेदिन्यांतत्रवित्तमः
॥२२॥नारिकेलदलैर्वंशैस्थापयेत्तत्समंततः॥द्वारेषुतोरणानिस्युःक्रमान्क्षीरमहीरुहां॥२३॥स्तंभोच्छ्रायःस्मृतस्तेषांसप्तहस्तैः
पृथक्पृथक्॥दशांगुलप्रमाणेनतत्परीणाहईरितः॥२४॥तिर्यक्फलकमानस्यात्स्तंभानामर्द्धमानतः॥शूलानिकल्पयेन्मध्ये
तोरणोहस्तमानतः॥२५॥दिक्षुध्वजान्निवध्नीयाल्लोकपालसमप्रभान्॥वितानदर्भमालाद्यैरलंकुर्वीतमंडपं॥२६॥तत्त्रिभागमिते
क्षेत्रेरत्निमात्रसमन्वितां॥चतुरस्रांततोवेदींमंडलायप्रकल्पयेत्।२७।प्रागेवदिक्षादिवसात्सप्तभिर्विद्वद्दिनैः॥सर्वमंगल
संपत्त्यैविदध्यादंकुरार्पणं॥२८॥मंडपस्योत्तरेभागेशालांपूर्वापरायतां॥गूढांकुर्यात्ततःस्तस्यांमंडलंरचयेत्सुधीः॥२९॥पंचह
स्तप्रमाणानिपंचसूत्राणिपातयेत्॥पूर्वापरायतान्येषामंतरंद्वादशांगुलं॥३०॥दक्षिणोत्तरसूत्राणितद्वदेकादशार्पयेत्॥पदा
नितत्रजायंतेचत्वारिंशत्प्रमार्ज्जयेत् ३१ पंक्तांवीथीश्चतस्रोतस्त्वनुष्कोभयपार्श्वयोः॥वीथ्योर्द्वचचतुष्कोष्ठत्रयमत्रावशिष्यते ३२
पदानिरंजयेत्तानिश्वेतपीतारुणासितैः॥रजोभिःश्यामलेनाथवीथीःपूर्वयेत्सुधीः ३३ पात्राणित्रिविधान्याहुरंकुरार्पणकर्मसुपा
लिकाःपंचमुख्यश्चशरावाश्चचतुःक्रमात्॥३४॥प्रोक्ताःस्युःसर्वतंत्रज्ञैर्हरिब्रह्मशिवात्मकाः॥एषामुच्छ्रायउन्नेयःषोडशद्वादशाष्टभिः=
३५ अंगुलैःक्रमशस्तानिशुभान्यावेष्ट्यतंतुना।प्रस्थाल्पदेशिकस्तेषुपदेष्वाहितशालिषु॥३६॥सुगंधिदर्भकूर्चेषुपश्चिमादिनिवेशये
त्।करीषवालुकामृद्भिस्तानिपात्राणिपूरयेत्।३७।सुधावीजेनवीजानिदुग्धैःप्रक्षाल्यतंत्रवित्।मूलमंत्राभिजप्तानिपंचघोषपुरःस

कुरुपात्रनामान्याह॥पालिकेति॥सुधावीजंवकारः॥आढकः।आंध्रभाषायां।कुंडलु॥कुड्या॥कान्यकुब्जभाषायां॥ग्वरहरा॥निष्पावाः॥उड्रभाषायांमनुलु

कान्यकुब्जभाषायां। वलाकुलत्था। श्रीं अभाषायां कोलुच्छा। भाषांतरे कुलथी। कंकुष्ठं अभाषायां। इतरभाषायां कंगुनी। नीरंभान् मृष्टयवाः। पूर्वोक्तिमेणाकुंडानां स्वना
प्रकारमाह। हस्तमात्रमित्यादिना॥ हस्तलक्षणमाह। चतुर्विंशतीति। अंगुलीलक्षणमाह। कर्त्रुरिति। मतांतरमाह। यवानामिति॥ चतुरस्रीकृते क्षेत्रे पंचधा विभजेत्पुना
आशीर्वादैर्द्विजातीनां मंगलाचारपूर्वकं। निर्वपेत्तेषु पात्रेषु देशिकोयतमानसः ३९ शालिश्यामाढकीमुद्गतिलनिष्पावसर्षपाः। कु
लत्थकंगुमाषाश्च बीजान्यंकुरकर्मणि ४० हरिद्राद्भिः समभ्युक्ष्य वस्त्रेणाच्छाद्य देशिकः। बलिं त्रिविधपात्राणां दिक्षु पूर्वादितो हरेत्॥
प्रणवाद्यैर्नमोतैश्च रात्रौ रात्रीशनामभिः॥ भूतानि पितरो यक्षा नागा ब्रह्मा शिवो हरिः ४२ सप्तानामपि रात्रीणां देवताः समुदीरिताः। भूते
भ्यः सगुलाजतिलहरिद्राद्धिसक्तवः। ४३ सान्नाः पितृभ्यः सतिलास्तंडुलाः परिकीर्तिताः। करंभलाजा यक्षेभ्यो नारिकेलोदकान्विते ४४
सक्तुपिष्टं च नागेभ्यो ब्रह्मणे पंचजाः स्मृताः॥ सापूपमन्नं शर्वाय विष्णवे च गुडोदनं ४५ ततो लोकेश्वरेभ्यश्च वितरेद्विबहुलिं दीक्षायाम
भिषेके पुनर्नवे वेश्मप्रवेशने ४६ उत्सवेषु च संपत्त्यै विदध्यादंकुरार्पणम्॥ प्राक्प्रोक्ते मंडपे विद्वान् वेदिकायाबहिः स्त्रिधा ४७ क्षेत्रं विभज्य मध्यां
शे पूर्वादि परिकल्पयेत्॥ अष्टास्वाशासु कुंडानि रम्याकाराण्यनुक्रमात् ४८ चतुरस्रं योनिमर्द्धचंद्रं त्र्यस्रं सुवर्तुलं षडस्रं पंकजाकारमष्टा
स्रं तानि नामतः ४९ आचार्यकुंडं मध्ये स्याद्गौरीपतिमहेंद्रयोः। हस्तमात्रमितां भूमिं पूर्ववत्परिकल्पयेत् ५० समंतात्कुंडमेतेस्या चतुरस्रं
शुभावहं॥ चतुर्विंशत्यंगुलाढ्यं हस्तं तत्र विदो विदुः ५१ कर्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणः। मध्यस्य दीर्घमानेन मानांगुलमुदी
रितं ५२ यवानामष्टभिः कुंत्रमानांगुलमुदीरितं॥ चतुरस्रीकृते क्षेत्रे पञ्चधा विभजेत्सुधीः ५३ न्यसेत्पुरस्तादेकांशं कोणार्द्धार्द्धप्रमाण
तः भ्रामयेत्कोणमानेन तथान्यदपि मंत्रवित् ५४ सूत्रयुग्मं ततो दद्यात्कुंडं योनिनिभं भवेत्॥ चतुरस्रीकृते क्षेत्रे दशधा विभजेत्पुनः ५५ ए
कमेकं त्यजेदंशमधऊर्ध्वे च तंत्रवित्। ज्यासूत्रं पातयेदग्रे तन्मानाद्भ्रामयेत्ततः॥ ५६॥ ९ तस्य पुरस्तात्कोणार्द्धार्द्धमानतः एकमंशं लंघयेत्। ततः पश्चि
मे रेखामध्यादारभ्य तत्कोणपर्यंतमुत्तरतो दक्षिणपर्यंतं भ्रामयेदुभयतः। ततो भ्रामिति सूत्रद्वयाग्रमारभ्य पूर्वलांछनपर्यंतं दक्षिणोत्तरं तत्सूत्रद्वयं दद्यात्। ततो योनिनि
भं कुंडं रम्यं भवति। चतुरस्रीकृते क्षेत्रे दशधा विभक्ते अत्र ऊर्ध्वे क्रमेणैकमंशं त्यक्त्वा पुरतो ज्यासूत्रं क्षेत्रसंदैर्घ्यं पातयित्वा क्षेत्रप्रमाणादधिकं तदग्रपर्यंतं पश्चिमकोणाद्

शा·ति· ततोर्द्धचंद्रनिभंकुंडंभवति॥चतुर्द्धाविभक्तेक्षेत्रेपश्चिमकोणद्वयपार्श्वयोर्विभक्तचतुर्भागमध्येएवमेकंभागंयावत्तावल्लांछयेत्॥एकमेकमग्रतोपिलांछयेत्।तस्मा
टी·गू· त्पश्चिमलांछनपर्यंतसूत्रद्वयंकुर्यात्।पश्चिमलांछनद्वयवर्द्धयेत्।एवंकृतेरम्यंत्रिकोणंकुंडंभवेत्॥अष्टादशधाविभक्तेक्षेत्रेवहिश्चतुर्दिक्षु॥एकमेकमंशंलांछये
१२ अर्द्धचंद्रनिभंकुंडंरमणीयमिदंभवेत्।चतुर्द्धाभेदितेक्षेत्रेन्यसेद्भपपार्श्वयोः॥५७॥एकैकमंशंतन्मानादग्रतोलांछयेत्ततः।सूत्रयुग्मं
ततःकुर्यात्त्र्यस्रंकुंडमुदाहृतं।५८ अष्टादशांशेक्षेत्रेचन्यसेदेकंवहिर्दिशः॥भ्रामयेत्तेनमानेनवृत्तंकुंडमनुत्तमं ५९ अष्टधाविभजेत्क्षेत्रं
मध्यसूत्रस्यपार्श्वयोः॥भागंन्यसेदेकमेकंभागेनानेनमध्यतः।६०।कुर्यात्पार्श्वद्वयेमत्स्यचतुष्कंतत्रवित्तमः।सूत्रषट्कंततोदद्यात्षड
स्रंकुंडमुत्तमं ६१ चतुरस्रीकृतेक्षेत्रेविभज्याष्टादशांशतः॥एकंभागंवहिर्न्यस्यभ्रामयेत्तेनवर्तुलं ६२ वृत्तानिकर्णिकादीनांवहिस्त्रीणि
प्रकल्पयेत्॥पद्मकुंडमितिप्रोक्तंविलोचनमनोहरं ६३ पूर्ववद्विभजेत्क्षेत्रंचतुर्विंशतिभागतः।एकंभागंवहिर्न्यस्यचतुरस्रंप्रकल्पये
त् ६४ अंतस्थचतुरस्रस्यकोणाद्र्द्धप्रमाणतः।वाह्यस्यचतुरस्रस्यकोणाभ्यांपरिकल्पयेत् ६५ दिशिप्रतियथान्यायमष्टौसूत्राणिपा
तयेत्।अष्टास्रंकुंडमेतद्धितत्त्वविद्भिरुदाहृतं ६६ यावत्कुंडस्यविस्तारःखननंतावदीरितं कुंडानांयादृशंरूपंमेखलानांचतादृशं ६७
कुंडानांमेखलास्तिस्रोमुष्टिमात्रेणताःक्रमात्।उत्सेधायामतोज्ञेयाद्व्येकाद्र्यंगुलसंमिताः ६८ अरत्निमात्रेकुंडेस्युस्ताश्चिद्व्येकांगुला
त्मिकाः।एकहस्तमितेकुंडेवेदाग्निनयनांगुलाः ६९ मेखलानांभवेदंतःपरितोनेमिरंगुलात्।एकहस्तस्यकुंडस्यवर्द्धयेत्तत्क्रमात्सुधीः
७० दशहस्तांतमन्येषांअर्द्धांगुलवशात्पृथक्।कुंडेद्विहस्तेताज्ञेयारसवेदगुणांगुलाः ७१ चतुर्हस्तेषुकुंडेषुवसुनर्कयुगांगुलाः।कुंडे
रसकरेताःस्युर्दशाष्टत्वंगुलान्विताः ७२॥ ९९ तभ्रामयेत्तेनमानेनवर्तुलंकुंडमुत्तमंभवेत्॥अष्टधाविभक्तेक्षेत्रेमध्यसूत्रस्यदक्षिणपूर्वपश्चि राम·
मपार्श्वयोरेकैकंलांछयेत्॥क्षेत्राद्बहिःपूर्वपश्चिमसूत्रद्वयमध्येपिएकमेकमंशंन्यसेत् पूर्वलांछनमध्यसूत्रपार्श्वपूर्वलांछनपर्यंतंदक्षिणतः।तस्यैवोत्तरतः १२
।पूर्वलांछनपर्यंतंसूत्रद्वयंकुर्यात्॥तथैवपश्चिमएवलांछनीयं।उत्तरतोमध्यसूत्रलांछनपर्यंतंतस्यैवदक्षिणतःपश्चिमलांछनपर्यंतंसूत्रद्वयंदद्यात्॥ ०।

अनंतरंमध्यसूत्रदक्षिणोत्तरपार्श्वद्वयोर्लांछनयोर्मध्ये पूर्वपश्चिमाग्रं सूत्रद्वयं न्यसेत्।।एवं षट्सूत्रपातने षडस्त्रं रमणीयं मंडलाकारं निष्पद्यते।।अष्टादश
धा विभक्ते बहिरेकं भागं न्यस्य चतुर्दिक्षु भ्रामयेत्।पुनर्वर्तुलं कृत्वा केसराणि परिकल्पयेत्।।तदुपरि वर्तुलं कृत्वा पत्राणि तदुपरि वर्तुलं भ्रामयेत्।।एवं कृते पद्मनि
भं कुंडं भवति।।चतुर्विंशतिधा विभक्ते क्षेत्रे दिक्षु बहिरेकैकभागं विन्यस्य पूर्वलांछनाद्दक्षिणलांछनपर्यंतं तस्मात्पश्चिमलांछनपर्यंतं।।तस्मादुत्तरलांछनपर्यं
तम् तस्मात्पूर्वलांछनपर्यंते सूत्रे कृते चतुरस्राद्बहिश्चतुरस्रं भवति।।अनंतरमेतस्य चतुरस्रकोणार्धमानेन बाह्यचतुरस्रस्यैकैककोणपार्श्वयोरेकैकांशं लां

वसुहस्तमिते कुंडे भानुपंक्त्यष्टकान्विताः।।७३।।दशहस्तमिते कुंडे मनुभानुदशांगुलाः।। विस्तारोत्सेधतोज्ञेया मेखला
सर्वतो बुधैः।।७४।। होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवत्।।मुष्ट्यरत्न्येकहस्तानां कुंडानां योनिरीरिता।।७५।।
षट्चतुर्द्व्यंगुलायामविस्तारोन्नतिशालिनी।।एकांगुलं तु योन्यग्रं कुर्यादीषदधोमुखं।।७६।।एकैकांगुलतो
योनिं कुंडेष्वन्येषु वर्द्धयेत् ।। यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत्।।७७।।

९ कुर्येत्।।दिशं प्रतीत्यपमर्थः।।पूर्वकोण
स्यदक्षिणपार्श्वलांछनाद्दक्षिणकोणस्य पूर्वलांछनपर्यंतमाग्नेयसूत्रं तस्मात्पश्चिमलांछनपर्यंतं दक्षिणसूत्रं तस्माद्दक्षिणात्पश्चिमलांछनपर्यंतं निरृ
तिसूत्रं पातयेत्।।तस्मात्पश्चिमोत्तरलांछनपर्यंतं पश्चिमसूत्रं पातयेत्।।ततोप्युत्तरपश्चिमपर्यंतं वायव्यसूत्रं पातयेत्।।तस्मादनंतरं पूर्वलांछनपर्यंतमु
त्तरसूत्रं पातयेत्।।ततः पूर्वलांछनपर्यंतमैशानसूत्रं पातयेत्।।ततस्तदनंतरं दक्षिणलांछनपर्यंतं पूर्वसूत्रं रत्येवदिशं प्रत्यष्टसूत्राणि पातयेत्।। एवं कृते
अष्टास्रं कुंडं रमणीयं भवति उत्तरोग्रथः स्पष्टः।।वसुरष्टौ।।तर्कः षट्।।युगं चत्वारि।।भानुर्द्वादश।। पंक्तिर्दश।।मनुश्चतुर्दश ।। ७८ ।। ।।

स्थला दारभ्येति॥ तृतीयमेखलेसंदृश्यभूमिमारभ्येतियावत्॥ नालंयोन्याधारंसूत्रमयंमूर्द्धीकारंकल्पयेत्॥ सरंध्रकंमेखलाकालमध्योपरिस्तरणार्थंरंध्रे

स्थलादारभ्यनालंस्याद्योन्यामध्यंसरंध्रकं॥ नार्पयेत्कुंडकोणेषुयोनिंतांतत्रवित्तमः॥ ७८॥ कुंडानांकल्पयेदंतर्नाभिमंबुजसन्निभां॥ तत्तत्कुंडानुरूपंवामानमस्यानिगद्यते॥ ७९॥ मुष्ट्यरत्न्येकहस्तानांनाभिरुत्सेधतारतः॥ द्वित्रिवेदांगुलोपेताकुंडेष्वन्येषुवर्द्धयेत्॥ ८०॥ यवद्वयक्रमेणैवनाभिंपृथग्गुदारधीः॥ योनिकुंडेयोनिमब्जंकुंडेनाभिंविवर्जयेत्॥ ८१॥ नाभिक्षेत्रंत्रिधाभित्वामध्येकुर्वीतकर्णिकां॥ बहिरंशद्वयेनाष्टौपत्राणिपरिकल्पयेत्॥ ८२॥ मुष्टिमात्रमितंकुंडंशतार्द्धेसम्प्रचक्षते॥ शतहोमेरत्निमात्रंहस्तमात्रंसहस्रके॥ ८३॥ द्विहस्तमयुतेलक्षेचतुर्हस्तमुदीरितं॥ दशलक्षेतुषड्हस्तंकोट्यामष्टकरंस्मृतम्॥ ८४॥ एकहस्तमितंकुंडंलक्षमेकंविधीयते॥ लक्षाणांदशकंयावत्तावद्धस्तेनवर्द्धयेत्॥ ८५॥ दशहस्तमितंकुंडंकोटिहोमेविधीयते॥ सर्वसिद्धिकरंकुंडंचतुरस्रमुदाहृतम् ८६ पुत्रप्रदंयोनिकुंडमर्द्धेंदुाभंशुभप्रदम्॥ शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांतिकर्मणि॥ ८७॥

११

कल्पयेत्॥ शास्त्रोक्तविधिनावक्ष्यमाणप्रकारेणात
मेवप्रकारंदर्शयति॥ पद्मक्षेत्रस्येति॥ संधिसंस्थानिपदानित्रीणीति॥ पंकजस्थानषट्त्रिंशत्पदमध्यकोणानिहित्वानित्रीणि॥ ॥

छेदमारणयोः कुंडं षडस्रं पद्मसन्निभं। वृष्टिदं रोगशमने कुंडमष्टास्रमीरितं। ८८। विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते।। वैश्याना
मर्द्धचंद्राभं शूद्राणां त्र्यस्रमीरितं।। ८९।। चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः। कुंडरूपं तु जानीयात्परमं प्रकृतेर्वपुः ९० प्राच्यां शिरः स
माख्यातं बाहू दक्षिणसौम्ययोः।। उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे ९१ नित्यं नैमित्तिकं काम्यं स्थंडिले वा समाचरेत्।। हस्तमात्रेण
तत्कुर्याद्वालुकाभिः सुशोभनं ९२ अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः। एवं प्रोक्तानि कुंडानि कथ्यते स्रुक्स्रुवौ ततः। ९३। प्रकल्पयेत्स्रु
वं यागे वक्ष्यमाणेन वर्त्मना। श्रीपर्णीशिंशपाक्षीरशाखिष्वेकमयं गुरुः। ९४। गृहीत्वा विभजेद्धस्तमात्रं षट्त्रिंशता पुनः। विंशत्यंशैर्भवेद्दं
डो विदिक्षैरष्टभिर्भवेत् ९५ एकांशेन मितः कंठः सप्तभागमितं मुखं। वेदिस्त्र्यंशेन विस्तारः कंठस्य परिकीर्तितः ९६। अग्रं कंठसमानं स्यान्मुखे
मार्गं प्रकल्पयेत्। कनिष्ठांगुलिमानेन सर्पिषो निर्गमाय च।। ९७ वेदिमध्ये विधातव्या भागेनैकेन कर्णिका। विदधीत बहिस्तस्या एकांशेना
भिपंकजं। ९८ तस्य खातं त्रिभिर्भागैर्वृत्तमर्द्धांशतो भवेत्।। अंशेनैकेन परितो दलानि परिकल्पयेत् ९९ मेखला स्रुववेद्योः स्यात्परितो
द्व्यंशमानतः।। दंडमूलाग्रयोः कुंभौ ग्रावेदांगुलैः क्रमात् १०० गुंजो युगयमांशैः स्याद्दंडस्यानाह ईरितः। षड्भिरंशैः पृष्ठभागो वेद्याः कूर्माकृ
तिर्भवेत् १०१ हंसस्य वा हस्तिनो वा पोत्रिणो वा मुखं लिखेत्। मुखस्य पृष्ठभागे स्याः संप्रोक्तं लक्षणं स्रुचः १०२ स्रुवश्चतुर्विंशति भि
र्भागैरारचयेत्स्रुवं।। द्वाविंशत्या दंडमानमंशैरेतस्य कीर्तितं १०३ चतुर्भिरंशैरानाहः कर्णीज्यया हताच्छिरः। अंशद्वयेन निखनेत्तं
के मृगपदाकृतिं १०४ दंडमूलाग्रयोर्गंडी भवेत्कंकणभूषिता।। स्रुवस्य विधिराख्यातः कथ्यते मंडलान्यथ। १०५ चतुरस्रे चतुःको
ष्ठे कर्णसूत्रसमन्विते।। चतुर्दिक्षु चकोष्ठेषु कोणसूत्रचतुष्टयं १०६ मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत्तथा।। पूर्वापरायते द्वे द्वे मंत्रे
याम्योत्तरायते १०७ पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयं ।। पूर्ववत्कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ।। १०८ ।। ।।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदुक्तंतेषुमत्स्येषुदद्यात्सूत्रचतुष्टयम्।ततःकोष्ठेषुमत्स्याःस्युस्तेषुसूत्राणिपातयेत् १०९ यावच्छतद्वयंमंत्रीषट्पंचाशत्पदान्यपि।ता
वत्तेनैवविधिनातत्रसूत्राणिपातयेत्॥११०॥षट्त्रिंशतापदैर्मध्येलिखेत्पद्मंसलक्षणं।वहिःपंक्त्याभवेत्पीठंपंक्तियुग्मेनवीथिका १११
द्वारशोभोपशोभाढ्यानश्रिष्टाभ्यांपरिकल्पयेत्।शास्त्रोक्तविधिनामंत्रीततःपद्मंसमालिखेत् ११२ पद्मक्षेत्रस्यसंत्यज्यद्वादशांशंव
हिःसुधीः।तन्मध्यंविभजेन्मंत्रीत्रिभिःसमविभागतः ११३।आद्यस्यात्कर्णिकास्थानंकेशराणांद्वितीयकं।तृतीयंतत्रपत्राणांमुक्तांशेनद
लाग्रकं ११४ वाह्यवृत्तांतरालस्यमानंयद्विधिनासुधीः निधायकेसराग्रेषुपरितोद्वेनिशाकरान् ११५ लिखित्वासंधिसंस्थानितत्रसूत्राणिपात
येत्॥दलाग्राणांचयन्मानंतन्मानाहृतमालिखेत् ११६ तदंतरालतन्मध्यसूत्रस्योभयतःसुधीः।आलिखेद्वात्यहस्तेनदलाग्राणिसमंततः
॥११७॥दलमूलेषुयुगशःकेशराणिप्रकल्पयेत्।एतत्साधारणंप्रोक्तंपंकजंतंत्रवेदिभिः ११८।पदानित्रीणिपीठार्थेपीठकोणेषुमार्जयेत्॥
अवशिष्टपदैर्विद्वान्गात्राणिपरिकल्पयेत्।११९।पदानिवीथिसंस्थानिमार्जयेत्तंत्रभेदतः।दिक्षुद्वाराणिरचयेद्द्विचतुष्कोष्ठ
कैस्ततः।१२०पदैस्त्रिभिरथैकेनशोभास्युर्द्वारपार्श्वयोः।उपशोभास्तुरेकेनत्रिभिःकोष्ठैरनंतरम्॥अवशिष्टैःपदैःषड्भिःकोणानांस्या
च्चतुष्टयं॥रंजयेत्पंचभिर्वर्णैर्मंडलंतन्मनोहरं १२२ पीतंहरिद्राचूर्णंस्यात्सितंतंडुलसंभवं॥कुसुंभचूर्णमरुणंकृष्णंदग्धपुलाकजं१
२३ विल्वादिपत्रजंश्याममितिसूक्तंपंचवर्णकं॥अंगुलोत्सेधविस्ताराःसीमारेखाःसिताःशुभाः १२४॥कर्णिकांपीतवर्णेनकेसराण्यरुणे
नच।शुभ्रवर्णेनपत्राणितत्संधिःश्यामलेनच॥१२५॥रजसारंजयेन्मंत्रीपद्मापीतेवकर्णिका॥केसराःपीतवर्णाक्ताःअरुणानिदला
निच॥१२६॥संधयःकृष्णवर्णास्युःपीतेनाप्यसितेनवा॥रंजयेत्पीठगर्भाणिपादाःस्युररुणाप्रभाः।१२७।गात्राणितस्यशुक्लानिवीथी
षुचचतस्रषु॥आलिखेत्कल्पलतिकादलपुष्पफलान्विता॥ १२८ ॥ वर्णैर्नानाविधैश्चित्रैःसर्वदृष्टिमनोहराः ॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अवशिष्टचतुःकोणांतरालपदानि पीठगात्राणि द्विचतुःकोष्ठैः क्रमेणाभ्यंतरबाह्यपंक्तिकोष्ठानीत्यर्थः ॥ त्रिभिरभ्यंतरैरेकेन बहिःस्थेनकेन त्रिभिरभ्यंतरस्थः

द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः ॥ १२९ ॥ उपशोभाः पीतवर्णाः कोणान्यसितभांसि च ॥ तिस्रो रेखा बहिः कुर्यात् सितरक्तासिताः क्रमात् १३० । मंडलं सर्वतोभद्रमेतत् साधारणं मतं ॥ चतुरस्रां भुवं भित्वा दिग्भ्यो द्वादशधा सुधीः १३१ । पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतं । चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशता बुजं ॥ १३२ ॥ कोष्ठैः प्रकल्पयेत् पीठं पंक्त्यानैव तु वीथिका ॥ द्वारशोभे यथा पूर्वमुपशोभा न दृश्यते १३३ । अवशिष्टैः पदैः कुर्यात् षड्भिः कोणानि तंत्रवित् ॥ विदध्यात् पूर्ववच्छेषमेवं वा मंडलं शुभं १३४ चतुरस्रे चतुःषष्टिपदान्यारचयेत् सुधीः ॥ पदैश्चतुर्भिः पद्मं स्यान्मध्ये तत्परितः पुनः १३५ वीथ्यां श्वेतरसैः कुर्वीत मंडलांतावसानिकाः दिग्गतेषु चतुष्केषु पंकजानि समालिखेत् १३६ । विदिग्गतचतुष्कानि भित्वा षोडशधा सुधीः । मार्जयेत् स्वस्तिकाकारान् श्वेतपीतारुणासितैः १३७ रजोभिः पूरयेत्तानि स्वस्तिकानि शिवादितः । प्राक्प्रोक्तेनैव मार्गेण शेषमन्यत् समापयेत् १३८ नवनाभमिदं प्रोक्तं मंडलं सर्वसिद्धिदं । पंचाब्जमंडलं प्रोक्तमेतत् स्वस्तिकवर्जितं ॥ १३९ ॥ दीक्षायां देवपूजार्थं मंडलानां चतुष्टयम् । सर्वतंत्रानुसारेण प्रोक्तं सर्वसमृद्धिदम् ॥ १४० ॥ इति श्री शारदातिलके तृतीयः पटलः ॥ ३ ॥ ॥

द्वयोर्वर्णानां द्वय्यनियममाह हरिरुद्रेत्यादिना स्पष्टमपरम् ॥ १४० ॥ इति गूढार्थदीपिकायां तृतीयः पटलः ॥ ३ ॥ श्री ॥ श्री ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इदानींदीक्षाप्रकारंवक्तुमारभ्यते॥अथेति॰दीक्षाशब्दार्थमाह॥ज्ञानमित्यादिना॥प्रथमंक्रियादीक्षांनिरूपयति॥देशिकेत्यादिना॥दर्भमुष्टिनातद्विकिरणेकर्तविं

अथदीक्षांप्रवक्ष्यामिमंत्रिणांहितकाम्यया।विनायया न लभ्येतसर्वमंत्रफलंयतः १।दिव्यंज्ञानंयतोदद्यात्कुर्यात्पापस्यसंक्षयः त
स्मादितिचसंप्रोक्तादेशिकैस्तत्ववेदिभिः २।चतुर्विधासासंदिष्टाक्रियावत्यादिभेदतः॥क्रियावतीवर्णमयीकलात्मावेधमय्यपि ३॥ताः
क्रमेणैवकथ्यंतेतंत्रेस्मिन्संपरावहाः॥देशिकोविधिवत्स्नात्वाकृत्वापौर्वाह्णिकीःक्रियाः॥४॥यायादलंकृतोमौनीयागार्थंयागमंडपं।
आचम्यविधिनातत्रसामान्यार्घंविधायच ५ द्वारमस्त्राम्बुभिःप्रोक्ष्यद्वारपूजांसमाचरेत्॥ऊर्द्धोदुंवरकेविघ्नंमहालक्ष्मींसरस्वतीं।
।द्यात्ततोदक्षिणशाखायांविघ्नंक्षेत्रेशमंततः।गतयोःपार्श्वगतेगंगायमुनेपुष्पवारिभिः ७ देहल्यामर्चयेदस्त्रंप्रतिद्वारमितिक्रमा
त् अनंतरंदेशिकेंद्रोदिव्यदृष्ट्यवलोकनात् ८।दिव्यान्तसारयेद्विघ्नानस्त्राद्भिश्चांतरिक्षगान्।पार्ष्णिघातैस्त्रिभिर्भौमान्नितिवि
घ्नान्निवारयेत्।९।किंचित्स्पृशन्वामशाखांदेहलींलंघयेद्गुरुः।अंगसंकोचयन्नंतःप्रविशेद्दक्षिणांघ्रिणा १० नैर्ऋत्यांदिशिवा
स्तोशानब्रह्माणंचसमर्चयेत्॥पंचगव्याघंतोयाभ्यांप्रोक्षयेद्यागमंडपं ११ चतुःपथान्तंतच्छुद्धिर्विदध्याद्वीक्षणादिना।वीक्षणं
मूलमंत्रेणशरेणप्रोक्षणंमतं।१२ तेनैवाताडनंदर्भैर्वर्मणाभ्युक्षणंमतं॥चंदनागरुकर्पूरैर्धूपयेदंतरंसुधीः १३॥विकिरान्वि
किरेत्तत्रसप्तजप्तान्छराणुना।लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षताः॥१४॥विकिराइतिसंदिष्टाःसर्वविघ्नौघनाशनाः॥
अस्त्रजप्तेनदर्भाणांमुष्टिनामार्जयेच्चतान्॥१५॥ईशस्यदिशिवर्द्धन्याआसनायप्रकल्पयेत्॥पुण्याहंवाचयित्वाथब्राह्मणा
न्परितोष्यच॥१६॥ उक्तेषुमंडलेष्वेकंवेदिकायांसमालिखेत् ॥ विशेन्मृद्वासनेमंत्रीप्राङ्मुखोवाप्युदङ्मुखः १७ ॥

शंउदग्दिशिपर्जन्यासनायस्थापयेत्॥वर्धनीनामअस्त्रदेवतामध्येपरतःपरितःवामदक्षिणतःयानिवामदक्षिणांतमेवभूतशुद्धिंप्रकारंदर्शयति॰॥

सुषुम्णोत्पादिना ॥ परमात्मनिद्वादशांते स्थिते चिन्मंत्रेण सोहमिति परमात्ममंत्रेणाकारणेन परमात्मनीति संबंधः ॥ व्युत्क्रमेणेति ॥ आकाशवाय्वग्निजलपृथि

बद्धपद्मासनो मौनी समाहितजितेंद्रियः ॥ स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि देशिकः । १९ । सुवासितांबुसंपूर्णं सव्ये कुंभं सुशोभनं
। प्रक्षालनाय करयोः पश्चात्पात्रं निवेशयेत् ॥ १९ ॥ घृतप्रज्वालितान्दीपान्स्थापयेत्परितः शुभान् । दर्पणं चामरं छत्रं तालवृंतं
मनोहरं । मंगलांकुरपात्राणि स्थापयेद्दिक्षु देशिकः । कृतांजलिपुटो भूत्वा वामदक्षिणपार्श्वयोः २१ नत्वा गुरुं गणेशानं भूतशु
द्धिं समाचरेत् । करशुद्धिं समासाद्य पश्चात्तालत्रयं ततः ॥ २२ ॥ ॐ ह्रीं हुं मस्त्रमंत्रेण दिग्बंधमपि देशिकः । तेन संजनिते तेजोरसांकु
यीत्स मंततः । २३ । सुषुम्णावर्त्मनात्मानं परमात्मनि योजयेत् ॥ योगयुक्तेन विधिना चिन्मंत्रेण समाहितः । २४ । कारणे सर्वभूतानां तत्त्वा
न्यपि च चिंतयेत् ॥ बीजभावेन लीनानि व्युत्क्रमात्परमात्मनि । २५ ॥ ततः संशोषयेद्देहं वायुबीजेन वायुना ॥ वह्निबीजेन तेनैव संदहे
त्सकलां तनुं २६ विश्लेषयेत्तदा दोषान् अमृतेनामृतांभसा ॥ आप्लाव्याप्लावयेद्देहमापादतलमस्तकं ॥ २७ ॥ आत्मलीनानि तत्त्वानि
स्वस्थानं प्रापयेत्तदा । आत्मानं हृदयांभोजमानयेत्परमात्मनः २८ मनुना हंसदेवस्य कुर्यान्न्यासादिकं ततः ऋषिश्छंदो देवता
निन्यसेन्मंत्रस्य मंत्रवित् ॥ १२९ आत्मनो मूर्ध्नि वदने हृदये च यथाक्रमात् । विधाय मूलमंत्रेण प्राणायामं यथाविधि ३० ॥ विदध्या
न्मातृकान्यासं मंत्रन्यासमनंतरं ॥ अंगुष्ठादिषडंगुलीषु न्यसेदंगैः सजातिभिः ॥ अस्त्रं तत्तलयोर्न्यस्य कुर्यात्तालत्रयादिकं ॥ दिश
स्तेनैव बध्नीयाच्छोटिकाभिः समाहितः ॥ ३२ ॥ हृदयादिषु विन्यस्येदंगमंत्रांस्ततः सुधीः । हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा ॥ शि
खायै वषडित्युक्तं कवचाय हुमीरितं ॥ नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात् ॥ ३४ ॥ षडंगमंत्रान्नित्यकान्षडंगेषु नियोजयेत् ॥

व्यादीनां व्युत्क्रमेण यथा ॥ पृथिवी जले जलमग्नौ इत्येवं प्रकारेण देहं शोषयेत् ॥ केन प्रकारेण नाभिमंडलसंस्थितवायुवायुबीजेन प्रकारेणोच्यते ॥ तेन वायुना दे

हंसेनाचिंतयामीत्यर्थः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेनैवेति॥ वह्निबीजेनेतियावत्॥ विशोषयेत्॥ अमृतेनामृतबीजेन वकारेण॥ मृतंभस्मावकारात्साचितंभस्माह्लादशांतस्थितपरमात्मनिलीनानि॥ तस्मादेवलीनजी
वात्मानंहंसदेवस्यजीवस्यहंस इतिमंत्रेण॥ जातिभिश्चतुर्थीविभक्तिभिः सहितैः स्फोटिकाभिःनाराचमुद्राभिः॥ सर्वत्रैवमेवषडंगानीत्याह॥ पंचांगानीतिखेनैव

पंचांगानिमनोर्यस्यतत्रनेत्रमनुत्यजेत्॥३५॥ अंगहीनस्यमंत्रस्यखेनैवांगानिकल्पयेत्॥ तत्तत्कल्पोक्तविधिनान्यासान्न्यासान्समा
चरेत्॥३६॥ कल्पयेदात्मनोदेहेपीठंधर्मादिभिःक्रमात्॥ अंसोरुयुग्मयोर्विद्वान्आदक्षिण्येनदेशिकः॥३७॥ धर्मंज्ञानंचवैराग्य
मैश्वर्यंन्यसतुक्रमात्॥ मुखपार्श्वेनाभिपार्श्वेऽधर्मादींश्चप्रकल्पयेत्॥३८॥ धर्मादयःस्मृताःपादाःपीठगात्राणिचापरे॥ अनं
तंहृदयेपद्ममस्मिन्सूर्येंदुपावकान्॥३९॥ एषुस्वस्वकलान्यस्येन्नामाद्यक्षरपूर्विकाः॥ सत्वादींस्त्रीन्गुणान्न्यसेत्तथैवात्रगुरू
न्मः॥४०॥ आत्मानमंतरात्मानंपरमात्मानमत्रतु॥ ज्ञानात्मानंप्रविन्यस्यन्यसेत्पीठमनुंततः॥४१॥ एवंदेहमयेपीठेचिंतयेदिष्ट
देवतां॥ मुद्राःप्रदर्श्यविधिवदर्घ्यस्थापनमाचरेत्॥४२॥ शंखमस्त्राम्बुनाप्रोक्ष्यवामतोवह्निमंडले॥ साधारंस्थापयेद्विद्वान्विंदु
च्युतसुधामयैः॥४३॥ तोयैःसुगंधिपुष्पाद्यैःपूरयेत्तंयथाविधि॥ आधारंपावकंशंखंसूर्यंतोयंसुधामयं॥४४॥ स्मरेद्दशार्कचं
द्राणांकलास्तास्तेषुतुक्रमात्॥ मूलमंत्रंजपेत्तस्मिन्न्यसेत्तस्यांगमंगवित्॥४५॥ हन्मंत्रेणाभिसंपूज्यहस्ताभ्यांछादयन्नपः॥
जपेद्दिव्यांपयान्यांपदेशिकोदेवताधिया॥४६॥ अस्त्रमंत्रेणसंरक्ष्यकवचेनावगुंठ्यच॥ धेनुमुद्रांसमासाद्यरोधयेन्मत्स्यमुद्र
या॥४७॥ दक्षिणेप्रोक्षणीपात्रमाधायाद्भिःप्रपूरयेत्॥ किंचिदर्घांबुसंगृह्यप्रोक्षण्यंभसियोजयेत्॥४८॥ अर्घस्योत्तरतःकार्यपा
द्यंसाचमनीयकं॥ आत्मानंपागवस्तूनिमंडलंप्रोक्षयेद्गुरुः॥४९॥ प्रोक्षणीपात्रतोयेनमनुनान्यदपिक्रमात्॥ १ तेनैवमंत्रेणेति॥ इत्याद्वि

विधा॥ आंतरीबाह्याच॥ तत्राभ्यंतरपूजाप्रकारमाह॥ कल्पयेदित्यादिना॥ एषुसूर्यादिषुपीठमंत्रंयोगपीठात्मनेनमःइतिमनुमत्रतत्रप्रतिपदोक्तंग्रहणंमुद्राः
आसनादिमुद्राःकलाःअकारउकारमकाराः॥ शंखस्यशन्॥ मूलमष्टवारंजपेत्॥ तस्यांगमूलमंत्रस्यषडंगंतस्मिन्जलेन्यसेत् ॥ ॥ ० ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

न्यासक्रमेणादेहे स्वे धर्मादीन्पूजयेत्ततः॥५०॥ पाद्याद्यैः पीठमन्वंते तस्मिंश्च परदेवतां॥ पंचकृत्वः पुनः कुर्यात्पुष्पांजलिमनन्यधीः ५१ आ
मं गं हृदाधारपादसर्वांगके क्रमात्॥ विनानिवेद्यं गंधाद्यैरुपचारैः समर्चयेत्॥५२॥ गुरूपदिष्टविधिना शेषमन्यत्समाचरेत्। सर्वमेत
त्प्रयुंजीत प्रोक्षणीस्थेन वारिणा॥५३॥ विसृज्य तोयं प्रोक्षण्याः पूरयेत्तां यथा पुरा॥ ततस्तन्मंडले मंत्री गंधाद्यैः साधु पूजयेत्।५४॥ शालिभिः
कर्णिकामध्यमापूर्य परितंडुलैः॥ अलंकृत्य पुनस्तेषु दर्भान्नास्तीर्य तत्र वित्॥५५॥ कूर्चमक्षतसंयुक्तं न्यसेत्तेषामथोपरि॥ आधारशक्तिमा
रभ्य पीठमंत्रमयं यजेत्॥५६॥ अधः कूर्मशिलारूढां शरच्चंद्रनिभप्रभां॥ आधारशक्तिं प्रयजेत्पंकजद्वयधारिणीं।५७ मूर्ध्नि तस्यां समा
रूढं कूर्मं नीलाभमर्चयेत्॥ ऊर्द्ध्वं ब्रह्मशिलासीनमनंतं कुंदसन्निभं॥५८॥ यजेच्चक्रधरं मूर्ध्नि धारयंतं वसुंधरां॥ तमालश्यामलां तत्र
नीलेंदीवरधारिणीं॥५९॥ अभ्यर्च्चयेद्वसुमतीं स्फुरत्सागरमेखलां॥ तस्यां रत्नमयं द्वीपं तस्मिंश्च मणिमंडपं॥६०॥ यजेत्कल्पतरुं तस्याः साध
काभीष्टसिद्धिदान्॥ अधस्तात्पूजयेत्तेषां वेदिकां मंडपोज्ज्वलां॥ ६१ पश्चादभ्यर्चयेत्तस्यां पीठं धर्मादिभिः पुनः॥ रक्तश्यामहरिद्रेंद्रनीलाभा
न्यादरूपिणः॥६२॥ वृषकेसरिभूतेभरूपान्धर्मादिकान्यजेत्॥ गात्रेषु पूजयेत्तांस्तु नञ्पूर्वानुक्तलक्षणान्।६३॥ आग्नेयादिषु कोणेषु दि
क्षु चाद्यां वजं यजेत्॥ आनंदकंदं प्रथमं संविन्नालमनंतरं॥६४॥ सर्वतत्वात्मकं पद्मं समाभ्यर्च्य तदनंतरं॥ मंत्री प्रकृतिपत्राणि विकारमयके
सरान्॥६५॥ पंचाशद्बीजवर्णाढ्यां कर्णिकां पूजयेत्ततः॥ कलाभिः पूजयेत्सार्द्धं तस्यां सूर्येंदुपावकान्॥६६॥ प्रणवस्य त्रिभिर्भागैरथ
सत्वादिकान्गुणान्॥ आत्मानमंतरात्मानं परमात्मानमर्चयेत्॥६७॥ ज्ञानात्मानं च विधिवत्पीठमंत्रावसानकं॥ पीठशक्तीः केसरेषु
मध्ये च सवराभयाः॥६८॥ हेमाद्रिरचितं कुंभमस्त्राद्भिः क्षालितांतरं॥ चंदनागुरुकर्पूरधूपितं शोभनाकृतिं॥६९॥ आवेष्टितांगनीरंध्रं तं
तुना त्रिगुणात्मना॥ अर्चितं धूपपुष्पाद्यैः कूर्चाक्षतसमन्वितं॥७०॥ नवरत्नोदरं मंत्री स्थापयेत्तारमुच्चरन्॥ ऐक्यं संकल्प्य कुंभस्य पीठस्य च विधि

क्षीरद्रुमकषायेण पल्लवाशत्वगम्भवेन वा ॥ तीर्थोदकैर्वा कर्पूरगंधपुष्पसुवासितैः ॥ ७२ ॥ आत्माभेदेन विधिवन्मातृकां प्रतिलोमतः । जपन्मू-
लमंत्रं तद्रूपं पूरयेद्देवताधिया ॥ ७३ ॥ शंखे कार्यां तु संपूर्णां गंधाष्टकमथो घटं विलोड्य पूजयेत्तस्मिन्नावाह्य सकलाः कलाः ॥ ७४ ॥ दश
वह्नेः कला पूर्वं द्वादश द्वादशात्मनः ॥ कलाः षोडश सोमस्य पश्चात्पंचाशतं कलाः ॥ ७५ ॥ जपित्वा प्रतिलोमेन मूलमंत्रं च पंचवित् । समा-
हितेन मनसा ध्यायन्मंत्रस्य देवतां ॥ ७६ ॥ प्राणप्रतिष्ठां कुर्वीत तत्र मंत्रविचक्षणः ॥ कलात्मकं शंखसंस्थं कार्यं कुंभे विनिक्षिपेत् ॥ ७७ ॥ गंधा-
ष्टकं तु त्रिविधं शक्तिविष्णुशिवात्मकं ॥ चंदनागरुकर्पूरचोरकुंकुमरोचनाः ॥ ७८ ॥ जटामांसीकपियुता शक्तेर्गंधाष्टकं विदुः ॥ चंदनागु-
रुह्रीवेरकुष्ठकुंकुमसेव्यकाः ॥ ७९ ॥ जटामांसीमुरमिति विष्णोर्गंधाष्टकं विदुः ॥ चंदनागुरुकर्पूरतमालजलकुंकुमं ॥ ८० ॥ कुशीतं कुष्ठसं-
युक्तं शैवं गंधाष्टकं विदुः ॥ पाशादित्र्यक्षरात्मान्ते स्यादमुष्य पदं ततः ॥ ८१ ॥ क्रमात्प्राणा इह प्राणास्तथा जीव इह स्थितः ॥ अमुष्य सर्वे-
न्द्रियाणि भूयोऽमुष्य पदं भवेत् ॥ ८२ ॥ वाङ्मनोनयनश्रोत्रघ्राणप्राणपदान्यथ । पश्चादिहागत्य सुखं चिरं तिष्ठंतु ठद्वयं ॥ ८३ ॥ अयं प्राण-
मनुः प्रोक्तः सर्वजीवप्रदायकः ॥ पश्चादश्वत्थपनसचूतकोमलपल्लवैः ८४ ॥ इंद्रवल्लीसमावृद्धैः सुरद्रुमधिया गुरुः ॥ कुंभवक्त्रे पि-
धायास्मिन्स्वर्पकं सफलीकृतं ॥ ८५ ॥ संस्थापयेत्फलधिया विधिवत्कल्पशाखिनां ॥ ततः कुंभं निर्मलेन क्षौमयुग्मेन वेष्टयेत् ॥ ८६ ॥ मूलेन
मूर्तिमिष्ट्वास्मिन्छायायां कल्पशाखिनां ॥ आवाह्य पूजयेत्तस्यां मंत्री मंत्रस्य देवतां ॥ ८७ ॥ मूलमंत्रं समुच्चार्य सुषुम्णा वर्त्मना सुधीः ।
आनीय तेजः स्वस्थानान्नासिकारंध्रनिर्गतं ॥ ८८ ॥ करस्थमातृकांभोजे चैतन्यं पुष्पसंचये ॥ संयोज्य तत्र ह्लीं रंध्रेण मूर्त्यामावाहयेत्सु-
धीः ॥ ८९ ॥ संस्थापनं सन्निधानं सन्निरोधमनंतरं ॥ सकलीकरणं पश्चाद्धृद्ध्यादवगुंठनं ॥ ९० ॥ अमृतीकरणं कृत्वा कुर्वीत परमाकृतिं ॥
क्रमादेतानि कुर्वीत स्वमुद्राभिः समाहितः ॥ ९१ ॥ अथोपचारान्कुर्वीत मंत्रवित्स्वागतादिना ॥ स्वागतं कुशलप्रश्नं निगदेदग्रतो गुरुः ९२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यथान्यायं समाहितचित्तः। न्यासक्रमेणास्वे देहे धर्मादिपीठस्थानेषु कल्पितेषु तस्मिन् पीठे पूजयेत्॥ इति संबंधः। तमेव पूजाप्रकारं दर्शयति पंचकृत्वेत्यादिना
गुरुः परिष्टविधिना शेषमिति। न्यासध्यानादिकमित्यर्थः। साधुः अव्यग्रचित्तं मंडलकर्णिकामध्ये कलशपूजां यथावद्वक्तुमारभते॥ शालिभिरित्यादिना तेषु तंडुले
षु कूर्चमयग्रंथितेषु पूर्वोक्ततंडुलदर्भकूर्चादीनां मंत्रमंपधर्माय नमः॥ इत्यारभ्य वह्निमंडलाय नमः इत्यंतपर्यंतमित्यर्थः। अथ कूर्मशिलेत्यारभ्य हेमादिरचितमि
त्यंतः प्राक्तनोग्रंथः स्पष्टः त्रिगुणात्मना सत्वादित्रिगुणात्मना॥ तद्वन्मूलमंत्रं प्रतिलोमेनेत्यादिना॥ द्वादशात्मनः सूर्यस्य मूलमंत्रं वा प्रतिलोमेन पूजयित्वा आ
वाहयेदिति गतेन संबंधः। तत्र तत्रेति। प्रत्येकं चतुर्नवतिमंत्राणीत्यर्थः॥ त्रिविधं गंधाष्टकं यथाक्रमं दर्शयति॥ चंदनेत्यादिना चोरः कर्चूरः। कपिस्तान्वि दं न

पाद्यं पादांबुजे दद्याद्देवस्य हृदयाणुना॥ एतच्छ्यामाकदूर्वाब्जविष्णुक्रांताभिरीरितं ९३॥ सुधामंत्रेण वदने दद्यादाचमनीयकं।
जातीलवंगकंकोलैस्तदुक्तं तंत्रवेदिभिः॥९४॥ अर्घं दिशेत्ततो मूर्ध्नि शिरोमंत्रेण देशिकः॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपैः
॥९५॥ सदूर्वैः सर्वदेवानामेतदर्घ्यमुदीरितं॥ सुधाणुना ततः कुर्यान्मधुपर्कं मुखांबुजे॥ ९६॥ आज्यं दधि मधून्मिश्रमेतदुक्तं म
नीषिणा॥ तेनैव मनुना कुर्याद्द्विराचमनीयकं॥९७॥ गंधाद्भिः कारयेत्स्नानं वाससी परिधापयेत्॥ दद्याद्दिव्योपवीतं च हाराद्याभ
रणैः सह॥९८॥ न्यासक्रमेण मनुना प्रदिते मातृकाक्षरैः॥ अभ्यर्च्य देवं गंधाद्यै रंगादीन्पूजयेत्ततः ९९। गंधश्चंदनकर्पूरकालागुरु
भिरीरितः॥ कमले करवीरे हृत्कुमुदे तुलसीद्वयम्॥१००॥ ११ ह्रीबेरं कर्चूरं। जलं सुगंधि शिशिफाविशेषः। अथ भाषायां कुडवेड सेव्यकमपि स एवा

प्राणप्रतिष्ठामंत्रमुद्धरति पाशादीत्यादिना पाशं आं ह्रीं क्रों एतत्त्र्यक्षरं शेषं सुगमं। इंद्रवल्ली अथ भाषायां। पापकान्यकुब्जभाषायां इंद्राज्ञम् अस्मिन् सुरद्रुमोक
त्पणशिशिमित्यथियेनि संबंधः। कलशमूर्ध्नि मूलमंत्रेणावेष्टयेदित्यर्थः॥ अस्मिन् कलशे मंत्रदेवतामावाह्य पूजयेदित्यर्थः। तमेव पूजाप्रकारं यथावद्वक्तु
मारभते। मूलमंत्रं समुच्चार्येत्यादिना। आनीयेत्ययमर्थः। स्वस्थानात् हृत्पद्मकमलात् प्राणमनासिकारंध्रनिर्गतं तेजः आनीय निजकलेवरे स्वशिरोमातृकापद्मसं
चिंत्य तत्रस्थपुष्पनिचये तं चैतन्यसंयुक्तं संचिंत्य कलशमध्ये देवतामूर्त्तिमनुसंस्मृत्य तस्य शिरसि पद्मरंध्रस्थाने संयोज्य देवतामावाहयामीत्यावाहयेत्॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सुधीः मंत्रयंत्रनिपुण इत्यर्थः ॥ सकलीकरणं न्यास इत्यर्थः ॥ परमीकरणं उत्तरो ग्रंथः स्पष्टः ॥ सुधामग्नो वकारः ॥ तदाचमनं एतदुक्तं मधुपर्कं प्रत्युपचारं मातृकास्र

जातीहृद्यं केतकीद्वे कह्लारं चंपकोत्पले ॥ कुंदमंदारपुन्नागपाटलानागचंपकं १०१ ॥ आरग्वधं कर्णिकारं पारंती नवमालिका ॥ सौगंधिकं सकोरंटं पालाशाशोकमल्लिकाः ॥ १०२ ॥ धत्तूरं सर्जकं बिल्वमर्जुनं मुनिपत्रकं ॥ अन्यान्यपि सुगंधीनि यत्र पुष्पाणि देशिकैः ॥ १०३ ॥ उपदिष्टानि पूजायामाहृतानि विचक्षणाः ॥ मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितं ॥ १०४ ॥ अंगस्पृष्टं समाघ्रातं त्यजेत्पर्युषितं गुरुः ॥ देवस्य मस्तकं कुर्यात्कुसुमोपहितं सदा ॥ १०५ ॥ पूजाकाले देवताया नोपरि भ्रामयेत्करं ॥ अगरुश्रीरसगुग्गुलुशर्करामधुचंदनैः ॥ १०६ धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकैः ॥ वर्त्या कर्पूरगर्भिण्या सर्पिषा तिलजेन वा १०७ ॥ आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः ॥ स्वादूपदंशं विमलं पायसं सहशर्करं ॥ १०८ ॥ कदलीफलसंयुक्तं साज्यं मंत्री निवेदयेत् ॥ तत्रैतच्च जलं दद्यादुपचारांतरांतरं ॥ १०९ ॥ अंगादिलोकपालांतं यजेदावरणान्यपि ॥ केसरेष्वग्निकोणादि हृदयादीनि पूजयेत् ११० नेत्रमग्रे दिशास्वस्त्रं ध्यातव्या अंगदेवताः ॥ तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ॥ १११ ॥ वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥ पश्चादभ्यर्चनीयास्युः कल्पोक्ताश्शक्तयः क्रमात् ॥ ११२ ॥ अंते यजेल्लोकपालान्मूलपार्षदान्वितान् ॥ हेतिजात्यधिपोपेतान्दिक्षु पूर्वादितः क्रमात् ॥ ११३ ॥ इंद्रमग्निं यमं रक्षोवरुणं मरुतं विधुं ॥ ईशानं पन्नगाधीशमधऊर्ध्वं पितामहं ॥ ११४ ॥ पीतो रक्तः सितो धूम्रः शुक्लो धूम्रः सिताबभौ ॥ गौरोरुणाः क्रमादेते वर्णाः परिकीर्तिताः ॥ ११५ ॥ वज्रं शक्तिं दंडमसिं पाशमंकुशकं गदां ॥ शूलं चक्रं पद्ममेषामायुधानि क्रमाद्विदुः ११६ ॥ पीतशुक्लसिताकाशविद्युद्रक्तासितासिताः ॥ कुरविंदपाटलाभा वज्राद्याः परिकीर्तिताः ॥ ११७ ॥ एवं संपूज्य विधिवन्निवेद्यांतं ततो गुरुः ॥

रपुरितेन मूलमंत्रेण कुर्यात् ॥ कथं मातृकाक्षरमुच्चार्य मूलमंत्रमुच्चरेत् ॥ पुनः मातृकाक्षरं अन्यान्यपीत्यारभ्य प्राक्तनो ग्रंथः स्पष्टार्थः ॥ वैश्वदेवप्रकारं यथा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दक्षिणोस्थंडिलेत्यादिना। विश्ववत्त्वासौ देवश्चेति विश्वदेवः। विश्वदेव एव वैश्वदेवः। प्रधानदेवः तत्संबंधि वैश्वदेवहोमः प्रधानदेवताहोम इत्यर्थः। तां सहा
वाहितदेवताः पीठस्थदेवतां संयोज्य एकीकृत्य परितः चतुर्दिक्षु गंधतोयान्वितं बलिं विकिरेदिति स्पष्टार्थम्। अपरं। पूर्वसंचितान् दर्भमुष्टीन् वर्तुलीकृत्य पूर्वसं

दक्षिणोस्थंडिलं कृत्वा तत्राधाय हुताशनं ॥११८॥ संस्कृत्य विधिवद्विद्वान्वैश्वदेवं समाचरेत् ॥ तत्र संपूज्य गंधाद्यैर्देवतामुक्तविग्र
हां ॥११९॥ तां व्याहृतिभिर्हुत्वा मूलमंत्रेण मंत्रवित् ॥ सर्पिष्मता पायसेन पंचविंशतिसंख्यया ॥१२०॥ हुत्वा व्याहृतिभिर्भूयो गंधाद्यैः
पुनरर्चयेत् ॥ तां योजयित्वा पीठस्थमूर्तौ वह्निं विसर्जयेत् ॥१२१॥ अवशिष्टेन हविषा विकिरेत्परितो बलिं ॥ देवतायाः पार्श्वदेभ्यो
गंधपुष्पाक्षतान्वितम् ॥१२२॥ ततो निवेद्यमुद्धृत्य शोधयित्वा स्थलं पुनः ॥ पंचोपचारैः संपूज्य दर्शयेच्छत्रचामरे ॥ १२३ ॥
कर्पूरशकलोन्मिश्रं तांबूलं च निवेदयेत् ॥ सहस्रावृत्य संजप्य मूलमंत्रमनन्यधीः ॥ १२४ ॥ तज्जपं सर्वसंपत्त्यै देवतायै निवेद
येत् ॥ ततः शंभोर्दिशि गुरुर्विकिरे पूर्वसंचिते ॥ १२४ ॥ हेमवस्त्रादिसंयुक्तां कर्करीं तोयपूरितां ॥ संस्थाप्य तस्यां सिंहस्थां
खड्गखेटकधारिणीं ॥१२६॥ घोररूपां पश्चिमास्यां पूजयेदस्त्रदेवतां ॥ चलासनेन संपूज्य तामादाय गुरुः पुनः ॥१२७ रक्षेति
लोकपालानां नालमुक्तेन वारिणा ॥ देवाज्ञां श्रावयन्नंतः परिवृत्य प्रदक्षिणं ॥१२८॥ अस्त्रमंत्रं समुच्चार्य यथापूर्वं निवेशये
त् ॥ अभ्यर्च्य भूयो गंधाद्यैरस्त्रं तत्र स्थिरासने ॥१२९॥ ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् ॥ ९९

चितानासनासनत्वेन विनिक्षिपे
षु विकिरेषु शंभोर्दिशि ईशान्यां उत्तालक्षणान् करकान् संस्थाप्य तस्यां पश्चिमाभिमुखीमुक्तरूपिणीं। अत्र मंत्र देवतां चलासनेन निधाय अन्ते च स्थाने कृत्य कर
कान् निवेशयेत्। ततो पविश्य तामस्त्रदेवतां पुनरपि गंधाद्यैरर्चयेत्। पुनरपि स्थंडिले ग्निमाधाय संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् कथं पचेदिति आह।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अस्त्रेणेत्यादिना। त्रिधाकल्पितं। एकभागं देवतायै नमः॥ इति प्रधानदेवतायै समर्प्य। अन्यं अग्नये स्वाहा इत्यग्नौ हुत्वा। शिष्टमाचार्यः स्वयं शिष्येण सह प्राश्नीयात्॥ ततः आचमनानंतरं शिष्यं सकलीकृत्य न्यासं कृत्वा उक्तलक्षणं दंतकाष्ठं शिष्याय दद्यात् सोऽपि तत्प्रक्षाल्य विसर्जयेत्। यथाविधि। तमाचांतं शिखाबंध

अस्त्रेणाक्षालिते पात्रे नवे ताम्रमयादिके॥१३०॥ तंडुलान् शालिसंभूतान् मूलमंत्राभिमंत्रितान्॥ प्रसृतीनां पंचदश क्षिप्त्वा चास्त्रमनुं जपेत्॥१३१॥ प्रक्षाल्य पात्रवदनं पिधाय कवचाणुना॥ प्राङ्मुखो मूलमंत्रेण देशिकेंद्रश्चरुं पचेत्॥१३२॥ स्रुवेणाज्येन संसिक्तं नेत्रेण चाभिघारणं॥ मूलेन पश्चात्तत्पात्रं कवचेनावतारयेत्॥१३३॥ अस्त्रजप्ते कुशास्तीर्णे मंडले विधिवद्गुरुः॥ तं विभज्य त्रिधा भागमेकं देवाय कल्पयेत्॥१३४॥ अन्यमग्नौ प्रजुहुयादपरं देशिकः स्वयं॥ शिष्येण सार्द्धं भुंजीत विहिताचमनस्ततः॥१३५॥ आचांतं शिष्यमानीय सकलीकृत्य देशिकः॥ तालप्रमाणं हृज्जप्तं क्षीरवृक्षादिसंभवं॥१३६॥ दंतकाष्ठं तदा दद्यात् क्षिप्रापनिपतात्मने॥ दंतान् विशोध्य सुधनस्तत्प्रक्षाल्य विसर्जयेत्॥ यथाविधि तमाचांतं शिखाबंधाभिरक्षितम्॥ विधाय सार्द्धं मनुनावेद्यां दर्भास्तरे गुरुः॥१३८॥ शयीत तस्यां तां रात्रिमधिवासः समीरितः॥ इति शारदातिलके चतुर्थः पटलः॥ ततोऽग्निजननं वक्ष्ये सर्वतंत्रानुसारतः॥ आचार्यः कुंडे विधिवत्संस्कृते शास्त्रवर्त्मना॥१॥ अष्टादशसु संस्काराः कुंडानां तत्र चोदिताः॥ वीक्षणं मूलमंत्रेण शरेण प्रोक्षणं मतं॥२॥ तेनैव ताडनं दर्भैर्वर्मणाभ्युक्षणं स्मृतं॥ अस्त्रेण खननोद्धारौ हृन्मंत्रेण प्रपूरणम्॥३॥ समीकरणमस्त्रेण सेचनं वर्मणा मतं॥ कुट्टनं हेतिमंत्रेण वर्ममंत्रेण मार्जनं ४ विलेपनं कलारूपकल्पनं तदनंतरं त्रिसूत्रीकरणं पश्चाद्धृदयेनार्चनं मतं॥५॥ अस्त्रेण वज्रीकरणं हृन्मंत्रेण कुशैः शुभैः॥ चतुःपथतनुत्रेण तत्र यद्दक्षपाटनं॥ ६॥ ॥

नेन रक्षितं आनीय मनुना सार्द्धं वेद्यां कुंडस्य पश्चिमभागे दर्भानास्तीर्य तत्र तस्यां रात्रौ शयीत। गुरुः शिष्येण सह अधिवासः स विज्ञेयः॥ इति गूढार्थदीपिका

अथ होमप्रकारं वक्तुं पञ्चमः पटलः आरभ्यते। ततोऽग्निजननमित्यादिना॥ कुंडसंस्कारान्दर्शयति। अष्टादशेति क्रव्यादेभ्यो नम इति॥ एकमंगारकं त्यजेत्॥
जिह्वामन्त्रानुद्धरति। वह्निरिति वह्निबीजं रेफः। इरा वायुबीजं यकारः। अर्घीशः ऊकारः। एतैः संयुक्ताः सादियान्ताः सविंदवो वर्णाः जिह्वामन्त्राः स्रूं य्रूं स्रूं

यागे कुंडानि संस्कुर्यात् संस्कारैरेभिरीरितैः॥ अथवा तानि संस्कुर्याच्चतुर्भिर्वीक्षणादिभिः॥७॥ तिस्रस्तिस्रो लिखेल्लेखा हृदा प्रागुद
गग्रगाः॥ प्रागग्रा याः स्मृता देवा मुकुंदेशपुरंदराः॥८॥ रेखाणामुदगग्राणां ब्रह्मवैवस्वतेन्दवः॥ अथवा षट्कोणावृतं त्रिकोणं तत्र
संलिखेत् ९॥ वर्मणाभ्युक्षयेत्तारेणायोगपीठमथार्चयेत्॥ वागीश्वरीमृतुस्नातां नीलेन्दीवरसन्निभां॥१०॥ वागीश्वरेण संयुक्तामुप
चारैः प्रपूजयेत्॥ सूर्यकान्तादिसंभूतं यद्वा श्रोत्रियगेहजं॥११॥ आनीय वह्निं पात्रेण क्रव्यादांशं परित्यजेत्॥ संस्कुर्यात्तं यथान्या
यं देशिको वीक्षणादिभिः॥१२॥ औदर्यं वैन्दवाग्निभ्यां भौमस्यैक्यं स्मरन्वसोः॥ योजयेद्वह्निबीजेन चैतन्यं पावके ततः॥ तारेणामं
त्रितं मन्त्री धेनुमुद्रामृतीकृतं॥ अस्त्रेण रक्षितं पश्चात्तनुत्रेणावगुण्ठितं॥१४॥ अर्चितं त्रिः परिभ्राम्य कुंडस्योपरि देशिकः॥ प्रदक्षि
णं तदा तारमन्त्रोच्चारणपूर्वकं॥१५॥ आत्मनोऽभिमुखं वह्निं जानुस्पृष्टमहीतलः॥ शिवबीजधिया देव्या योनौ वै विनिक्षिपेत्॥१६
पश्चाद्देवस्य देव्याश्च दद्यादाचमनीयकं॥ ज्वालयेन्मन्त्रनानेन तमग्निमथ देशिकः॥१७॥ चित्पिंगलहनदहपचयुग्मान्युदीर्य च।
सर्वज्ञाज्ञापय स्वाहा मन्त्रोऽयं प्रागुदीरितः॥१८॥ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं॥ सुवर्णवर्णममलं समिद्धं विश्वतोमुखं॥ ॥१९॥ हीर
उपतिष्ठेत विधिवन्मन्त्रनानेन पावकं॥ विन्यसेदात्मनो देहे मन्त्रैर्जिह्वाह्वयैर्भुजः २०॥ लिंगपायुशिरोवक्त्रघ्राणनेत्रेषु सर्वतः॥ व
ह्नीरार्घीशसंयुक्ताः सादियान्ताः सविंदवः॥२१॥ वर्णमन्त्राः समुद्दिष्टा जिह्वानां सप्त देशिकैः जिह्वास्तास्त्रिविधाः प्रोक्ताः गुणभेदेन क

क्रूं ल्रूं त्रूं य्रूं ७॥ एते प्रत्येकं क्रमेण जिह्वामन्त्रा इति। सात्त्विकराजसतामसभेदेन यथाक्रमं जिह्वानां विध्यमाह॥ जिह्वा इति॥ क्रमेणानासामधिदेवताः प्रदर्श्यन्ते॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अमर्त्येत्यादिना॥ उत्तरोग्रंथः स्पष्टार्थः॥ तद्गर्भाग्रमध्यमूलानि आज्यसंस्कारांश्चकमारभते॥ निहत्येत्यादिना नीरुत्य उधृत्य वह्नेर्गर्भाधानादि षोडशसंस्का

हिरण्या गगना रक्ता कृष्णान्या सुप्रभा मता॥ बहुरूपातिरक्ता च सप्तजिह्वा यागकर्मसु॥ २३॥ पद्मरागा सुवर्णान्या तृतीया भद्रलोचो
हिता॥ लोहितानंतरं श्वेता धूमिनी च करालिका॥ २४॥ राजस्यो रसना वह्नेर्विहिताः काम्यकर्मसु॥ विश्वमूर्तिस्फुलिंगिन्यौ धूम्रवर्णा
मनोजवा॥ २५॥ लोहितान्या करालाख्या काली तामस्य ईरिताः॥ एताः सप्त नियुज्यंते क्रूरकर्मसु मंत्रिभिः॥ २६॥ स्वस्वनामसमाभाः
स्युर्जिह्वाः कल्पा रारेतसः॥ अमर्त्यपितृगंधर्वयक्षनागपिशाचकाः॥ २७॥ राक्षसाः सप्तजिह्वानामीरिता अधिदेवताः॥ वह्नेरंगं
मनून्यस्येत नाभ्युक्तेन वर्त्मना॥ २८॥ सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषः पुनः॥ धूमव्यापी सप्तजिह्वो धनुर्धर इति क्रमात्॥ २९॥
षडंगं नवमः प्रोक्ता जातिभिः सह संयुताः॥ मूर्तीरष्टौ तनौ न्यस्येद्देशिको जातवेदसः॥ ३०॥ मूर्द्धांसपार्श्वकट्यंधु कटिपार्श्वांसकेपुनः
प्रदक्षिणावशान्न्यस्येदुच्यंते ताः यथाक्रमात्॥ ३१॥ जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः॥ अश्वोदरजसंज्ञोन्यः पुनर्वैश्वान
राह्वयः॥ ३२॥ कौमारतेजास्याद्विश्वमुखो देवमुखः स्मृतः॥ तारोग्रये पदाद्याः स्युर्नत्यंता वह्निमूर्तयः॥ ३३॥ आसनं कल्पयित्वा
ग्रे मूर्तिं तस्य विचिंतयेत्॥ इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दधद्दोर्भिर्धारयंतं जपाभं॥ ३४॥ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं ब
द्धमौलिं जटाभिः॥ परिषिंचेत्ततस्तोयैर्विशुद्धैर्मेखलोपरि॥ ३५॥ दर्भैरग्रगर्भैर्मध्यस्य मेखलायां परिस्तरेत्॥ निक्षिपेद्दिक्षु परिधीन्
प्राचीवर्जं गुरूत्तमः॥ ३६॥ प्राग्दक्षिणे वेन संपूज्यास्ते षु ब्रह्मादिमूर्तयः॥ ध्यातं वह्निं यजेन्मध्ये गंधाद्यैर्मंत्रनामुना॥ ३७॥
रा॰ क्रमेणाकथ्यंते

२३।२४।२५।२६।२७।२८।२९।३०।३१।३२।३३।३४। ३५।३६।३७।३८।३९। ४०।४१। ४२।४३।४४।४५।४६।४७। ४८।४९।५०।५१।५२।५३।५४।५५।५६।५७।५८।५९

वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय ॥ ३९ ॥ वह्निजायावधिः प्रोक्तो मंत्रः पावकवल्लभः ॥ मध्ये
षट्स्वपि कोणेषु जिह्वाज्वाला रुचौ यजेत् ॥ ३९ ॥ केसरेषु ततो मार्गेण पूजयेदंगदेवताः ॥ दलेषु पूजयेन्मूर्तीः शक्तिस्वस्तिकधारिणीः ४०
दलाग्रे मातरः पूज्याः सासितांगादिभैरवाः ॥ लोकपालांस्ततो दिक्षु पूजयेदुक्तलक्षणान् ॥ ४१ ॥ पश्चादादाय पाणिभ्यां स्रुक्स्रुवौ तावधोमु
खौ ॥ त्रिः संप्रतापयेद्वह्नौ दर्भानादाय देशिकः ॥ ४२ ॥ तदग्रमध्यमूलानि शोधयेत्तैर्यथाक्रमात् ॥ गृहीत्वा वामहस्तेन प्रोक्षयेद्दक्षिणेन तौ ॥
पुनः प्रताप्य तौ मंत्री दर्भानग्नौ विनिःक्षिपेत् ॥ आत्मनो दक्षिणे भागे स्थापयेत्तौ कुशान्तरे ॥ ४४ ॥ आज्यस्थालीमथादाय प्रोक्षयेदस्त्रवारिणा ।
तस्यामाज्यं विनिक्षिप्य संस्कृतं वीक्षणादिभिः ॥ ४५ ॥ निरुत्य वायव्येंगारान् हृदा तेषु निवेशयेत् ॥ रक्षं तापन मद्विष्टं देशिके मंत्रवेदिभिः ४६
संदीप्य दर्भयुगलमाज्ये क्षिप्त्वानले क्षिपेत् ॥ गरुर्हृदयमंत्रेण पवित्रीकरणं त्विदं ॥ दीप्तेन दर्भयुग्मेन नीराज्याज्यं स्ववर्मणा ॥ अग्नौ विसर्ज
येद्दर्भमभिद्योतनमीरितं ॥ ४८ ॥ घृते प्रज्वलितान्दर्भान् प्रदर्श्यास्त्राणुना गुरुः ॥ जातवेदसि तान्यस्येदुद्योतनमिदं मतं ॥ ४९ ॥ गृहीत्वा घृ
तमंगारान् प्रत्यूत्याग्नौ जलं स्पृशेत् ॥ अंगुष्ठोपकनिष्ठाभ्यां दर्भौ प्रादेशसंमितौ ॥ ५० ॥ धृत्वोत्पुनीयाद्दस्त्रेण घृतमुत्पवनं त्विदं ॥ तद्वद्धृदय
मंत्रेण कुशाभ्यामात्मसंमुखं ॥ ५१ ॥ घृते संप्लवनं कुर्युः संस्काराः षडुदीरिताः ॥ प्रादेशमात्रं संग्रंथिदर्भयुग्मं घृतांतरे ॥ ५२ ॥ निःक्षिप्य भागौ द्वौ
कृत्वा पक्षौ शुक्लेतरौ स्मरेत् ॥ वामे नाडीमिडां भागे दक्षिणे पिंगलां पुनः ॥ ५३ ॥ सुषुम्णां मध्यतो ध्यायेत्कुर्याद्धोमं यथाविधि ॥ स्रुवेण दक्षिणाद्भा
गादादायाज्यं हृदा गुरुः ॥ ५४ ॥ जुहुयादग्नये स्वाहेत्यग्रे दक्षिणलोचने ॥ वामतस्तद्वदादाय वामे वह्निविलोचने ॥ ५५ ॥ जुहुयादथ सोमाय स्वा
हेति हृदयाणुना । मध्यादाज्यं समादाय वह्नेर्भाल विलोचने ॥ ५६ ॥ जुहुयादग्निषोमाभ्यां स्वाहेति हृदयाणुना ॥ हृन्मंत्रेण स्रुवेणाज्यं भागाद्दा
दाप दक्षिणात् ॥ ५७ ॥ जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मुखे ॥ इति संपातयेद्भागे षाज्यस्याथ्याहुतिं क्रमात् ५८ इत्यग्निनेत्रवक्त्राणां कुर्यादुद्घा ॥ शा॰ ति॰

गर्भाधानेत्यादि। तस्य पितरौ वह्नेः। पितरौ पार्वतीपरमेश्वरौ॥६६॥ विघ्नेश्वरस्य मंत्रेण महागणपतिमंत्रेण दशधा विभक्तेन कुर्यात्। कथं एकाहुतिः एवं

संताराभिर्व्याहृतिभी राज्येन जुहुयात्पुनः॥५९॥ जुहुयादग्निमंत्रेण त्रिवारं देशिकोत्तमः॥ गर्भाधानादिका वह्नेः क्रिया निर्वर्तयेत्क्रमा
त्। अष्टाभिराज्याहुतिभिः प्रणवेन पृथक्पृथक्॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं पुनः॥ अनंतरं जातकर्म स्यान्नामकरणं तथा॥
उपनिःक्रमणं पश्चादन्नप्राशनमीरितं॥६१॥ चौलोपनयनं भूयो महानाम्न्यं महाव्रतं॥ अथोपनिषदं पश्चाद्गोदानोद्वाहकौ मृतिः ६३
शुभेषु स्युर्विवाहांताः क्रिया स्ताः क्रूरकर्मसु॥ मरणांता समुद्दिष्टा वह्नेरागमवेदिभिः॥६४॥ ततश्च पितरौ तस्य संपूज्यात्मनि योजयेत्
समिधः पंच जुहुयान्मूलाग्र घृतसंप्लुताः॥६५॥ मंत्रैर्जिह्वांगमूर्तीनां क्रमाद्वह्नेर्यथाविधि॥ प्रत्येकं जुहुयादेकामाहुतिं मंत्रवित्तमः
॥६६॥ अवदाय स्रुवेणाज्यं चतुः स्रुचि पिधाय तां॥ स्रुवेणातिष्ठन्नेवाग्नौ देशिको यतमानसः॥६७॥ जुहुयाद्वह्निमंत्रेण वौषडंतेन सं
पदे॥ विघ्नेश्वरस्य मंत्रेण जुहुयादाहुतीर्दश॥६८॥ सामान्यं सर्वतंत्राणामेतदग्निमुखं मतं॥ ततः पीठं समभ्यर्च्य देवतापाहुताशने ६९
अर्चयेद्वह्निरूपां तां देवतामिष्टदायिनीं॥ तन्मुखे जुहुयान्मंत्री पंचविंशतिसंख्यया॥७०॥ आज्येन मूलमंत्रेण वह्न्यैकीकरणं त्विदं॥
वह्निदेवतयोरैक्यमात्मना सहभावयन्॥७१॥ मूलमंत्रेण जुहुयादाज्येनैकादशाहुतीः॥ नाडीसंधानमुद्दिष्टमेतदागमवेदिभिः॥
७२॥ जुहुयादंगमुख्यानामावृतीनामनुक्रमात्॥ एकैकामाहुतीं सम्यक् सर्पिषा देशिकोत्तमः॥७३॥ ततोन्येष्वपि कुंडेषु संस्कृते
षु यथाविधि॥ आचार्यो विहरेदग्निं पूर्वादिषु समाहितः॥७४॥ ऋत्विजो गंधपुष्पाद्यैरंगाद्यावरणान्वितां॥ तंत्रोक्तदेवतामिष्ट्वा
पंचविंशतिसंख्यया॥७५॥ मूलेनाज्येन जुहुयुः साज्येन चरुणा तथा॥ प्रातरुत्थाय जुहुयुः पुनराज्यान्वितैस्तिलैः॥७६॥

पूर्वपूर्वसहितं उत्तरोत्तरखंडाहुतीर्हुत्वानंतरं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा इति चतस्रः॥ एवं दशेति। अथ विशोधनमित्यत आत्मनः स्वष्टार्थं

अध्वनः शोधनमेव व्यनक्ति ॥ पदाध्वेति ॥ एकस्थाने पुनस्तस्मात्ततः प्रोक्तेन मार्गेण वक्ष्यमाणेन मंत्रेण जुहुयात् ॥ एतत् शोधनं नाम ॥ अध्वविलापप्रकारमेवाह
द्रव्यैर्वा कल्पविहितैः सहस्रं सार्धकं पृथक् ॥ ततः सुधौतं तं स्नातं शिष्यं समाहितं ॥ ७७ ॥ पाययित्वा पंचगव्यं कुंडस्यांतिकमान
येत् ॥ विलोक्य दिव्यदृष्ट्या तं तच्चैतन्यं हृदम्बुजात् ॥ ७८ ॥ गुरुरात्मनि संयोज्य कुर्यादध्वविशोधनं ॥ उक्तं कलाध्वा तत्त्वाध्वा भुवना
ध्वेति च त्रयं ॥ ७९ ॥ वर्णाध्वा च पदाध्वा च मंत्राध्वेत्यपरं त्रयं ॥ निवृत्याद्याः कलाः पंच कलाध्वेति प्रकीर्तितः ॥ ८० ॥ तत्त्वाध्वा बहुधा भि
न्नः शिवागमभेदतः ॥ षट्त्रिंशच्छैवतत्त्वानि द्वाविंशद्वैष्णवानि तु ॥ ८१ ॥ चतुर्विंशतितत्त्वानि मैत्राणि प्रकृतेः पुनः ॥ उक्तानि
दशतत्त्वानि सप्त च त्रिपदात्मनः ॥ ८२ ॥ तत्त्वानि शैवान्युच्यंते शिवशक्तिः सदाशिवः ॥ ईश्वरो विद्यया सार्धं पंच शुद्धान्यमूनि हि
॥ ८३ ॥ माया कालश्च नियतिः कला विद्या पुनः स्मृता ॥ रागः पुरुष एतानि शुद्धाशुद्धानि सप्त च ॥ ८४ ॥ प्रकृतिर्बुध्यहंकारो मनो ज्ञानें
द्रियाण्यथ ॥ कर्मेंद्रियाणि तन्मात्राः पंचभूतानि देशिक ॥ ८५ ॥ एतान्याहुरशुद्धानि चतुर्विंशतिरागमे ॥ शैवानामिति तत्त्वानां दि
भागोत्र प्रदर्शितः ॥ ८६ ॥ जीवप्राणाधिपश्चित्तं ज्ञानकर्मेंद्रियाण्यथ ॥ तन्मात्राः पंचभूतानि हृत्पद्मं तेजसां त्रयं ॥ ८७ ॥ वासुदेवादय
श्चेति तत्त्वान्येतानि शार्ङ्गिणः ॥ पंचभूतानि तन्मात्राणींद्रियाणि मनस्तथा ॥ ८८ ॥ गर्वो बुद्धिः प्रधानं च मैत्राणीति विदुर्बुधाः ॥ नि
वृत्याद्याः कलाः पंच ततो विंदुकलाः पुनः ॥ ८९ ॥ नादः शक्तिः सदापूर्वः शिवश्च प्रकृतेर्विदुः ॥ आत्मविद्याशिवः पश्चाच्छिवो विद्या
स्वयं पुनः ॥ सर्वं तत्त्वं च तत्त्वानि प्रोक्तानि त्रिपदात्मनः ॥ तत्त्वाध्वा कथितो ह्येष तज्ज्ञैरागमवेदिभिः ॥ ९१ ॥ ईरितो भुवनाध्वेति भुवनानि म
नीषिभिः ॥ वर्णाध्वेति वदंत्यर्णानादिक्षांतान्मनीषिणः ॥ ९२ ॥ वर्णसंघः पदाध्वा स्यान्मंत्राध्वा मंत्रराशयः ॥ क्रमादेतान्पुनः षडध्वशोधये
द्गुरुसत्तमः ॥ ९३ ॥ पादांगुष्ठनाभिहृद्भालमूर्द्ध सर्वपि शिशोः स्मरेत् ॥ ततः कूर्चेन विधिवत्तं स्पृशञ्जुहुयाद्गुरुः ॥ ९४ ॥ आचार्यः कुंडे संशुद्धे

॥शिवेतिस्पष्टार्थः॥ अथ परंसकलीकृतिन्यासां अभिषेकप्रकारमाह॥ विधिवदिति॥ तयोर्देवताशिष्ययोः॥ एवंकृतादीक्षासुसुताऽस्तां नीवर्णमयीं दीक्षाप्रकार माह

शोधयाम्यमुमध्वानं स्वाहेति पृथगध्वनः॥९५॥ ताराद्यमाहुतीरष्टौ क्रमाज्जां विलयं नयेत्॥ शिवे शिवांतसंलीनाज्जनयेत्सृष्टिमार्गतः॥

॥९६॥ विलोकय न्दिव्यदृष्ट्यातं शिशुं देशिकोत्तमः॥ आत्मस्थितं तच्चैतन्यं पुनः शिष्ये नियोजयेत्॥९७॥ स्रुचापूर्णाहुतिं दत्वा मूलमं

त्रेण मंत्रवित्॥ उद्वास्य देवतां कुंभे सांगां सावरणां गुरुः॥९८॥ पुनर्व्याहृतिभिर्हुत्वा जिह्वादीनां विभावसोः॥ एकैकामाहुतिं दत्वा परिषिंच्या

ङ्गिरात्मनि॥९९॥ पावकं योजयित्वा स्वे परिधीन्सपरिस्तरान्॥ नैमित्तिके दहेन्मंत्री नित्ये जनदहेदिमान्॥१००॥ नेत्रे शिष्यस्य बध्नीया

न्नेत्रमंत्रेण वाससा॥ करे गृहीत्वा तं शिष्यं कुंडतो मंडलं नयेत्॥१०१॥ तस्यांजलिं पुनः पुष्पैः पूरयित्वा यथाविधि॥ कलशे देवता

प्रीत्यै क्षेपयेन्मूलमुच्चरन्॥१०२॥ व्यपोह्य तं नेत्रबंधमासीनं दर्भसंस्तरे॥ आत्मयागं क्रमाद्भूयः संहृत्योत्पाद्य देशिकः॥१०३

तत्तन्मंत्रोदितान्न्यासान्कुर्याद्देहे शिशोस्तदा॥ पंचोपचारैः कुंभस्थां पूजयित्वेष्टदेवतां॥१०४॥ तस्यां तंत्रोक्तमार्गेण विदध्यात्सक

लाकृतिम्। मंडले लंकृते शिष्यमन्यस्मिन्नुपवेशयेत्॥१०५॥ नदत्सु पंचवाद्येषु साईं विप्राशिषा गुरुः॥ विधिवत्कुंभमुद्धृत्य तन्मु

खस्थान्सुरद्रुमान्॥१०६॥ शिशोः शिरसि विन्यस्य मातृकां मनसा जपन्॥ मूलेन साधितैस्तोयैरभिषिंचेत्तमात्मवित्॥१०७ पूजि

तां पुनराधाय वर्द्धनीमस्त्ररूपिणीं॥ तस्यां सुसाधितैस्तोयैः सिंचेद्रक्षार्थमंजसा॥१०८॥ अवशिष्टेन तोयेन शिष्यमाचामयेद्गुरुः

ततस्तं सकलीकुर्याद्देवतात्मानमात्मवित्॥१०९॥ उत्थाय शिष्यो विमलेवाससी परिधाय च॥ आचम्य वाग्यतो भूत्वा निषीदेत्सं नि

धिं गुरोः॥११० देवतामात्मनः शिष्ये संक्रांतां देशिकोत्तमः॥ पूजयेद्गंधपुष्पाद्यैरैक्यं संभावयंस्तयोः॥१११॥ दद्याद्दिव्यां ततस्तस्मै विनी

ताया भक्तिपूर्वकं॥ गुरोर्लब्ध्वां पुनर्विद्यामष्टकृत्वो जपेत्सुधीः॥११२॥ गुरुविद्यादेवतानामैक्यं संभावयन्धिया॥ प्रणमेद्दंडवद्भूमौ गुरुं तं देवता

अथेतिग्रंथःस्पष्टार्थः॥इदानींकलावतीदीक्षामाह॥ततएवेतिवेधयेत्॥अधुनावेदमयींदीक्षांदर्शयति॥ततोवेधमयीति॥तेजस्त्रयंसोमसूर्याग्निमयंषट्च
तस्यपादांबुजद्वंद्वंनिजमूर्द्धनियोजयेत्॥शरीरमर्थंप्राणांश्चसर्वंतस्मैनिवेदयेत्॥११३॥ततःप्रभृतिकुर्वीतगुरोःप्रियमनन्यधीः।ऋ
त्विग्भ्योदक्षिणांदत्त्वासमग्रांप्रीतमानसः॥११४॥ब्राह्मणांस्तर्पयन्पश्चाद्भक्ष्यभोज्यैःसदक्षिणैः॥एषाक्रियावतीदीक्षाप्रोक्तास
र्वसमृद्धिदा॥११५॥अथवर्णात्मिकांवक्ष्येदीक्षामागमचोदिताम्॥पुंप्रकृत्यात्मकावर्णाःशरीरमपितादृशं॥११६॥यतस्तस्मात्तनौ
न्यस्येद्वर्णान्शिष्यस्यदेशिकः॥ततस्तस्यानयुतान्वर्णान्प्रतिलोमेनसंहरेत्॥११७॥स्वाज्ञयादेवताभावाद्धिविनादेशिकोत्तमः
तदाविलीनतत्त्वोयंशिष्योदिव्यतनुर्भवेत्॥११८॥परमात्मनिसंयोज्यतच्चैतन्यंगुरूत्तमः॥तस्मादुत्पाद्यतान्वर्णान्न्यसेच्छि
ष्यतनौपुनः॥११९॥सृष्टिक्रमेणविधिवच्चैतन्यंचनियोजयेत्॥जायतेदेवताभावःपरानंदमयःशिशो॥१२०॥एषावर्णम
यीदीक्षाप्रोक्तासंवित्प्रदायिनी॥ततःकलावतीदीक्षायथावदभिधीयते॥१२१॥निवृत्याद्याःकलाःपंचभूतानांशक्तयोयतः
॥तस्माद्भूतमयेदेहेध्यात्वातावेधयेच्छिशोः॥१२२॥निवृत्तिर्जानुपर्यंततलादारभ्यसंस्थिता॥जानुनोर्नाभिपर्यंतंप्रतिष्ठाव्या
प्यतिष्ठति॥१२३॥नाभेःकंठावधिव्याप्ताविद्याशांतिस्ततःपरं॥कंठाल्ललाटपर्यंतंव्याप्ततस्माच्छिखावधि।१२४शांत्यती
ताकलाज्ञेयाकलाव्याप्तिरितीरिता॥संहारक्रमयोगेनस्थानात्स्थानांतरेगुरुः१२५संयोज्यवेधयेद्विद्वानाज्ञयाताःशिरोवधि।
इयंप्रोक्ताकलादीक्षादिव्यभावप्रदायिनी१२६ततोवेधमयींवक्ष्येदीक्षांसंसारमोचनीं॥ध्यायेच्छिशुतनोर्मध्येमूलाधारेचतुर्द
ले१२७त्रिकोणमध्येविमलेतेजस्त्रयविजृंभिते।वलयत्रयसंयुक्तांतडित्कोटिसमप्रभां१२८शिवशक्तिमयींदेवींचेतनामात्रविग्र
हां॥सूक्ष्मात्सूक्ष्मतरांशक्तिंभित्वाषड्चक्रमंजसा१२९गच्छंतींमध्यमार्गेणदिव्यांपरशिवावधि।वादिसांतदलस्थार्णान्संहरेत्कमलासने
कं॥मूलाधारनाभिहृदयकंठभ्रूमध्येद्वादशांते॥अथवामूलाधारलिंगनाभिहृदयकंठभ्रूमध्येयथाक्रमंचतुःषड्दशद्वादशषोडशद्विपत्राणि॥षट्चक्राणि॥

ततःप्रमाधिष्ठातांदेवतांसुकमलासनप्रभृतिसदाशिवपर्यंतास्तुपूर्वपूर्वसहिताःसंहृत्यतत्सर्वंविंदौतंकलायांतंनादेनमपिनादांतेतंतउत्पन्नांतांविषुवत्क्रांतरेतद्धुरु
तेषड्पत्रमयेपद्मेवादिलांताक्षरान्विते॥स्वाधिष्ठानेसमायोज्यवेधयेदाज्ञयागुरुः॥१३१॥तान्वर्णान्संहरेद्विद्वांस्तेतुपुनर्नाभिपंकजे।
दशपत्रेडादिफांतद्वर्णाढ्येयोजयेद्गुरुः॥१३२॥तान्वर्णान्संहरेद्रुद्रेतेपुनर्हृदयांबुजे॥कादिठांतार्कवर्णाढ्येयोजयित्वेश्वरेगुरुः
१३३ तान्वर्णान्संहरेदस्मिंस्तंभूयःकंठपंकजे॥स्वराढ्येषोडशदलेयोजयित्वास्वरान्पुनः॥१३४॥सदाशिवेतान्संहृत्यतेपुनर्भ्रूस
रोरुहे॥द्विपत्रेहक्षलसितेयोजयित्वाततोगुरुः॥१३५॥तद्वर्णौसंहरेद्विंदौकलायांतंनियोजयेत्॥तांनादेनंतरंनादंनादांतेयोजये
द्गुरुः॥१३६॥तमुन्मन्यांसमायोज्यविषुवत्क्रांतरेचतां॥तांपुनर्गुरुवक्त्रेतुयोजयेद्देशिकोत्तमः॥१३७॥सहैवमात्मनाशक्तिंवेध
येत्परमेश्वरे॥गुर्वाज्ञयाछिन्नपाशस्तदाशिष्यःपतेद्भुवि॥१३८॥संजातदिव्यबोधोसौसर्वंविंदतितत्क्षणात्॥साक्षात्शिवोभव
त्येषनात्रकार्याविचारणा॥१३९॥एषावेधमयीदीक्षासर्वसंवित्प्रदायिनी॥क्रमाच्चतुर्विधादीक्षातंत्रेस्मिन्सम्प्रकीर्तिता॥१४०॥अ
थात्रहोमद्रव्याणांप्रमाणमभिधीयते॥कर्षमात्रंघृतंहोमेशुक्तिमात्रंपयःस्मृतं॥१४१॥उक्तानिपंचगव्यानितत्समानिमनीषिभिः॥
तत्समंमधुदुग्धान्नमक्षमात्रमुदाहृतं॥१४२॥दधिप्रसृतिमात्रंस्याल्लाजास्तुमुष्टिसंमिताः॥पृथुकास्तत्प्रमाणाःस्युःसक्तवोपितथाम
ताः॥१४३॥गुडंपलार्द्धमानंस्याच्छर्करापितथामता॥ग्रासार्द्धंचरुमानंस्याद्दिक्षुःपर्वावधिर्मतः॥१४४॥एकैकंपत्रपुष्पाणितथापू
पानिकल्पयेत्॥कदलीफलनारंगफलान्येकैकशोविदुः॥१४५॥मातुलुंगंचतुःखंडंपनसंदशधाकृतं॥अष्टधानारिकेलानिखंडि
तानिविदुर्बुधाः॥१४६॥त्रिधाकृतंफलंबिल्वंकपित्थंखंडितंत्रिधा॥उर्वारुकफलंहोमेचोदितंखंडितंत्रिधा॥१४७॥११ रुवक्त्रे॥एतानिविं
द्वारीनिव्यक्तिस्थानानिज्ञेयानि।एतत्सर्वंपरमेशिवेध्यायेत्॥योजयेत्।ध्यायेदित्यर्थः॥एवंदीक्षितस्यफलमाहगुर्वाज्ञयेति॥होमद्रव्यपरिमाणपरोग्रंथःस्पष्टः

पंचमकोवहूताग्रातत्रिविषमम्महा॥

वैश्वानरमित्यादिना। वैश्वानरस्य मुखं ज्ञात्वा तत्रैव होमः कर्तव्यः। अन्यत्र कर्मादिदोषमाह॥ कर्महोमेत्यादिना। होमकाले धूमस्य धूमध्वजस्य च सु वर्णगंध

फलान्यन्यानि खंडानि समिधः स्युर्दशांगुलाः। दूर्वास्त्र्यंगुलसंमिताः प्रोक्ताः पर्वशो मुष्टिमात्राश्चैव ॥ १४८ ॥ व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषायवा अपि।
तंडुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसंमिताः॥ १४९॥ गोधूमरक्तकलमा विहिता मुष्टिमानतः। तिलास्तु लुंचमात्राः स्युः सर्षपास्तत्प्र
माणकाः॥ १५०॥ शुक्तिप्रमाणं लवणमरीचान्येकविंशतिः॥ पुरं वदरमानं स्याद्द्राक्षमर्द्धं तत्समं स्मृतं १५१। चंदनागुरुकर्पूरकस्तूरीकुं
कुमानि च। तिंतिडीवीजमानानि समुद्दिष्टानि देशिके ॥ १५२ वैश्वानरं स्थितं ध्यायेत्तस्मिन्होमेषु देशिकः। शयानमाज्यहोमेषु निषसी
शेषवस्तुषु १५३ सधूमोऽग्निः शिरो नेत्रे धूमनिर्धूमस्त्वस्य रेवहि॥ ज्वलत्तापो भवेत्कर्णः काष्ठमग्नेर्मनस्तथा १५४ प्रज्वलो मिस्तथा जिह्वा एतदेवाग्नि
लक्षणं॥ अस्यां तज्जुहुयादग्नेर्विपश्चित्सर्वकर्मसु॥ १५५॥ कर्णहोमे भवेद्व्याधिर्नेत्रे धत्वमुदीरितं॥ नासिकायां मनःपीडा मस्तके धनसं
क्षयः १५६ स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसंनिभः॥ सुवर्णरेतसो वर्णः शोभनः परिकीर्तितः॥ १५७॥ भेरीवारिदहस्तींद्रध्वनिर्वह्नेः
शुभावहः। नागचंपकपुन्नागपाटलायूथिकानिभः॥ १५८॥ पद्मेंदीवरकह्लारसर्पिर्गुग्गुलुसन्निभः। पावकस्य शुभो गंधस्त्यक्तस्तत्र
वेदिभिः। प्रदक्षिणास्त्यक्तकंपाश्चित्राभाः शिखिनः शिखाः॥ शुभदा यजमानस्य राजस्यापि विशेषतः। कुंदेंदुधवलो धूमो वह्नेः
प्रोक्तः शुभावहः॥ कृष्णः कृष्णगते वर्णो यजमानं विनाशयेत्॥ १६१॥ श्वेतो राष्ट्रं निहत्याशु वायसस्वरसन्निभः। खरस्वरसमो वह्नेर्ध्वनिः
सर्वविनाशकृत्॥ १६२॥ पूतिगंधो हुतभुजो होतुर्दुःखप्रदो भवेत्॥ छिन्नावर्ता शिखा कुर्यान्मृत्युं धनपरिक्षयम्॥ १६३ शुकपक्षनिभो धू
मः पारावतसमप्रभः॥ हानिं तुरगजातीनां गवां च कुरुते चिरात्॥ १६४॥ एवं विधेषु दोषेषु प्रायश्चित्तायदेशिकः॥ मूलेनाज्येन जुहुयात्पंच
विंशतिमाहुतीः॥ १६५॥ अथ शारदातिलके पंचमः पटलः॥ ५॥ ११ धान्याकराणां शुभाशुभहेतुत्वं दर्शयति॥ सुवर्णसिंदूर इत्यादिना॥ इति गूढार्थदी

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अधुनादीक्षाविधानकथनानंतरमवसरप्राप्तमंत्रव्याचिख्यासुः प्रथमं सर्वप्रकृतिभूतां मातृकां प्रपंचयितुमारभते॥ अथ वर्णतनुमित्यादिना॥ अक्लीबेति॥ नपुंसक चतुष्टयव्यतिरिक्तह्रस्वदीर्घस्वरद्वयांतर्गतैः ककारादिषड्वर्गकैरिति॥ अयमर्थः॥ अं कं खं गं घं ङं आं हृदयाय नमः॥ इत्यादिप्रकारेणोक्तिजातिशक्तानि चतुर्थी

अथ वर्णतनुं वक्ष्ये विश्वबोधविधायिनीं॥ यस्यामनुपलब्धायां सर्वमेतज्जगज्जडं॥१॥ ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छंद ईरितं॥ सरस्वती समाख्याता देवता देशिकोत्तमैः॥२॥ अक्लीबह्रस्वदीर्घांतर्गतैः षड्वर्गकैः क्रमात्॥ षडंगानि विधेयानि देशिकैर्जातिसंयुतं॥३॥ पंचाशल्लिपिभिर्विभक्तमुखदोःपत्संध्यवक्षस्थलां भास्वन्मौलिनिबद्धचंद्रशकलामापीनतुंगस्तनीं॥ मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥४॥ ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः॥ ओष्ठदंतोत्तमांगास्यदोःपत्संध्यग्रकेषु च॥५॥ पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽशके॥ ककुद्यंसे च हृत्पूर्वं पाणिपादयुगे तथा॥६॥ जठराननयोर्न्यस्येन्मातृकार्णान्यथाक्रमात्॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्रात्मकान्विदुः॥७॥ यादिहांतान्न्यसेदात्मपरमज्ञानपूर्वकान्॥ दीक्षितः प्रोक्तमार्गेणान्यसेल्लक्षं समाहितः॥८॥ जपेत्तत्संख्यया विद्वानयुतं मधुराप्लुतैः॥ विदधीत तिलैर्होमं मातृकामन्वहं यजेत्॥९॥ व्योमेंद्वीरसनार्णकर्णिकमचां द्वंद्वैः स्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादित्रिवर्गं क्रमात्॥ आशास्वस्त्रिषु लांतलांगलियुजा क्षोणीपुरेणावृतं पद्मं कल्पितमत्र पूजयतु तां वर्णात्मिकां देवतां॥१०॥ आधारशक्तिमारभ्य पीठशक्तीस्तमर्चयेत्॥ मेधा प्रज्ञा प्रभा विद्या श्रीर्धृतिस्मृतिबुद्धयः॥११॥ विद्येश्वरीति संप्रोक्ता भारत्या नव शक्तयः॥ वर्णाब्जेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत्॥१२॥ आवाह्य पूजयेत्तस्यां देवीमावरणैः सह॥ अंगैः स्वरैः पूर्वं द्वितीयं युग्मशः स्वरैः॥१३॥ अष्टवर्गैस्तृतीयं स्यात्तच्छक्तिभिरनंतरं॥ पंचमं मातृभिः प्रोक्तं षष्ठं लोकेश्वरैः स्मृतं॥१४॥

विभक्तिसंयुक्तानि ध्यानमाह॥ पंचाशल्लिपिभिरिति॥ अक्षः अक्षमालागुणां त्रिशूलंककुदिन अपरगले॥ मातृकां वा जं वर्णपति व्योमेति॥ अष्टदलं पद्मं वीक्ष्य तत्कर्णिकायां व्योमः हकारः इंदुः सकारः॥ औ स्वरूपं रसना विसर्गः॥ ततश्चायमर्थः॥ एतैः संपीडितं बीजं कर्णिकायां ह्सौः॥ इति विलिखेदिति॥ अचामिति स्वरयुग्मकैः स्फु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अथपत्रेषुकादिलांतान्॥ अष्टवर्गकं॥ आशास्विति। पश्चाद्बहिः भूपुरं तस्याभ्यंतरे पूर्वादिदिक्षु लांतो वकारः। अग्निषुकोणेषु आग्नेयादिषु लांगलिः ठकारः। एवं कृते तत्ता
दक्षपत्रांतरकर्णिकायां देवीं च पूजयेदित्यर्थः। आधारशक्तिमित्यारभ्य साधकसत्तम इत्यंतो ग्रंथः। कव्यादिपूर्वकं मातृकापादशविधन्यासान्क्रमेणावक्तुमारभते।

लोकपालायुधैः प्रोक्तं वज्राद्यैः सप्तमं ततः॥ विधिनानेन वर्णेशीमुपचारैः प्रपूजयेत्॥१५॥ व्यापिनी लापिनी पश्चात्पाविनी क्लेदिनी
तथा। धारिणी मालिनी भूयो हंसिनी शंखिनी स्मृता १६ शुभ्राः पत्रेषु संपूज्या धृताक्षगुणपुस्तकाः। ब्राह्मी माहेश्वरी भूयः कौमा
री वैष्णवी मता। वाराह्यनंतरैंद्राणी चामुंडा सप्तमी मता। अष्टमी स्यान्महालक्ष्मीः प्रोक्ताः स्युर्विश्वमातरः।१८। दंडं कमंडलुं पश्चादक्ष
सूत्रमथाभयं। बिभ्रती कनकच्छाया ब्राह्मी कृष्णाजिनोज्ज्वला १९ शूलं परश्वधं क्षुद्रं दुंदुभिं नृकरोटिकां। वहंती हिमसंकाशा ध्येया
माहेश्वरी शुभा॥२०॥ अंकुशं दंडखट्वांगौ पाशं च दधती करैः॥ बंधूकपुष्पसंकाशा कौमारी कामदायिनी॥२१॥ चक्रं घंटां कपा
लं च शंखं च दधती करैः॥ तमालश्यामला ध्येया वैष्णवी विभ्रमोज्ज्वला॥२२॥ मुशलं करवालं च खेटकं दधती हलं॥ करैश्चतुर्भिर्वारा
ही ध्येया कालघनच्छविः॥२३॥ अंकुशं तोमरं विद्युत्कुलिशं बिभ्रती करैः॥ इंद्रनीलनिभेंद्राणी ध्येया सर्वसमृद्धिदा॥२४॥ शूलं कृपाणं
नृशिरः कपालं दधती करैः॥ मुंडस्रङ्मंडिता ध्येया चामुंडा रक्तविग्रहा॥२५॥ अक्षस्रजं बीजपूरं कपालं पंकजं करैः॥ वहंती हेमसंकाशा म
हालक्ष्मीः समीरिता॥२६॥ पूजयेन्मातृकामित्थं नित्यं साधकसत्तमः॥ न्यसेत्सर्गान्वितां सम्यग्ध्यात्वा देवीं यथाविधि॥२७॥ सर्गो विंदुं
तिकां न्यस्येत् डार्णाद्यां स्थितिवर्त्मना॥ विद्यात्पूर्वोदितान्विद्वानृष्यादीनंगसंयुतान्॥२८॥ ध्यायेद्वर्णेश्वरीं मंत्रवल्लभेन समन्वितां
॥ सिंदूरकांतिममिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरं दधानां॥ पार्श्वस्थितां भगवतीमपि कांचनांगीं ध्यायेत्कराब्जधृतपुस्त
कवर्णमालां॥२९॥ न्यसेत्सर्गांतमित्यादिना तारोत्थाभिः पंचाशत्कलाभिः। तार्तीयं त्रिपुरामंत्रचरमबीजं। तद्बीजपूर्वं सधातुसप्राणोतिसप्तधातुप्राण श

क्ति आत्मप्रतानमाहिदक्षवर्णानुजकस्यानेजस्वशक्तिः॥

शा॰ति॰
टी॰पू॰
२६

अभ्यर्चनादिकं सर्वं विदध्यात्पूर्ववर्त्मना॥ विंदुयुक्तामिमां न्यस्येत्संहृत्या त्वप्रतिलोमतः॥३०॥ विद्यात्पूर्वोदितान्विद्यान्पृथ्व्यादीनंगसंयुतान् ध्ये
यावर्णमये पीठे देवी वागवल्लभा शिवा ३१॥ अक्षस्रजं हरिणपोतमुदग्रटंकं विद्यां करैरविरतं दधतीं त्रिनेत्रां॥ अर्द्धेंदुमौलिमरुणामरविंद
वासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां॥३२॥ न्यासार्चनादिकं सर्वं कुर्यात्पूर्वोक्तवर्त्मना॥ तारोत्थाभिः कलाभिस्तान्न्यसेत्साधकसत्तमः ३३
वर्णाद्यास्ताः रसंयुक्ता न्यस्तव्यास्ता नमोन्विताः॥ ऋषिः प्रजापतिश्छंदो गायत्रं समुदाहृतं॥३४॥ कलात्मा वर्णजननी देवता शारदा स्मृ
ता॥ ह्रस्वदीर्घांतरगतैः षडंगं प्रणवैः स्मृतं॥३५॥ हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां॥ टंकं शुभ्रं कपालं दरममृतलसद्धेम
कुंभं वहंतीं॥ मुक्ताविद्युत्पयोदस्फटिकनवजपाबंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि॥३६॥ अर्चयेदु
क्तमार्गेण शारदां सर्वकामदां॥ तार्त्तीयपूर्वां तां न्यस्येन्नमोंतां रुद्रसंयुतां॥३७॥ सधात्वप्राणशत्यात्मयुक्ताया दिष्वतेक्रमात्॥ ऋषिः स्याद्द
क्षिणामूर्तिर्गायत्रं छंद ईरितं॥३८॥ अर्धनारीश्वरः प्रोक्तो देवता तंत्रवेदिभिः॥ हसाषड्दीर्घयुक्तेन कुर्यादंगानि देशिकः॥३९॥ बंधूकं कांच
ननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदंडैः॥ बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्द्धांबिकेशमनिशं वपुराश्रयामः॥४०॥
पूर्वोक्तेनैव मार्गेण पूजयेत्तं यथाविधि॥ स्मराद्यां मातृकां न्यस्येत्केशवादिनमोन्वितां॥४१॥ सधात्वप्राणशत्यात्मयुक्ताया दिष्वविश्लवः॥
ऋषिः प्रजापतिः प्रोक्तो गायत्रं छंद ईरितं॥४२॥ अर्द्धलक्ष्मीहरिः साक्षाद्देवता च समीरिता॥ दीर्घयुक्तेन बीजेन षडंगानि समाचरेत्॥४३॥
हस्तैर्बिभ्रत्सरसिजगदाशंखचक्रासिविद्यापद्मादर्शौ कनककलशं मेघविद्युद्विलासं॥ वामोत्तुंगस्तनमविरलाकल्पमाश्लिष्टलोभादेकीभू
तं वपुरवतुवः पुंडरीकाक्षलक्ष्म्योः॥४४॥ अत्रार्चनादिकं सर्वं प्राग्वन्मंत्री समाचरेत्॥ शक्तिपूर्वां तनौ न्यस्येन्मातृकां मंत्रवित्तमः॥४५॥ ऋषिः
शक्तिः स्मृतं छंदो गायत्रं देवता बुधैः॥ संप्रोक्ता विश्वजननी सर्वसौभाग्यदायिनी॥४६॥ दीर्घेंदुयुजांगानि कुर्यान्मायात्मना बुधः॥ उद्यत्को
टिदिवाकरप्रतिभटोत्तुंगोरुपीनस्तनीबद्धेंदुकिरीटहाररसनामंजीरसंशोभिता॥ बिभ्राणा करपंकजैर्जपवटीं पाशांकुशौ पुस्तकं दिव्याद्यो जग

ज्वलत्कोटिबालार्कभासारुणाभं॥४७॥

राम
२६

पुरोदितेनविधिनादेवीमन्वहमर्चयेत्॥न्यसेच्छ्रीबीजसंपन्नांमातृकांविधिनातनौ ४८ ऋषिर्भृगुस्समृतश्छंदोगायत्रंदेवतास्मृता।समस्तसं
पदामाद्यैर्जगतांनायिकाबुधैः ४९ प्राक्प्रसूतेनबीजेनकुर्यादंगानिसाधकः।विद्युद्दामसमप्रभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैः।शुंडाद
डसमुद्धृतामृतघटैरासिच्यमानामिमां।बिभ्राणांकरपंकजैर्जपवरीपद्मद्वयंपुस्तकं।भास्वद्रत्नसमुज्वलांकुचनतांध्यायेज्जगत्स्वा
मिनीं ५० आराधयेदिमांप्रोक्तवर्त्मनाकुसुमादिभिः।न्यसेत्स्मराद्यांवसुधिमातृकांमंगलप्रदां ५१ ऋषिःसंमोहनःप्रोक्तश्छंदोगायत्र
मुच्यते।देवतामंत्रिभिःप्रोक्तासमस्तजननीपरा।।५२ स्मरेणदीर्घयुक्तेनविदध्यादंगकल्पनां।बालार्ककोटिरुचिरांस्फटिकाक्षमालांकोदं
डमिक्षुजनितंस्मरपंचबाणान्॥विद्यांचहस्तकमलैर्दधतींत्रिनेत्रांध्यायेत्समस्तजननींनवचंद्रचूडाम् ५३ अर्चनादिक्रियाःसर्वाःप्रोक्ताः
पूर्वविधानतः।शक्तिश्रीकामबीजाद्यांदेवींवर्णतनुंभजेत्।५४।ऋषिःपूर्वोदितश्छंदोगायत्रंदेवताबुधैः।संमोहनीसमुद्दिष्टासर्वलोकत
शंकरा।५५आवर्तितैस्त्रिभिर्बीजैःषडंगानिप्रकल्पयेत्।ध्यायेयमक्षवलयेक्षुसरासपाशान्पद्मद्वयांकुशशरान्नवपुस्तकंच।आविभ्रतींनि
जकरैररुणांकुचार्तांसंमोहनींत्रिनयनांतरुणेंदुचूडां ५५।यजेदावरणैःसार्द्धमुपचारैःसुशोभनां।प्रपंचयागंवक्ष्यामिसच्चिदानंदसि
द्धिदं ५६ वेदादिशक्तिरजपापरमात्ममहामनुः वह्निजायान्तकथितापंचमंत्राःशुभावहाः ५७ तारशक्त्यादिकान्न्यसेदजपात्मद्विकांतिकां।मा
त्रकामतत्त्वमार्गेणसृष्ट्यादेहेविधानवित्।५८ऋषिर्ब्रह्मासमुद्दिष्टश्छन्दोगायत्रमीरितं।समस्तवर्णसंव्याप्तंपरंतेजोस्यदेवता ५९ स्वाहाद्यैःपंचम
नुभिःपंचांगानिप्रकल्पयेत्।अस्त्रांतदिक्षुबंधःकुर्याद्रूपेहरिहरात्तरैः ६० ताराद्यपंचमनुभिःपरिचीयमानंमानैरगम्यमनिशंजगदेकमूलं।सच्चित्स
मस्तगमनश्वरमच्युतंतत्तेजःपरंभजतसांद्रसुधांशुराशिं ६१ पंचभूतमयावर्णाःवर्गेभ्यःप्रागुदीरिताः।तस्माज्ज्ञानेंद्रियात्मानःप्रपंचस्तन्मयंवि
दुः।६२।देहोपिताद्दृशस्तस्मिन्न्यसेद्वर्णान्विलोमतः ततस्थानयुतान्मंत्रीजुहुयात्परतेजसि ६३ एवंवर्णमयंहोमंकृत्वास्त्यितत्वमेवतान्यस्य
मंत्रीयथान्यायंदेहेविश्वस्यमातरम् ६४ जपेन्मंत्रान्भजेद्देवान्यजेदग्निमनन्यधीः।द्रव्यैश्चजुहुयादष्टौमंत्रवित्तत्ववेदितैः ६५ अश्वत्थोदुंबरप्लक्ष
न्यग्रोधसमिधस्तिलाः।सिद्धार्थपायसाज्यानिद्रव्या
ण्यष्टौविदुर्बुधाः ६६

॥कथं।पंत्वगात्मनेनमइतिरं॥अस्वगात्मनेनमइत्येवमन्यत्रापिप्राणात्मने शात्मात्मने।आत्मने।अइत्यादिप्रकारेण॥हंसेति।हंसंहृदयायनमः।हं
सौशिरसेस्वाहाइत्यादिप्रकारेण।स्मराद्यंकामवीजाद्यंसद्यान्वितमित्युक्तार्थः।आदिवीजेनकामवीजेनस्मराद्यान्पुनरपिकामवीजाद्यान्‌ःपुस्तकं इदा
नींप्रपंचयागाख्यांन्यासमाह।वेदादीति।प्रणवःअक्षराणांकथंप्रपंचयागत्वमित्याशंक्याह।।अक्षराणांप्रपंचात्मकत्वात्॥तदात्मकत्वमुक्तमित्याह।पंचभू

अमीभिर्जुहुयाल्लक्षंतदर्द्धंवासमाहितः।सर्वान्कामानवाप्नोतिपरांसिद्धिंचविंदति ६७ एभिरर्कसहस्राणिहुत्वामंत्रीविनाशयेत्।अरि
पून्सुदुर्ग्रहान्भूतान्ज्वरान्छायांश्चपन्नगान्। ६८ मंत्राणामपथावृत्तिप्रतिपत्तिसमुद्भवाम्।विकारान्नाशयेदाशुहोमोयंसमुदीरि
तः ६९ एभिस्त्रिमधुरोपेतैर्जुहुयाल्लक्षमानतः।अचिरादेवसम्भवेत्साक्षाद्भूमिपुरंदरः ७० अमीभिःसाधकोहुत्वावश्यादीनपिसा
धयेत्।हुत्वालक्षंतिलैः शुद्धैर्मुच्यतेसर्वपातकैः ७१ पायसान्नेनजुहुयान्मंत्रीसर्वसमृद्धये॥पद्मानांलक्षहोमेनमहतींश्रियमा
प्नुयात् ७२ घृतेनजुहुयाल्लक्षंप्राप्नुयात्कीर्त्तिमुत्तमां।जातीकुसुमहोमेनसर्वलोकवशंनयेत् ७३ संशोधितैस्त्रिमध्वक्तैर्लवणैर्ल
क्षमानतः॥जुहुयात्पुत्तलिकांकृत्वावशयेत्सर्वमंजसा ७४ लिखित्वापत्रखंडेषुमातृकार्णान्पृथक्पृथक्।अभ्यर्च्यजुहुयाद्धोतत्प
त्रोक्षरमुच्चरन् ७५ अभिचारहरोहोमःसर्वरक्षाप्रसिद्धिदः।सहस्रहोमेवितरेद्रक्षिणान्निष्कमानतः ७६ अर्द्धंवाशक्तितोदद्या
द्यथोक्तंफलमाप्नुयात्॥अन्यथासप्तसंजप्तंपिवेत्प्रातर्दिनेदिने ७७ सलिलंसभवेद्वाग्मीलभतेकवितांपरां।ब्राह्मीरसेवचाकल्कंप
यसाविपचेद्घृतं ७८ अयुतंमातृकाजप्तमर्चितंचविधानतः।पिवेत्प्रातःसमेधावीभवेद्वाक्पतिसत्तमः ७९ ब्राह्मींसहस्रसंजप्तांवचां
वापयसापिवेत्। सलभेन्महतींमेधाम चिरान्नात्रसंशयः॥८०॥

८१ तेत्यादिना।तेजसिपरमात्मनितंत्रस्थानसहितान्वर्णान्जुहुयादुप
संहरेदित्यर्थः।फलमाह।एवमिति।एवंन्यासंकृत्वाकिंकुर्यादित्यतआह।न्यस्येति।एवंवर्णन्यासात्मकप्रपंचयागमभिधाय।अधुनावक्ष्यमाणद्रव्येर
ग्नौहोमप्रकारंतत्फलंचाह॥द्रव्यैश्चेति अश्वत्थेत्यादिना।एभिर्द्रव्यैस्तैरेवपंचमंत्रैः॥कृतलक्षणाइत्यस्यप्रकारमाह॥सर्वान्कामानिति।फलान्तराण्याह।
एभिरित्यादिना।एककलशाभिषेकप्रकारंतत्फलंचाभिधायनवकलशाभिषेकंतत्फलंचवक्तुमारभते॥ ८० ॥ ० ॥

पूर्वोक्तमंडलमित्यादिना॥ उत्तरोग्रंथः स्पष्टार्थः॥ मातृकामंत्रसाधितमुद्राविधानमाह॥ सोमसूर्येत्यादिना। स्वराद्यक्षरसंख्यया षोडशपंचविंशतिदशसंख्यया रत्यर्थः
पूर्वोक्तपंकजं कृत्वा कुंभं संस्थाप्य पूर्ववत्। कायेन पूरयेन्मंत्री यथावत्क्षीरशाखिनां ८१ अष्टगंधं विलोड्यास्मिन्नवरत्नसमन्विते॥
आवाह्य पूजयेद्देवीं मातृकामुक्तमार्गतः ८२ सहस्रसाधिते तस्मिंस्तोयैरभिषिंचेत्प्रियं नरं॥ भानुवारे शुभे लग्ने ब्राह्मणानपि भोजयेत् ८३
गुरवे दक्षिणां दद्याद्भक्तियुक्तः स्वशक्तितः। रक्षाकरं विशेषेण कृत्याद्रोहोपशांतिदं ८४ ऐश्वर्यपुजननं पुंसां सर्वसौभाग्यसिद्धिदं॥ अ
भिषेकमिमं प्राहुर्विश्वसंमोहनं परं ८५ पूर्वोक्तमंडले कृत्वा मंत्री नवपदान्वितं। मध्यादिस्थापयेत्तेषु पदेषु कलशान्नव ८६ तंतुभिर्वेष्टि
तान् शुभ्रान्वहिश्चंदनचर्चितान्॥ सुधूपवासितान्मंत्री दूर्वाक्षतसमन्वितान्॥ ८७॥ आपूर्य शुद्धतोयैस्तान्तेषु पंचसु वै सुतान्। मुक्ता
माणिक्यवैदूर्यगोमेदान्वज्रविद्रुमौ ८८ पुष्परागं मरकतं गरुडोद्गारमेव च। उक्तानि नवरत्नानि तेषु कुंभेषु निक्षिपेत् ८९ विष्णुक्रांतामि
न्द्रवल्लीं देवीं दूर्वां च निक्षिपेत्॥ स्थापयेत्कुंभवक्त्रेषु कोमलाश्वत्थपल्लवान् ९० विन्यसेदक्षतोपेतांश्चषकांश्च फलान्वितान् मध्यकुं
भे समाराध्य देवीं मंत्री यथोदितः ९१ अर्चयेद्दिक्षु कुंभेषु व्यापिन्याद्याः पुरोदिताः। वर्गमंत्रयुताः प्रोक्तलक्षणाः सर्वसिद्धिदाः ९२
शर्कराघृतसंयुक्तं पायसं च निवेदयेत्। स्पृष्ट्वा कुंभान्कुशैर्विद्वान्जपेत्सार्धशतं शतं ९३ अभिषिंचेद्विलोमेन साध्यं तं दत्तदक्षिणां॥
सर्वपापक्षयकरं शुभदं शांतिसिद्धिदं ९४ कृत्याद्रोहादिशमनं सौभाग्यश्रीजयप्रदं॥ पुत्रप्रदं च वंध्यानामभिषेकमिमं विदुः ९५
ज्वरार्तस्य पुरः स्थित्वा जपेत्तस्याग्रे सहस्रकम्॥ ज्वरो नश्यति तस्याशु क्षुद्रभूतग्रहा अपि ९६ परं तेजः स्मरेत्संचिंत्य शुभ्रं स्रुतसुधामयं।
विधुबिंबं जपेद्योगी विषरोगविनाशकृत् ९७ वलीपलितरोगघ्नः क्षुत्पिपासाप्रनाशनः। पुष्टिदः सर्वसौभाग्यदायी लक्ष्मीशुभंप्र
दः ९८ सोमसूर्याग्निरूपाः स्युर्वर्णा लोहत्रयं तथा॥ रौप्यमिंदुः स्मृतो हेम सूर्यस्ताम्रं हुताशनः ९९ लोहभागाः समुद्दिष्टाः स्वराद्य
क्षरसंख्यया। तैर्लोहैः कारयेन्मुद्रामक्षसंकलितां गताम् १०० ॥ अधुना नवरत्नमयमुद्रिकाविधानं तत्फलं च निरूपयति। तपनवव(र्ण)
वर्गमयं नवग्रहरूपिणीं प्रतिपादयंती हविर्भुजेन्मातृकामित्यादिना। मनिकापंनमाह ॥ १०० ॥ ० ॥

शा·ति·
टी·यू·
२८

तार्तीयीज्वलकर्णिकेति॥ अस्येत्याख्यानं प्रयोगवत्कृतं॥ व्योमेंद्रिस्य संग्रहाधिकारात्रत्र पुनर्निरूप्यते॥ इति गूढार्थदीपिकायां षष्ठः पटलः॥ पंचाशद्वर्णमातृका॥
मंत्रविधानानंतरं द्विचत्वारिंशद्वर्णात्मकभूतलिपिसंज्ञकमातृकामंत्रविधानं कथयितुं नववर्गात्मकत्वात्तस्य प्रथमं नववर्गविभजते॥ पंचह्रस्वेत्यादिना॥

साग्रं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात्ततः। तस्यां संपातयेन्मंत्री सर्पिषा पूर्वसंख्यया १०१ निक्षिप्य कुंभे तां मुद्रामभिषेकोक्तवर्त्मना
आवाह्य पूजयेद्देवीमुपचारैः समाहितः १०२ अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः॥ इयं रक्षा क्षुद्ररोगविषज्वरविनाशि
नी १०३ व्याघ्रचोरमृगादिभ्यो रक्षां कुर्याद्विशेषतः। युद्धे विजयमाप्नोति धारयन्मनुजेश्वरः। १०४ विभजेन्मातृकां मंत्री नववर्गान्य
थाक्रमात् अष्टावष्टौ स्वरास्पर्शाः पंच शोव्यापकाअपि १०५ नववर्गाः समुत्पन्नानवरत्नेश्वराग्रहाः। अर्केंदुरक्तज्ञगुरुभृगुमं
दाहिकेतवः १०६ माणिक्यं मौक्तिकं चारुविद्रुमं गारुडं पुनः॥ पुष्परागं लसद्वज्रं नीलं गोमेदकं शुभं १०७ वैदूर्यं नवरत्नानि मु
द्रांतैः कल्पयेच्छुभाम्। जपहोमादिकं सर्वं कुर्यात्पूर्वोक्तवर्त्मना १०८ यो मुद्रां धारयेदेनां तस्य स्युर्वशगा ग्रहाः। वर्द्धते तस्य सौभा
ग्यं लक्ष्मीरव्याहता भवेत् १०९ कृत्याद्रोहा विनश्यंति नश्यंति सकलापदः॥ रक्षोभूतपिशाचाद्या नेक्षंते तं भयाकुलाः॥ ११०
उपर्युपरि वर्द्धंते धनरत्नादिसंपदः॥ तार्तीयोज्ज्वलकर्णिकं स्वरयुगैः शाविर्भवत्केसरं॥ वर्गोल्लासि वसुच्छदं वसुमतीगेहेन संवेष्टि
तं ताराधीश्वरवारिवर्णविलसद्दिक्कोणसंशोभितं॥ यंत्रं वर्णतनोः परं निगदितं सर्वामयघ्नं परं १११ इति श्रीशारदातिलके षष्ठः
पटलः ६ अथ भूतलिपिं वक्ष्ये सुगोप्यामतिदुर्लभां॥ यां प्राप्य शंभोर्मुनयः सर्वान्कामानवापिरे १ पंचह्रस्वाः संधिवर्णा व्योमेरा
ग्निजलंधराः। आद्यमाद्यं द्वितीयं च चतुर्थं मध्यमं क्रमात् २ पंचवर्गाक्षराणि स्युर्वांतश्चैतैरिमिः सह। एषा भूतलिपिः प्रोक्ता द्विचत्वा
अयमत्र निगूढः। पंचह्रस्वाः। अइउऋऌ। संधिवर्णाः। एऐओऔ॥ व्योमेराग्निजलंधराः॥ धरा लकारः। ततश्चायमर्थः। कवर्गस्यांते ङ·१ रिंशदक्षरैः ३
कारः। आद्यं ककारः द्वितीयं खकारः। चतुर्थं घकारः॥ मध्यमं गकारः। ततश्च ङकखघग इति॥ चतुर्थवर्गः। एवमन्यत्रापि अंत्यमाद्यमिति। पोज्यं। अचकछजम

राम·
२८

शषसनवमवर्गः॥एवंनववर्गात्मिकाभूतलिपिः॥नववर्गाचक्षराणिदर्शयति॥आद्यंवर्णं॥अत्राप्ययंनिगूढः॥अएअं
वराणिःआकाशोर्णःहकारःअकारश्चएकारश्चअंवराणिचआयंवराणि॥संधौकृते आयंवराणीइतिभवति॥वर्गाणांपंच
स्वराश्चङञणनमाःशष्णिसंयुताः॥शषिःसकारः॥तत्संयुताःवर्गादिवर्णावेदितव्याः॥आकाशवायुवह्निवारिपृथ्वीमयत्वंवर्गवर्णानां

अ	इ	उ	ऋ	ऌ	ब्रह्मा
ए	ऐ	ओ	औ	०	विष्णु
ह	य	र	व	ल	रुद्रः
ङ	क	ख	घ	ग	ईश्व
ञ	च	छ	झ	ज	प्रजापति
ण	ट	ठ	ढ	ड	दिगीशः
न	त	थ	ध	द	क्रियाः
म	प	फ	भ	ब	ज्ञानं
श	ष	स	०	०	इच्छा
आकाशः	वायुः	वह्निः	जलं	पृथ्वी	ॐ

आयंवराणंवर्गाणांःपंचमाःशर्णिसंयुताः॥वर्गाद्याइतिविज्ञेयानववर्गाःस्मृताअमी॥४॥ व्योमेराग्निजलक्ष्मो
णीवर्गवर्णान्पृथक्कृविदुः द्वितीयवर्गेभूर्नस्यान्नवमेनजलंधरा॥५॥विरिंचिविष्णुरुद्राश्चप्रजापतिदिगीश्वराः क्रियादिशक्तिस
हिताःक्रमात्स्युर्वर्गदेवताः ६ ऋषिःस्याद्दक्षिणामूर्तिर्गायत्रंछंदईरितं॥देवताकथितासद्भिःसाक्षाद्वर्णेश्वरीपरा ७ हादिषड्वर्ग
कैःकुर्यात्षडंगानिसजातिभिः॥ध्यायेल्लिपितरोर्मूलेदेवींतन्मयपंकजे॥८॥वदंतिसुधियोवृक्षंनित्यंवर्णमयंशुभं॥परसंविन्मह
बीजंविंदुनादमहाशिफं॥९॥पृथिव्यक्षरशाखाभिःसर्वाशासुविजृंभितं॥सलिलाक्षरपत्रैःस्वैःसंछादितजगत्त्रयं॥१०॥वह्निवर्णा
कुरैर्दीप्रंरतैर्विश्वसरद्रुमं॥मरुद्वर्णलसत्पुष्पैर्द्योतयंतंवपुःश्रियं॥११॥आकाशार्णफलैर्नम्रंसर्वभूताश्रयंपरं॥परामृताख्यमधु
भिःसिंचंतंपरमेश्वरीं॥१२॥वेदागमादिभिःकृप्तंसमुन्नतिमनोहरं शिवशक्तिमयंसाक्षात्तच्छायाश्रितजगत्त्रयं॥१३॥एनमाश्रित्य
मनयःसर्वान्कामानवाप्नुयुः॥अंकोन्मुक्तशशांककोटिसदृशीमापीनतुंगस्तनीं चंद्रार्द्धांकितमस्तकांमधुमदादालोलनेत्रत्रयां वि
भ्राणामनिशंवरंजपवटीविद्यांकपालंकरे॥राढ्यांयौवनगर्वितांलिपितनुंवाणीश्वरीमाश्रये॥१४॥आधारदेशेविधृतानेनाभौहृदि
गलेपुनः॥विंदौनादेततःशक्तौशिवेदेशिकसत्तमः॥१५॥ प्रत्येकंक्रमेणदर्शयति॥व्योमेत्यादिना॥नहिएवमेववर्गवर्णानांप्रत्येकंवोद्धव्यंनेत्या
ह॥द्वितीयवर्गइति॥तत्रभूवाचकाक्षरंनास्तितस्याक्षरचतुष्टयात्मकत्वात् नवमेशकारादिवर्गेतस्यत्र्यक्षरात्मकत्वात्॥तत्रजलवाचकधरावाचकाक्षरेस्तत्हादिष
ड्वर्गकैरिति नववर्गमध्येहाङञणनमाक्षरादिवर्गैः निगदस्याख्यानमपरम्॥अंकोन्मुक्तं कलंकरहितमित्यर्थः॥मधुमदात्आसवमदात् विद्यापुस्तकं अक्ष

गादिवर्णादिस्थकाशांतानां॥आदिवर्णाद्यात्मकंनवसमस्तवर्णाख्याम
स्थानावगाह॥१४॥

सा·ति· टी·पू· २९

आधारेत्यादिना। अधिष्ठाने लिंगे। विंदौ ललाटस्थाने। नादौ मूर्ध्नि। शक्त्यां तस्मादुपरि। शिवे द्वादशांते। तृतीयवर्गाक्षरन्यासमाह। अग्रमूलेत्यादिना। अत्रायं निगू
ढः। ङकारमंगुल्यग्रे। ककारं बाहुमूले। खकारमुपमूले कोपरसंधौ इत्यर्थः॥ घकारमंगुलिमूलेषु॥ गकारं मध्यमणिबंधे अंगुष्ठमूलमित्यर्थः॥ एवं वर्गचतुष्टय
स्य। मकारं जठरे। दक्षिणपार्श्वे पकारं इतरे। फकारं नाभौ। भकारं। शाद्यक्षरत्रयात्मकं अवशिष्टं तस्य न्यासस्थानान्याह। यथाक्रमं गुह्ये॥ हृदि मूर्विलेति। स

नवाधारेषु विन्यस्य स्वरान्नव यथाविधि। हादिवर्णास्ततो न्यस्येन्मुखे ऊर्द्ध्वादितः सुधीः॥१६॥ ऊर्द्ध्वमाहेंद्रयाम्योदक्पश्चिमेषु समा
हितः। दोःपत्सु पंचवर्गाणां वर्णान्देशिकसत्तमः॥१७॥ अग्रमूलोपमूलाग्रमध्यदेशक्रमेण तु॥ जठरे पार्श्वयुगले नाभौ पृष्ठे समाहि
तः॥ गुह्ये हृद्भ्रूदले न्यस्येत् शादिवर्णत्रयं क्रमात्॥ सृष्ट्यां सर्गावसानास्या स्थितौ वह्निमरुत्पयः॥१९॥ वियद्भूमिक्रमान्न्यस्येद्विंदु
सर्गावसानिकां॥ संहृतौ प्रतिलोमेन विन्यसेद्विंदुभूषितां॥२०॥ आगमोक्तेन मार्गेण दीक्षितः साधकोत्तमः॥ लक्षं न्यसेज्जपेत्तावद्
युतं जुहुयात्तिलैः॥२१॥ पूजयेदन्वहं देवीं पीठे प्रागीरिते सुधीः॥ वर्णाब्जेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत्॥२२॥ देवीं संपूजयेत्तस्यामं
गाद्यावरणान्यजेत्। आदावंगावृतिः पश्चादंबिकाद्याभिरीरिता॥२३॥ द्वितीया मातृभिः प्रोक्ता तृतीयाष्टशक्तिभिः॥ चतुर्थी पंचमी
प्रोक्ता द्वात्रिंशच्छक्तिभिः पुनः॥२४॥ चतुःषष्ट्यास्मृता षष्ठी शक्तिभिर्लोकनायकैः॥ सप्तमी पुनरेतेषामस्त्रैः स्यादष्टमावृतिः॥२५॥ ए
वं पूज्या जगद्धात्री श्रीभूतलिपिदेवता॥ स्थानेषु तेषु विधिवदभ्यर्च्यांगानि पूर्ववत्॥२६॥ अंबिका वाग्भवी दुर्गा श्रीशक्तिः प्रोक्तलक्षणाः
। ब्राह्म्याद्याः पूर्ववत्प्रोक्ताः कराली विकरात्युमा॥२७॥ सरस्वती श्रीदुर्गेषा लक्ष्मी श्रुत्यौ स्मृति धृतिः॥ श्रद्धा मेधा मति कांतिः आर्याः षो
डश शक्तयः॥२८॥ ९ सृष्टिन्याससमये वर्णान् विसर्गयुक्तान्न्यसेत्॥ स्थितिन्याससमये तानेव विंदुविसर्गयुतानपि॥ वह्निवर्णं प्रथमं॥ अनंतरं वायुवर्णं त
तो जलवर्णं ततश्चाकाशवर्णं पुनर्भूवर्णं इत्येवं प्रकारेण न्यसेत्॥ कथं खः कघङः गः॥ एवमन्यत्रापि बोध्यं। संहृतिन्याससमये प्रतिलोमेन विंदुयुतं क
यं ङं घं गं खं कं। इति तत्स्थानेषु न्यसेत्॥ एवमन्यत्रापि निगदव्याख्यातमपरं॥ यंत्रक्रियाविशेषांश्च ज्ञात्वा कर्माणि साधयेदित्युक्तम्॥ ० ॥ ॥

राम· २९

खड्गखेटकधारिण्यः श्यामाः पूज्याः स्वलंकृताः ॥ विद्याह्रीपुष्टयः प्रज्ञासिनीवाली कुहूः पुनः ॥२९॥ रुद्रा वीर्या प्रभा नंदा स्यात्पोषा ऋद्धिदा
शुभा ॥ कालरात्रिर्महारात्रिर्भद्रकाली कपर्दिनी ३०॥ विकृतिर्दंडिमुंडिन्यौ सेंदुखंडा शिखंडिनी ॥ निशुंभशुंभमथनी महिषासुरमर्दिनी ३१
इंद्राणी चैव रुद्राणी शंकरार्द्धशरीरिणी ॥ नारी नारायणी चैव त्रिशूलिन्यपि पालिनी ॥३२॥ अंबिका ह्लादिनी चैव द्वात्रिंशच्छक्तयः सिताः ॥ वज्र
हस्ताः पिशाचास्याः संपूज्याश्चारुभूषणाः ॥३३॥ पिंगलाक्षी विशालाक्षी समृद्धिर्वृद्धिरेव च ॥ श्रद्धा स्वाहा स्वधाभिख्या मायासंज्ञा वसुंधरा ३४॥ त्रि
लोकधात्री सावित्री गायत्री त्रिदशेश्वरी ॥ सुरूपा बहुरूपा च स्कंदमाता च तत्प्रिया ॥३५॥ विमला चामला पश्चादरुणी पुनरारुणी ॥ प्रकृति
र्विकृतिः सृष्टिः स्थितिः संहृतिरेव च ॥३६॥ संध्या माता सती हंसी मर्द्दिका परदेवता ॥ देवमाता भगवती देवकी कमलासना ॥३७॥ त्रिमुखी सप्तमु
ख्यान्या सुरासुरविमर्दिनी ॥ लंबोष्ठी चोर्द्धकेशी च बहुशीर्षा वृकोदरी ॥३८॥ रथरेखाह्वया पश्चाच्छिरेखा तथापरा ॥ गगनवेगा पवनवेगा वेगा
च तदनंतरं ॥३९॥ ततो भुवनपालाख्या ततः स्यान्मदनातुरा ॥ अनंगानंगमदना तथैवानंगमेखला ४०॥ अनंगकुसुमा विश्वरूपासुरभयंकरी ॥ अक्षो
भ्या सत्यवादिन्यौ वज्ररूपा शुचिव्रता ॥४१॥ वरदाख्या च वागीशा चतुःषष्टिः समीरिताः ॥ चापबाणधराः सर्वा ज्वालाजिह्वाः समीरिताः ॥४२॥ दंष्ट्रिण्य
श्चोर्द्धकेश्यस्ताश्च ध्योपक्रांतमानसाः ॥ सर्वाभरणसंदीप्ताः पूजनीयाः प्रयत्नतः ॥४३॥ लोकेशाः पूर्ववत्पूज्यास्तद्वद्वज्रादिकान्यपि ॥ इत्थं यः पूज
येन्मंत्री श्रीभूतलिपिदेवतां ॥४४॥ श्रीवाण्योः संभवेद्भूमिर्देवैरप्यभिवंद्यते ॥ कमलै रसतं हुत्वा राजानं वशमानयेत् ॥४५॥ उत्पलैर्जुहुयात्त
स्य महालक्ष्मीः प्रजायते ॥ पलाशकुसुमैर्हुत्वा वत्सरेणा कविर्भवेत् ॥४६॥ राजीलवणहोमेन वनितां वशमानयेत् ॥ मातृकोक्तानि कर्माणि कु
र्यात्तत्रापि साधकः ॥४७॥ भूतलिप्या तु ठीकृत्य यो मंत्रं भजते नरः ॥ क्रमोत्क्रमात् शतावृत्त्या तस्य सिद्धो भवेन्मनुः ॥४८॥ सुषुम्ना भुजगाकारां कुंडलीं मध्य
वर्त्मना संगमय्य परं स्थानं प्राणान्वितां परामृतैः ४९ प्लावयेन्मूर्द्धि मूलांतं योगो यं सर्वसिद्धिदः ॥ अनया न्यस्तदेहस्तु तेजसा भास्करो भवेत् ॥५०॥ यं
त्रक्रियाविशेषाञ्ज्ञात्वा कर्माणि साधयेत् ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry



तान्येवयंत्राणिस्पष्टीकर्तुमारभते॥ विंद्वाढ्यमित्यादिना॥ अत्रायंनिगूढार्थः॥ विंद्वाढ्यंगगनंसानुस्वारंहकारंशिवयुक्तंएकारयुक्तंततश्चज्ञानिनेनमः॥ इतिभवतिअष्ट
दलंपद्मंविरच्यकर्णिकायांहंहेंज्ञानिनेनमइतिसाध्यसंवंध्यक्षराणिविलिखेत्॥ तस्यनामाद्यंतसिद्धादिकोष्टमध्येयस्मिन्कोष्टेतिष्ठतितत्कोष्टगताक्षराणितस्यवं
ध्वक्षराणितैःसहलिखेदित्यर्थः॥ पृथ्वीपत्रेषुप्रत्येकंआकाशवर्णान्॥ एकैकंहकारपुटितंकृत्वालिखेत्॥ कायंहंअंहंएंहंहंडंहंजंहंणंहंनंहंमंहंशंहं॥ ॥ ॥
इत्यनेनप्रकारेणहकारस्यापिपुटितत्वात्॥ एकमक्षरमवशिष्टंभवति॥ तदत्यपत्रेहकारेणपुटितंकृत्वालिखेत्॥ तथाचांत्यपत्रेवर्णत्रयंभवेत्॥ तत्पत्रेआकाशमंडलेनवे

विंद्वाढ्यंगगनंततस्वशिवयुक्ज्ञानीचतुर्थ्याप्लुतोनत्यंतोमनुरेषमध्यविहितःसाध्यस्यवंध्वक्षरैः पत्रेष्वक्षरशोहकारपुटितांस्तद्व
तवर्णाल्लिखेत्क्षितिश्चांत्यदलेविलिख्यमतिमान्वृत्तेनसंवेष्टयेत्॥ ५१॥ विषयंत्रमिदंप्रोक्तंलाक्षाचंदननिर्मितं॥ रोहिण्यामुद
येराहोर्विषघ्नंसर्वशांतिदं॥ ५२॥ योद्वौसास्यधरेंदुखंडशिरसौस्यातांक्रमात्ङेयुतंकोपेशंनमसान्वितंविरचयेन्मध्येदलेष्वष्टसु॥
वापव्यान्पपुटान्विलिख्यविधिनाशिष्टार्णमंत्येदलेयंत्रंवायुगृहेणवेष्टितमिदंस्यात्तालपत्रस्थितं॥ ५३॥ सात्यामंदोदयेयंत्रंवा
यव्यंनिखनेद्द्विषः॥ द्वार्येच्चाटनकृतस्यमृतिर्वाभवतिध्रुवम्॥ ५४॥

पृथ्वीतत्वाद्विपत्रंविधिनाहत्वेतफलम्॥

यो द्वाविति। अष्टदलं पद्मं कमलं कृत्वा कर्णिकायां पकारद्वयं साक्षि अक्षिशब्देन इकारः। अधरएकारः इंदुखंडं विंदुः क्रमेणैतदुक्तं। पकारद्वयं अंतश्चेति लिखेत्। पु
नस्तत्रैव कोपेशं इति वा तत्स्वहूं नम इति भवति॥ कोपेशाय नमः॥ इति स्वरूपमित्यन्ये दलेषु अष्टसु वा षड्वर्णान् पकारेण पूर्ववत् पूरितान्। अंत्यदले लिखेत्॥ पद्मं वा पुनः मं
डलेन वेष्टयेत्। एतद्वायुयंत्रं सम्यक् फलदं॥ वह्नेर्बीजमिति॥ रकारद्वयं अग्रवर्णा उकारः सद्यः ओकारः। अर्द्धेन्दु अनुस्वारः। क्रमेण संबध्यते। एतदुक्तं भवति॥ अष्टदलं
विरच्य रुं रों इति लिखेत् स्वरौ रोः फट् इति रूपं हृच्छब्देन नम इति॥ ततश्च स्वरौ रोः। फट् नमः इति लिखेत्। छदेषु वह्नि वर्णान् वह्निपूरितान् पूर्ववत् साध्यनामाक्षरसाध्य

वह्नेर्बीजयुगं क्रमाच्छ्रवणसद्यार्द्धेन्दुयुक्तं स्यात्स्वरौ रोः फट् हृन्मनुरेष मध्यविहितः पत्रेषु वह्न्युद्भवान् वर्णान्वह्निनिरोधितान् प्रविलि
खेत्साध्याक्षरैः पोषकैः रंत्यं चान्त्यदले कृशानुपुरगं भूर्जोदरे कल्पितं॥५४॥ शुभवारर्क्षसंयोगे लाक्षाकुंकुमनिर्मितं॥ रक्षाकृत्सर्व
भूतानां पंचमाग्नेयमीरितं ५५॥ घातकाक्षरमिश्रं तत्कृत्तिकायां कुजोदये॥ चितांगारेण तद्वस्त्रे लिखितं नाशयेद्रिपुं ५६ नासार्द्धेन्दुम
द्रवतन्मनुयुतं सार्द्धेन्दु डें तो विदुर्विध्वतेजु भुवे नमो निगदितो मध्ये मनुर्वारुणान्॥ वर्णान्यत्र पुटेषु वाक्षरपुटान्साध्यस्य वध्वक्षरैरा
लिख्याप्पुरेण वेष्टितमिदं यंत्रं भवेद्वारुणं॥५७॥ भूर्जपत्रे लिखेदेतत् रक्तचंदनवारिणा॥ वरुणार्क्षोदये कार्यं यंत्रं वश्यादिकृद्भवेत् ५८
गंडो विंदुविभूषितो वसुमती स्यात्तादृशी गंडयोर्मध्यस्थौ नुजगौ लुकेन तिरिमं मंत्रं लिखेन्मध्यतः॥ लांतान्वर्णपुटीकृतान्वसुमती
वर्णान्दलेष्वालिखेत्स्वावर्णपुतान्यथाविधिभुवोगेहेन संवेष्टयेत्॥५९॥ ज्येष्ठायां मुदिते सौम्ये मृद्गैरिकनिर्मितं॥ पार्थिवं यंत्र
मचिरात्सर्वस्तंभकरं भवेत्॥६०॥ गत्वा कृत्वा तरां नित्यां श्रीभूतलिपिदेवतां॥ यः सेवते शुभैः पुत्रैर्धनधान्यैश्च पूर्यते ६१ अविरूरु
पासंरुद्धेः दवाग्वादिनि ठद्वयं॥

कोष्ठगताक्षरैर्लिखेत्। अंत्यमक्षरं मंत्यच्छदे॥ अग्निमंडलेन पद्मं वेष्टयेत्॥ इदमाग्नेयं यंत्रं उक्तफलदं भवति॥ इत्यमेव
यंत्रं साध्यघातकाक्षरसहितं। अश्विनीकोष्ठगताक्षरसहितं कृत्तिकायां भौमोदये चितांगारेण प्रेतवस्त्रे लिखेत्॥ इदमुक्तफलदं॥ नासार्द्धेन्दु द्वितीय नासा रेफः अर्द्धेन्दुः अनुस्वारः
तद्द्वंद्वं वं इति भवति॥ मनुयुतां वक्ष्यमाणमंत्रयुतं तन्मंत्रमुद्धरति॥ अर्द्धेन्दुरिति अर्द्धेन्दुरनुस्वारतत्सहितः डें तं च तुर्थ्यंतः। विधस्वरूपं। पुनस्तदंते भवेत्स्वरूपं॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ ति॰ टी॰ भू॰ ३९

नमः इति स्वरूपं अयं मंत्रः षोडशदले कमलं कृत्वा तत्कर्णिकायां विधुवेविधुभुवेनमः इति लिखेत्॥ तत्पत्रेषु रेखया रुणान्वर्णान् वकारपुटितान् पूर्ववद्दृंद्ध्वसर
सहितान् विलिख्य॥ अस्य पुरेणा वेष्ठ्य सम्यक् साधिते यथोक्तफलसिद्धिः॥ गंडो विंदुरिति गः उः लकारः विंदुभूषितः अनुस्वारसहितः॥ वसुमती वीजं ग्लौं॥ ता
दृशौ विंदुमती गंडयोर्मध्यस्थो जगौ गंडपोलकारयोर्मध्ये जकारगकारौ लिखेत्॥ कर्णिकामध्ये जकारगकारौ लिखेत् कर्णिकामध्ये ग्लौं लं जं गं लं इत्युकेन मर
ति विलिख्य दलेषु ऌकाराणि पुटितान् वसुमती वर्णान् साध्यसुसिद्धको ष्ववर्णसहितान् लिखेत्॥ अंत्यमंत्ये पत्राशे पद्मभूगृहे राव ष्टुपेत्॥ एतत्पार्थिवं यंत्रमुक्तविधि

वागीश्वर्या दशार्णो यं मंत्रो वाग्विभवप्रदः॥ ६३॥ ऋषिः कण्वो विराट् छंदो देवता वाक् समीरिता॥ शिरः श्रवणदृङ्नासावदनां धुगु
देषि मान् दृङ्न्यस्यार्णान् प्राग्वदंगानि मातृकोक्तानि कल्पयेत्॥ तरुणशकलमिंदोर्विभ्रती शुभ्रकांतिः कुचभरनमितांगी सन्नि
षण्णा सिताब्जे॥ निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिध्यै पातु वाग्देवता नः॥ ६४॥ दशलक्षं जपेन्मंत्रं दशांशं
जुहुयात्ततः॥ पुंडरीकैः पयोभ्यक्तैस्तिलैर्वा मधुराप्लुतैः॥ ६५॥ मातृकोदीरिते पीठे वागीशीमर्चयेत्सुधीः॥ वर्णाब्जेनासनं दद्यान्मू
र्तिं मूलेन कल्पयेत्॥ ६६॥ आदावंगानि संपूज्य पश्चाच्छक्तीरिमा यजेत्॥ योगा सत्या च विमला ज्ञाना बुद्धिः स्मृतिः पुनः॥ ६७॥
मेधा प्रज्ञा च पत्रेषु मुद्रापुस्तकधारिणीः॥ दलाग्रेषु समभ्यर्च्या ब्राह्म्याद्या मातरस्तथा यथाविधि॥ ६८॥ लोकपालान् बहिः पूज्यास्तेषामस्त्रा
णि तद्बहिः॥ एवं संपूजयेन्मंत्री जपहोमादितत्परः॥ ६९॥ ब्रह्मचर्यरतः शुद्धः शुद्धदंतनखादिकः॥ संस्मरन्सर्ववनिताः सततं दे
वताधिया॥ ७०॥

नाकृतं सम्यक्फलदं॥ अतिरोहितार्थमन्यत्॥ अत्रिरिति॥ अत्रिर्दकारः वरुणो वकारः तेन रुद्धः पुटितः दवाग्वादिनि स्वरूपं ठद्वयं
स्वाहाकारः ततश्च वदवदवाग्वादिनि स्वाहा॥ इति सिद्धं॥ अक्षरन्यासस्थानान्याह॥ शिर इत्यादिना॥ अंधुः गल्यं॥ पुस्तकश्रीः पुस्तकमेव॥ उत्तरो ग्रंथः स्व
ष्टार्थः॥ मुद्रा व्याख्यानमुद्रा॥ मंत्रांतरमुद्धरति॥ हृदयेत्यादिना॥ हृदयांतेन मः॥ शर्वांते भगवति स्वरूपं॥ वदश स्वयुगं स्वरूपं॥ वाग्देवि स्वरूपं॥ वह्निजाया स्वाहा॥ का
रः॥ वाग्वाद्यं ऐकाराद्यं षड्भिः पदैरिति॥ ऐं नमो भगवति वद वद वाग्देवि स्वाहा॥ इति पदच्छेदः॥ विद्या पुस्तकं॥ अतिरोहितार्थमन्यत्॥ मंत्रांतरमाह॥ तारमिति॥ तारं

शारदा॰ सागमा॰ टीका॥ राम॰ ३९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ रः। ऐकारः। विंदुरनुस्वारः। शक्तिः हृल्लेखा। पुनः प्रणवः। सरस्वती स्वरूपं ईं· तं चतुर्थ्यंतं। नत्यंतं कास्वरूपं ततस्त्वा॥ ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः। इत्येकाद

कवित्वंलभतेधीमान्मासैर्द्वादशभिर्ध्रुवं॥कृत्वातन्मंत्रितंतोयंसहस्रंप्रत्यहंपिवेत्॥७१॥महाकविर्भवेन्मंत्रीवत्सरेण।नसंशयः।उरोमा
त्रेजलेस्थित्वाध्यायेन्मार्तंडमंडले॥७२॥स्थितांदेवींप्रतिदिनंत्रिसहस्रंजपेन्मनुं॥लभतेमंडलात्सिद्धिंवाचामप्रतिमांभुवि॥७३॥
पलाशविल्वकुसुमैर्जुहुयान्मधुरोक्षितैः॥समिद्भिर्वात्तदुत्याभिर्यशःप्राप्नोतिवाक्पतेः॥७४॥होमोयंसर्वसौभाग्यलक्ष्मीवश्य
प्रदोभवेत्॥राजवृक्षसमुद्भूतैःप्रसूनैर्मधुराप्लुतैः॥७५॥तत्समिद्भिश्चजुहुयात्सवित्तमतुलंलभेत्॥इत्थंदशाक्षरीप्रोक्तासिद्धयेवा
चमिच्छतां॥७६॥हृदयांतेभगवतिवदद्वयंवग्गंपुनः॥वाग्देविवह्निजायांतंवाग्भवाद्यंसमुद्धरेत्॥७७॥मनुःषोडशवर्णाढ्यंवागै
श्वर्यफलप्रदं॥मनोःषड्भिःपदैःकुर्यात्षडंगानिसजातिभिः॥७८॥शुभ्रांस्वच्छविलेपमाल्यवसनांशीतांशुखंडोज्ज्वलां॥व्याख्या
मक्षगुणंसुधाढ्यकलशंविद्यांचहस्तांबुजैः॥विभ्राणांकमलासनांकुचनतांवाग्देवतांसुस्मिताम्॥वंदेवाग्विभवप्रदांत्रिनयनांसौ
भाग्यसंपत्करीं॥७९॥हविष्याशीजपेल्लक्षंवसुलक्षमनन्यधीः॥दशांशंजुहुयादंतेतिलैराज्यपरिप्लुतैः॥८०॥मातृकोक्तेयजेत्पी
ठेदेवींप्रागीरितक्रमात्॥पिवेतन्मंत्रितंतोयंप्रातःकालेदिनेदिने॥८१॥विद्वान्मत्सरतोमंत्रीभवेन्नास्तिविचारणा।अभिषिंचेज्जलैर्जप्तै
रात्मानंस्नानकर्मणि॥८२॥तर्पयेत्तांजलैःशुद्धैरतिमेधामवाप्नुयात्॥पुष्पगंधादिकंजप्तंसर्वंतद्धारयेत्सुधीः॥८३॥सभायांपूज्यतेस
द्भिर्वादेनविजयीभवेत्॥तारोमायाधरोविंदुःशक्तिस्तारंसरस्वती॥८४॥ङेंतानत्यंतिकोमंत्रःप्रोक्तएकादशाक्षरः॥ब्रह्मरंध्रेभ्रुवोर्मध्येन
वरंध्रेषुतत्क्रमात्॥८५॥मंत्रवर्णान्न्यसेन्मंत्रीवाग्भवेनांगकल्पना॥वाणींपूर्णनिशाकरोज्ज्वलमुखींकर्पूरकुंदप्रभांचंद्रार्धांकितमस्तकां
निजकरैःसंविभ्रतीमादरात्॥वीणामक्षगुणंसुधाढ्यकलशंविद्यांचतुंगस्तनींदिव्यैराभरणैर्विभूषिततनुंहंसाधिरूढांभजे॥८६॥।

शाक्षरंसिध्यति॥वर्णन्यासस्थानान्याह।ब्रह्मरंध्रे।इतिवाचस्पतेऽमृतइतिस्वरूपंप्लुवःप्लुरितिचस्वरूपं।वाग्बीजादिततस्त्वा।ऐंवाचस्पतेऽमृतेप्लुवःप्लुः।एवमेकादशाक्षरो

पं१ प३ष्टः ऐंवाचस्पतेऽमृतेप्लुवःप्लुः इति जपन्नवकीज
पमाला कृतिरिहि तार्थमस्मत॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मन्त्रान्तरमाह॥तोयस्थमिति॥तोयं वकारः।तत्स्थं विष्णोः शयनं॥अनन्तः आकारः।चतुर्मुखशब्देन ब्रह्मा लक्ष्यते।तेन तद्वाकू इति।बीजं।तत्र केवलशब्देन विंदुमा
जपेद्द्वादशलक्षाणि तन्मुहस्तं सितांबुजैः नागचंपकपुष्पैर्वा जुहुयात्साधकोत्तमः॥८७॥मातृकोक्ते यजेत्पीठे वक्ष्यमाणक्रमेण तां।
वर्णाब्जेनासनं कुर्यान्मूर्तिं मूलेन कल्पयेत् ८८ देव्या दक्षिणतः पूज्या संस्कृता वाङ्मयी तनुः॥प्राकृता वामतः पूज्या वाङ्मयी सर्वसि
द्धिदा॥८९॥इष्ट्वा पूर्ववदंगानि प्रज्ञाद्याः पूजयेत्ततः।प्रज्ञा मेधा श्रुतिः शक्तिः स्मृतिर्वागीश्वरी मतिः॥९०॥स्वस्तिश्चेति समाख्याता ब्रा
ह्म्याद्यास्तदनंतरं॥लोकेशानर्चयेद्भूपस्तदस्त्राणि च तद्बहिः॥९१॥इति संपूजयेद्देवीं मासाद्वाक्वल्लभो भवेत्॥दशाक्षरीसमुक्ता
निकर्माण्यत्रापि साधकः॥९२॥वाचस्पते मृते भूयः स्तुवः स्तुरिति कीर्तयेत्॥वागाद्यो ऋषिभिः प्रोक्तो रुद्रसंख्याक्षरो मनुः॥९३॥कु
र्यादंगानि विधिवद्वागाद्यैः पंचभिः पदैः॥आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं॥बिभ्राणा तरुणेंदुबद्धमुकुटा मुक्तेंदुकुंद
प्रभा॥भालोन्मीलितलोचना कुचभराक्रांता भवद्भूतये॥भूयाद्वागधिदेवता मुनिगणैरासेव्यमानानिशं॥९४॥रुद्रलक्षं जपेन्मंत्रं दशां
शं जुहुयाद्घृतैः॥मातृकाकल्पिते पीठे पूजयेत्तां यथाविधि॥९५॥पलाशकुसुमैर्हुत्वा परां सिद्धिमवाप्नुयात्॥कदंबकुसुमैस्तद्वत्फलैः
श्रीवृक्षसंभवैः॥९६॥अचिराच्छ्रियमाप्नोति वाचा कुंदसमुद्भवैः॥नंद्यावर्तप्रसूनैर्वा हु वाग्वल्लभो भवेत्॥९७॥ब्राह्मीरसेन चाक
ल्केन कपिलाज्यं पिबेज्जपन्॥पिबेद्दिनादौ तं नित्यं सर्वशास्त्रार्थविद्भवेत्॥९८॥अनया विद्यया जप्तं ब्राह्मीपंचप्रभक्षणात्॥नविस्म
रति मेधावी श्रुतवेदागमान्पुनः॥९९॥बहुना किमियं विद्या जपतां कामदा मणिः॥तोयस्थं शयनं विष्णोः सकेवलचतुर्मुखं॥१००॥विं
दुर्धीशयुतो वह्निर्विंदुसद्यौ उमान्भृगुः॥उक्तानि त्रीणि बीजानि सद्भिः सारस्वतार्थिना १०१ अंगानि कल्पयेद्बीजैर्द्विरुक्तैर्जातिसंयुतैः
मुक्ताहारवदातां शिरसि शशिकलालंकृतां बाहुभिः स्वैर्व्याख्यां वर्णाक्षमालां मणिमयकलशं पुस्तकं चो दधानां॥आपीनोत्तुंगवक्षोरुहभर
विनमन्मध्यदेशां मधीशां वाचामीडे चिराय त्रिभुवननमितां पुंडरीके निषण्णां॥१०२॥ ९ ऐं गृह्यते।तत्र ऐं रों रु इति सिद्धं विंदुर्धीशयुक्तो वह्निः॥विं

उवकारः स्वीणकारः तत्स्थं शयनो वह्निः रेफः॥तः ष्टं
पद्मतिहिरण्यं मियदा विंदुः ... ओकारः।

अत्रुवकारः।भृगुःसकारः।ततश्चन्द्रतीपंबीजं।स्त्रौंइतिसिद्धं।स्यष्टार्थमपरं॥व्याख्यानमुद्रादिनागमेप्रातः।पिण्याकतिलोच्छिष्टे।अंग्रभाषायां।तेन्पुषकपिंडीसुग
त्रिलसंप्रजपेन्मंत्रंजुहुयात्तद्दशांशतः॥पायसेनाज्यसिक्तेनसंस्कृतेहव्यवाहने॥१०३॥वागीशींपूजयेत्प्रौढविधिनामातृकोदिते
।प्राक्प्रस्तुतेनमार्गेणप्रत्यहंसाधकोत्तमः॥१०४ व्याघातकुसुमैर्हुत्वावाक्सिद्धिमतुलांलभेत्॥जातीपुष्पैःसितांभोजैःसितैःचंद
नवारिणा॥१०५॥नंद्यावर्तैशुभैःकुंदैर्हुत्वावाक्सिद्धिमाप्नुयात्।जपन्बीजत्रयंमंत्रीसभायांजयमाप्नुयात्॥१०७॥सितांवचांवाब्राह्मीं
वाजस्रावादेद्दिनागमे॥मेधांकामानवाप्नोतिसाधकोनात्रसंशयः॥१०८॥एवमुक्तेषुमंत्रेषुदीक्षितोपतमाननः।एवंयोभजतेभक्त्या
समवेद्भुक्तिमुक्तिभाक्॥१०९॥सुसितैर्गंधकुसुमैःपूजासारस्वतेविधौ॥दूर्वाबीजांकुरंपुष्पं ———— राजवृक्षसमुद्भवं॥११०॥उत्पला
निप्रशस्तानिसिंदुवारांकुराणिच भजन्सारस्वतींनित्यंएतानिपरिवर्जयेत्।१११आम्रातंगृंजनंबिल्वंकलंजंलशुनंतथा॥तैलप
लांडुपिण्याकंशार्ङ्गंपरमपिभोजने ११२ सर्वंपर्युषितंत्याज्यंसदासारस्वतार्थिनां॥नाचरेन्निशितांचूलंस्त्रियंगच्छेद्दिवानच११३नसं
ध्ययोःस्वपेज्ज्ञातुनाशुचिःकिंचिदुच्चरेत् प्रदोषेषुभवेन्मौनीदिग्वस्त्रांनविलोकयेत् ११४ नपुष्पितांस्त्रियंगच्छेन्ननिंदेद्वामलोचनां।
नमृषावचनंब्रूयान्नाक्रमेत्पुस्तकंसुधीः॥११५॥अक्षराढ्यानिपत्राणिनोपेक्षेतनलंघयेत्॥चतुर्दश्यष्टमीपर्वप्रतिपद्ग्रहणेषु
च ११६॥संक्रमेषुचसर्वेषुविद्यांनैवपठेद्द्विजः॥व्याख्यानेसंत्यजेन्निद्रामालस्यंजृंभणांवधः ११७ क्रोधंनिष्ठीवनंतद्वन्नीचांगस्पर्श
नंतथा॥मनुष्यसर्पमार्जारमंडूकनकुलादयः॥११८॥अंतरायदिगच्छेयुस्तदाव्याख्यांपरित्यजेत्॥निशासुदीपध्वंसेषुपाठंसद्यःप
रित्यजेत्॥११९॥ज्ञात्वादोषानिमान्सम्यक्भक्त्यायोभारतींयजेत्॥वाचांसिद्धिमवाप्नोतिवाचस्पतिरिवापरः॥१२०॥श्रींह्रीं॥इतिश्रीशा
रदातिलकेसरस्वत्याःसप्तमःपटलः॥ ममन्यत्न॥इतिगूढार्थदीपिकायांसप्तमःपटलः॥७॥ समाप्तः ॥ ७ ॥ श्री॥ श्री॥

सा·ति· अनंतरं श्रीमंत्रान् कुमार भते॥ अथेत्यादिना॥ तत्र प्रथममेकाक्षरमंत्रमुद्धरति॥ वांतः शकारः। वह्निः रेफः। वामनेत्रं ईकारः। इंदुः विंदुः। ततश्च श्रीं इति सिद्ध

टी·पू· ॐ॥ अथ वक्ष्ये श्रियो मंत्रान् श्रीसौभाग्यफलप्रदान्॥ यस्याः कृपाक्षमात्रेण त्रैलोक्यमपि वर्द्धते॥१॥ वांतं वह्निसमारूढं वामनेत्रेंदुसंयुतं

३३ ॥ वीजमेतत् श्रियः प्रोक्तं चिंतामणिरिवापरः॥२॥ ऋषिर्भृगुर्निचृच्छंदो देवता श्रीः समीरिता॥ दीर्घयुक्तवीजेन कुर्याद् अंगानि षट्

क्रमात्॥३॥ कांत्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियं॥ विभ्राणां वर

मब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमावद्धनितंवविंवलसितां वंदेरविंदस्थितां॥४॥ भानुलक्षं जपेन्मंत्रं दीक्षितो विजितेंद्रियः

श्रियमभ्यर्चयन्नित्यं सुगंधिकुसुमादिभिः॥५॥ तत्सहस्रं प्रजुहुयात्कमलैर्मधुरोक्षितैः॥ जपांते जुहुयान्मंत्री तिलैर्वा मधुराप्लुतैः

॥६॥ वैल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः॥ अत्र सम्यग्यजेत्पीठं नवशक्तिसमन्वितं॥७॥ विभूतिरुन्नतिः कांतिः सृष्टिः की

र्तिश्च सन्नतिः। उष्टिरुत्कृष्टिर्ऋद्धिश्च संप्रोक्ता नवशक्तयः॥८॥ अत्रावाह्य यजेद्देवीं परिवारसमन्वितां॥ वीजाढ्यमासनं दत्वा मूर्तिं

मूलेन कल्पयेत्॥९॥ यजेत्पूर्ववदंगानि दिग्दलेष्वर्चयेत्ततः॥ वासुदेवं संकर्षणं प्रद्युम्नमनिरुद्धकं॥१०॥ हिमपीततमालेंद्रनीलाभान्पी

तवाससः॥ शंखचक्रगदापद्मधारिणस्तान् चतुर्भुजान्॥११॥ विदिग्दलेषु पत्रेषु दमकादीन्यजेद्गजान्। दमकं सलिलं चैव गुग्गुलुं च

कुरुंटकं॥१२॥ यजेच्छंखनिधिं देव्या दक्षिणे दयितान्वितं॥ मुक्तामाणिक्यसंकाशौ किंचित्स्मितमुखांबुजौ॥१३॥ अन्योन्यालिंग

नपरौ शंखपंकजधारिणौ॥ विलसद्रत्नवर्षाभ्यां शंखाभ्यां परिलांछितौ॥१४॥ तुंदिलं कंबुकनिधिं वसुधारां घनस्तनीं त्वामतः पंक

जनिधिं प्रियपासहितं यजेत्॥१५॥ सिंदूराभौ भुजाश्लिष्टौ रक्तपद्मोत्पलान्वितौ॥ निःसरद्रत्नधाराभ्यां पद्माभ्यां मूर्ध्नि लांछितौ॥१६॥

ति। आभूतसंप्लवं० इत्यंतः प्रातनो ग्रंथः स्पष्टार्थः॥ मंत्रांतरमाह॥ वाग्भवं ऐंकारः। विष्णोर्वनिता श्रीबीजं। मायाहृल्लेखा मकरकेतनः। कामबीजं। एवं बीजत्र

त्रयपात्मकं। अपरं लक्ष्मीमंत्रं विशदमन्यत्०॥

राम· ९३

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मंत्रांतरमुद्धरति॥दीर्घेतिः॥दीर्घः नकारः॥पादिमकारः॥ततोनमइतिसिद्धं॥ब्रह्माककारः॥भानुर्मकारः॥वसुंधरालकारः॥वासिन्येप्रियायैवह्नेः स्वाहाकारः॥

तुंदिलंपंकजनिधिंतन्वीवसुमतीमपि॥दलाग्रेषुपजेदेता वलाकाद्याः समंततः॥१७॥वलाकीविमलाचैवकमलानवमालिका॥वि

भीषिकाभालिकाचशांकरीवसुमालिका॥१८॥पंकजद्वयधारिण्योमुक्ताहारसमप्रभाः॥लोकेशान्पूजयेदंतेवज्राद्यस्त्राणितद्वहिः

॥१९॥इत्थंयोभजतेदेवींविधिनासाधकोत्तमः॥धनधान्यसमृद्धिःस्याच्छ्रियमाप्नोत्यनिंदितां॥२०॥वक्षःप्रमाणेसलिलेस्थित्वा

मंत्रमिमंजपेत्॥त्रिलक्षंसंयतोमंत्रीदेवींध्यात्वार्कमंडले॥२१॥सभवेत्पकालेनरमायावसतिः स्थिरः॥विष्णुगेहस्थविल्वस्यमूल

मास्थायमंत्रवित्॥२२॥त्रिलक्षंप्रजपेन्मंत्रंवांछितंलभतेधनं॥अशोकवह्नौजुहुयात्तंडुलैराज्यतोक्षितैः॥२३॥वशयत्यचिरादे

वत्रैलोक्यमपिमंत्रवित्॥जुहुयात्तंडुलैः शुद्धैरकाग्नौनियतंवशी॥२४॥राज्यश्रियमवाप्नोतिराजपत्रोमहीपसीं॥जुहुयात्खादिरेव

ह्नौतंडुलैर्मधुरोक्षितैः॥२५॥राजावश्योभवेच्छीघ्रंमहालक्ष्मीश्चवर्द्धते॥विल्वच्छायामधिवसन्विल्वमिश्रहविष्यभुक्॥२६॥

संवत्सरद्वयंहुत्वातत्फलैरयवावजेः॥साधकेद्योमहालक्ष्मींचक्षुषापश्यतिध्रुवं॥२७॥हविषाघृतसिक्तेनपायसेनससर्पिषा॥हुत्वाश्रि

यमवाप्नोतिनियतंमंत्रवित्तमः॥२८॥मधुरात्ताक्तरुराभोजैर्जुहुयाल्लक्ष्मरात्॥नमुंचतिरमातस्यवंशमाहूतसंप्लवं॥२९॥वाग्भवंवनिताबि

श्रोर्मायामकरकेतनः॥चतुर्वीजात्मकोमंत्रश्चतुर्वर्गफलप्रदः॥३०॥अंगानिकुर्यादीर्घाढ्यरमाबीजेनमंत्रवित् ॥माणिक्यप्रतिमप्रभां

हिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानांमुदा॥हस्ताब्जैर्वरदानमंबुजयुगाभीतीर्दधानांहरेः॥कांतांकांक्षि

तपारिजातलतिकांवंदेसरोजासनां ३१ भानुलक्षंहविष्याशीजपेदंतेसरोरुहैः॥जुहुयादरुणैःफुल्लैःतत्सहस्रंजितेन्द्रियः३२रमायाःकल्पिते

पीठेतद्विधानेनपूजयेत्॥कुर्यात्प्रयोगांस्तत्रस्थान्मनुनातेनसाधकः ३३निधिभिःसेव्यतेनित्यंमूर्तिमद्भिरुपासितैः॥दीर्घायादिर्विसर्गांतोब्रह्मा

भानुर्वसुंधरा ३४वांतेसिन्येप्रियावह्नेर्मनुप्रोक्तोदशाक्षरः॥ऋषिर्दक्षोविराट्छंदोदेवताश्रीःसमीरिता ३५देव्येहृदयमाख्यातंपश्चिन्येशिरईरितं।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ततोनमःकमलवासिन्यैस्वाहाइतिसिद्धं॥३६॥देव्यैनमोहृदयायपद्मिन्यैनमःशिरसे॥विष्णुपत्न्यैनमःशिखायै॥वरदायैनमःकवचायहुं॥कमलरूपायैअस्त्रा
यफट्॥एवंप्रकारेणप्रणवादिकाअंगमंत्राः३९॥अतिरोहितार्थशेषं॥४८॥मंत्रांतरमाहावाग्भवमिति॥४९॥वाग्भवंऐं॥शंभुवनिताभुवनेश्वरी॥रमावीजंश्रीवीजं॥
मकरकेतनं॥कामवीजं॥तार्तीयंसौं॥जगत्स्वरूपं॥पार्णःपकारः॥वह्निवीजेनरकारेणयुतः॥अर्घीशऊकारःभृगुःसकारःत्यैस्वरूपं॥हृन्नमः॥४९॥ततएतत्सिद्ध्यति॥

अस्त्रंकमलरूपायैनमोंताःप्रणवादिकाः॥अंगमंत्राःसमुद्दिष्टाध्यायेद्देवीमनन्यधीः॥३७॥ध्यानम्॥आसीनासरसीरुहेस्मितमुखीह
स्तांवुजैर्बिभ्रती दानंपद्मयुगाभयेचवपुषासौदामिनीसंनिभा॥मुक्तादामविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वःकमलाकटा
क्षविभवैरानंदयंतीहरिं॥३८॥दशलक्षंजपेन्मंत्रंमंत्रविद्विजितेंद्रियः॥दशांशंजुहुयान्मंत्रीमधुराक्तैःसरोरुहैः॥३९॥श्रीपीठेपूजयेद्देवीं
अंगानिप्रथमंयजेत्॥वलाकाद्यास्ततःपूज्यालोकेशास्त्रीवृतीरपि॥४०॥इतिसंपूजयेद्देवींसंपदामालयोभवेत्॥समुद्रगायांसरितिकं
ठमात्रेजलेस्थितः॥४१॥त्रिलक्षंप्रजपेन्मंत्रीसाक्षाद्वैश्रवणोभवेत्॥आराध्योत्तरनक्षत्रेदेवींस्वकुचंदनादिभिः॥४२॥नंद्यावर्तभवैःपुष्पैः
सहस्रंजुहुयात्ततः॥पौर्णमास्यांफलैर्वैल्वैर्जुहुयान्मधुराप्लुतैः॥४३॥पंचम्यांविशदांभोजैःशुक्रवारेसुगंधिभिः॥अन्यैर्वाविशदैःपुष्पैःप्र
तिमासंविशालधीः॥४४॥सभवेद्व्व्यमात्रेणसर्वदासंपदांनिधिः॥वाग्भवंशंभुवनितारमामकरकेतनः॥तार्तीयंहिजगत्पार्शोवाह्नवीज
समुज्ज्वलः॥४५॥अर्धीशाद्योभृगुस्त्यैहृन्मंत्रोयंद्वादशाक्षरः॥महालक्ष्म्याःसमुद्दिष्टःताराद्यःसर्वसिद्धिदः॥ ४६॥ऋषिर्ब्रह्मासमुद्दि
ष्टःछंदोगायत्रमीरितं॥देवताजगतामादिर्महालक्ष्मीःसमीरिता॥४७॥हस्तौसंशोध्यमंत्रेणताराद्दिहृदयांतिकं॥वीजानांपंचकंन्यस्येद्दृग
लीपुयथाक्रमं ४८

ऐंह्रींश्रींक्लींसौं॥जगत्प्रसूत्यैनमःइति॥उद्यानवर्णानयंयःस्पष्टार्थः॥अत्रहिमांशु॥काश्मीरंकुंकुमं॥मतालिमालामत्तभृंगमाला॥धम्मिल्लंकै
शवंधनं ९१ शंकरनंदनमृगगणनाथं॥षण्मुखंवा १२३जन्तुसूर्य ९५सुतेगंगायमुने॥९८॥११६दिग्गजान्दर्शयति॥ऐरावतेत्यादिना ९१कृत्वानवपदान्यतःप्राक्तनःस्पष्ट॥

मंत्रशेषं न्यसेन्मंत्री तलयोरुभयोरपि॥ मूर्धादिचरणं यावत् मंत्रेण व्यापकं न्यसेत्॥४९॥ मूर्धादिवक्षोगुह्यांघ्रौ पंचबीजानि विन्यसेत्॥ शेषान्न्यसे
त्सप्तवर्णान् हृदये सप्तधातुषु॥५०॥ अंगानि पंचभिर्बीजैरस्त्रं शिष्टाक्षरैर्भवेत्॥ ज्ञानैश्वर्यादिभिर्युक्तैश्चतुर्थ्यैतैः सजातिभिः ५१ ज्ञानमैश्वर्यशक्ती
च बलवीर्यसतेजसी॥ ज्ञानैश्वर्यादयः प्रोक्ताः षट्क्रमादंगदेवताः॥५२॥ एवं न्यस्तशरीरोसौ स्मरेद्ध्यानमुत्तमं॥ चंपकाशोकपुंनागपाटलैरुपशो
भितं॥५३॥ लवंगमालतीबिल्वदेवदारुनमेरुभिः। मंदारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः।५४। चंदनैः कर्णिकारैश्च मातुलिंगैश्च वंजुलैः
॥ दाडिमीलकुचांकोलैः पूगैः कुरवकैरपि ५५ कदलीकुंदमंदारनालिकेरैरलंकृतैः। अन्यैः सुगंधिपुष्पाद्यैर्वृक्षसंघैश्च मंडितं ५६ मालतीम
ल्लिकाजातीकेतकीशतपत्रकैः। पारतीतुलसीनंद्यावर्तैर्दमनकैरपि॥५७॥ सर्वर्तुकुसुमोपेतैर्नमद्भिरुपशोभितं॥ मंदमारुतसंभिन्नकुसुमामो
दिदिङ्मुखम्॥५८॥ तस्य मध्ये सरोत्फुल्लैः कुमुदोत्पलपंकजैः। सौगंधिकैश्च कल्हारैर्नवैः कुवलयैरपि॥५९॥ हंससारसकारंडभ्रमरैश्चक्रनाम
भिः॥ अन्यैः कलकलारावैर्विहंगैरुपशोभितं ६० महासरसि तन्मध्ये पुलिने तिमनोहरे॥ परितः पारिजाताद्यं मंडपं मणिकुट्टिमं ६१ उद्य
दादित्यसंकाशं भास्वरं शशिशीतलं॥ चतुर्द्वारसमायुक्तं हेमप्राकारशोभितं। ६२ रत्नोपक्लृप्तिसंशोभिकपाटाष्टकसंयुतं॥ नवरत्नसमाक्लृप्ततुंग
गोपुरतोरणं ६३ हेमदंडसमालंबिध्वजावलिपरिष्कृतं॥ नवरत्नसमाबद्धस्तंभराजिविराजितं ६४ सहस्रदीपसंयुक्तदीपदंडविराजितं॥ तन्महा
टकसंक्लृप्तवातायनमनोहरं ६५ नानावर्णांशुकोद्बद्धसुवर्णशतकोटिभिः। किंकिणीमाणिकायुक्तपताकाभिरलंकृतं॥ ६६॥ जात
रूपमयै रत्नविचित्रैरतिविस्तृतैः॥ माणिक्यरत्नवैडूर्यसुवर्णमालावलीयुतैः।६७। अंतरांतरसंबद्धरत्नैर्दृष्टिमनोहरैः। विचित्रै
श्चित्रवर्णैश्च वितानैरुपशोभितं।६८। सर्वरत्नसमायुक्तं हेमकुट्टिमपुज्ज्वलं॥ केतकीमालतीजातीचंपकोत्पलकेसरैः। मल्लि
कातुलसीजातीनंद्यावर्तकदंबकैः॥ एतैरन्यैश्च कुसुमैरलंकृतमहीतलं॥७०॥ अंबुकाश्मीरकस्तूरीमृगनाभितमालकैः॥
चंदनागरुकर्पूरैरामोदितदिगंतरं॥७१॥ एवं संचिंत्य मनसा मंडपं सुमनोहरं तन्मध्ये भावयेन्मंत्री पारिजातं मनोहरं॥७२॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तस्याधस्तात्स्मरेन्मंचीरत्नसिंहासनंशुभं॥तस्मिन्संचिंतयेद्देवींमहालक्ष्मींमनोरमां॥७३॥बालार्कद्युतिमिंदुखंडविलसत्कोटीरहारोज्वला
रत्नाकल्पविभूषितांकुचनतांशालैःकरैःमंजरी।पद्मेकौस्तुभरत्नमप्य विरतंसंविभ्रतीसस्मितांफुल्लांभोजविलोचनत्रयपुतांध्यायेत्परांदे
वतां॥७४॥सिंजन्मंजीरसंशोभिपदांभोजविराजितां॥नवरत्नगणाकीर्णकांचीदामविभूषितां॥७५॥मुक्तामाणिक्यवैडूर्यसंबद्धोदरबंधनां॥विभ्रा
जमानांमध्येनवलित्रितयशोभितां॥७६॥जाह्नवीसरिदावर्तशोभिनाभिविभूषितां।पाटीरपंककर्पूरकुंकुमालंकृतस्तनीं॥७७॥वारिवाहविनिर्मुक्त
मुक्तादाममरीयसीं॥वहंतीमुत्तरासंगंदुकूलपरिकल्पितां॥७८॥तप्तकांचनसन्नद्धवैडूर्यांगदभूषणां॥पद्मरागस्फुरद्रूपकंकणाढ्यकरांबुजां
७९ माणिक्यशकलाबद्धमुद्रिकाभिरलंकृतां॥तप्तमहाटकसंक्लृप्तमालग्रैवेयशोभितां।८०।विचित्रविविधाकल्पकंबुसंकाशकंधरां।उद्यद्दिनकरा
कारमणिताटंकमंडितां ८१ रत्नांकितलसत्स्वर्णकर्णपूरोपशोभितां॥जपाविद्रुमलावण्यललिताधरपल्लवां ८२ दाडिमीफलवीजाभदंतपंक्तिवि
भूषिताम्॥कलंककार्श्यनिर्मुक्तशरच्चंद्रनिभाननां ८३ पुंडरीकदलाकारनयनत्रयसुंदरीं।भ्रूलताजितकंदर्पकरकार्मुकविभ्रमां ८४ विलसत्तिलपु
ष्पश्रीविजयोद्यतनासिकां॥ललाटकांतिविभवविजितार्द्धसुधाकरां॥८५॥सांद्रसौरभसंपन्नकस्तूरीतिलकांकितां॥मत्तालिमालाविलसद्दल
काढ्यमुखांबुजां ८६ पारिजातप्रसूनश्रीवाहिधम्मिल्लबंधनां॥अनर्घ्यरत्नघटितमुकुटांकितमस्तकां ८७ सर्वलावण्यवसतिंभवनंवि
भ्रमश्रियः॥तेजसांजन्मभूमिंतांमहालक्ष्मीमनोहरां ८८ एवंसंचिंत्ययोदेवींहविष्याशीजितेंद्रियः॥भानुलक्षंजपेन्मंत्रंदशांशंजुहुया
त् घृतैः ८९ जुहुयाच्छ्रीफलैःपद्मैःप्रत्येकमयुतंततः।तर्पयेत्सलिलैःशुद्धैःसुगंधिरयुतंद्वयं ९० श्रीवीजस्यादितेपीठेमहालक्ष्मींप्रपूजये
त्।श्रीवीजेनासनंदद्यान्मूर्तिंमूलेनकल्पयेत् ९१ पूजयेद्दक्षिणेपार्श्वेदेव्याःशंकरनंदनं।अन्यतःपुष्पधन्वानंपुष्पांजलिकरंयजेत् ९२ अं
गानिपूर्वमुक्तेषुस्थानेषुविधिवद्यजेत् उमाद्याःपत्रमध्यस्थाःशक्तीरष्टौयजेत्क्रमात्।९३ अथोमाश्रीसरस्वत्योदुर्गाधरणिसंयुता।गायत्रीदेवपा
चैवपद्महस्ताःसुभूषणाः ९४ जह्नुसूर्यसुतेपूज्येपादप्रक्षालनोद्यते॥शंखपद्मनिधीपूज्यौपार्श्वयोर्धृतचामरौ ९५ धृतातपत्रंवरुणंपूजयेत्पश्चि

संपूज्यराशीन्परितोयजेदथनवग्रहान्॥९६॥अर्चयेद्दिग्गजान्दिक्षुचतुर्दंतविभूषितान्।ऐरावतःपुंडरीकोवामनःकुमुदोंजनः॥९७॥पुष्पदंतः
सार्वभौमःसुप्रतीकश्चदिग्गजाः।अभ्यर्च्चयेदथेंद्रादीनतदस्त्राणिवहिर्यजेत् ९८॥आगमोक्तेनविधिनासुगंधैःसुमनोहरैः।पूजयेद्गंधपुष्पाद्यैर्दे
वीमन्वहमादरात्।९९।दूर्वाभिराज्यसिक्ताभिर्जुहुयाद्दापयेन्नरः।दशरात्रंसमिद्धेऽग्नौअष्टोत्तरसहस्रकं॥१००गुडूचींपयसंसिक्तांजुहुयात्सप्रवासरा
अष्टोत्तरसहस्रंपयःसर्जीवेच्छरदांशतं १०१ हुत्वातिलान्घृताभ्यक्तान्दीर्घमायुरवाप्नुयात्॥आरभ्यार्कदिनंमंत्रीदशरात्रंदिनेदिने १०२ आज्या
क्तार्कसमिद्धोमादारोग्यंलभतेध्रुवं।कंठमात्रोदकेस्थित्वाध्यात्वादेवींदिवाकरे १०३ ऊर्ध्वबाहुर्दशशतंअष्टोत्तरमिमंहुनेत्॥आरोग्यंलभतेस
द्योवांछितान्यपिमंत्रवित् १०४ शालीभिर्जुहुतोनित्यमष्टोत्तरसहस्रकं अचिरादेवमहतीलक्ष्मीःसंजायतेध्रुवं॥१०५॥प्रसूनैर्जुहुयान्मंत्रीलं
क्ष्मीवल्लीसमुद्भवैः।नंद्यावर्तसमुत्थैश्चसिद्धार्थैश्चघृतप्लुतैः १०६ महतींश्रियमाप्नोतिमान्यतेसर्वजंतुभिः।मरीचजीरकोन्मिश्रैर्नारिकेलरा
माप्लुतैः १०७ सगुडैराज्यसंपक्वैरपूपैराज्यलोलितैः।जुहुयात्यपसाहारोमंत्रविद्विजितेंद्रियः १०८ अष्टोत्तरशतंनित्यंमंडलाद्धनदोभवेत्।हविषा
गुडमिश्रेणजुहुयादर्थवान्भवेत् १०९ जपापुष्पाणिजुहुयादष्टोत्तरसहस्रकं।गृहीतापूजयेद्रत्नमनागवल्लीसमन्वितं ११० तिलकंतनुपातेनसर्व
वश्यकरंभवेत्॥ब्रह्मवृक्षसमित्पुष्पैर्ब्राह्मणान्वशयेद्वशी १११ जातीपुष्पैश्चराजानंवैश्यान्तोत्पलैःशुभैः।शूद्रान्नीलोत्पलैर्हुत्वावशये
न्मंत्रविन्नरः ११२ पुष्पैर्मधूकजैर्हुत्वावशमानयतिस्त्रियः।कृत्वानवपदात्मानंमंडलंयंत्रभूषितं ११३ अभिषेकंप्रकुर्वीतविधिनासर्वसिद्धये।कल
शान्स्थापयेत्तेषुपदेषुशुभलक्षणान् ११४ चंदनालिप्तसर्वांगानक्षतसमन्वितान्।दुकूलवेष्टितानेतान्पूरयेत्तीर्थवारिणा ११५ नवरत्नसमा
वद्धकर्षकांचनकल्पितं।मध्यकुंभेक्षिपेत्पद्मंयंत्राढ्यंदेशिकोत्तमः ११६ चंदनोशीरकर्पूरजातीकंकोलकुंकुमं।कृष्णागरुतमालैलाद्यंतंसंपिष्य
भागतः ११७ विलोड्यसर्वकुंभेषुरत्नान्यपिविनिक्षिपेत्।लक्ष्मीर्दूर्वासदाभद्रासहदेवीमधुव्रता ११८ मुशलीशक्रवल्लीचक्रांतापामार्गपत्रकान्।
प्रियंगुमुद्गगोधूमव्रीहीश्चसतिलान्यवान् ११९ शालितंडुलमाषांश्चप्रक्षाल्यतेषुनिक्षिपेत्॥धात्रीलकुचविल्वानांकदलीनालिकेरयोः॥१२१।

।अभिषेकप्रकारमाह॥कृत्वानवपदानित्यादिना॥मंत्रभूषितं।शक्रवल्लीसमावृद्धं॥इंद्रवल्ली॥क्रांता॥विष्णुक्रांता॥१२३॥धात्रीआमलकी।सौगंधिकंकह्लारम्॥ १२५ ॥

फलान्यपिविनिक्षिप्यपुष्पाण्येतानिनिक्षिपेत्॥पद्मंसौगंधिकंजातिंमल्लिकांवकुलंतथा १२१ चंपकाशोकपुन्नागतुलसीकेतकोद्भवं
॥पल्लवानिवटाश्वत्थप्लक्षोडुंबरशाखिनां॥१२२॥ब्रह्मकूर्चंविनिक्षिप्यचषकैःसफलान्वितैः।पिधायकुंभवक्त्राणिक्षौमैराच्छादयेत
तः॥१२३॥आवात्यमध्यकलशेमहालक्ष्मींप्रपूजयेत्॥यजेदृमाद्याःशिष्टेषुकलशेष्वष्टसुक्रमात्।१२४।गंधैर्मनोहरैःपुष्पैर्धूपदीपस
मन्वितैः॥निवेद्यभक्ष्यभोज्यानिताम्बूलंप्रजयेन्मनुं।१२५।त्रिसहस्रंजपस्यांतेसाध्यमानीपसंपतं॥संस्थाप्यस्थंडिलेपीठंतस्मिंतंवि
निवेशयेत्।१२६।रम्यैरावरणैर्वस्त्रैरलंकृत्यतमादरात्॥सुमंगलाभिर्नारीभिःक्षिप्तपुष्पाक्षतान्वितं।१२७॥अर्चितानांद्विजातीनामाशी
र्वादपुरःसरं॥नदत्सुपंचवाद्येषुमहूर्तेशोभनेसुधीः॥१२८॥मध्यस्थंकुंभमुत्सृज्यमहालक्ष्मीमनुस्मरन्॥अभिषिंचेत्क्रमादन्यैः
कलशैरपिदेशिकः॥१२९॥करेणास्यशिरस्पृष्ट्वाप्रयुंजीताशिषंगुरुः॥भद्रमस्तुशिवंचास्तुमहालक्ष्मीःप्रसीदतु।१३०।रक्षंतुत्वांस
दादेवाःसंपदःसंतुसर्वदा।अथोत्थायाभिषिक्तःसन्वाससीपरिधायच १३१॥यथाविधिसमाचम्यदंडवत्प्रणमेद्गुरुं॥वस्त्रैरा
भरणैर्धान्यैर्धनैर्गोमहिषादिभिः॥१३२॥दासीदासैस्त्वविधिवत्तोषयेद्देवताधिया॥ब्राह्मणान्भोजयेत्पश्चाद्दीनांधकृपणैःसह॥
१३३।महांतमुत्सवंकुर्यात्बंधुभिःसह॥तदाकृतार्थमात्मानंमन्यतेमनुजोत्तमः॥१३४॥अभिषिक्तोनरपतिःपरान्विजित्य
तेचिरात्।पदेष्टुःपदमाप्नोतिराजपुत्रोनसंशयः१३५॥अभिषिक्तासतीवंध्यासूतेपुत्रंमहामतिं॥महारोगेषुजातेषुकृत्याद्रोहे
षुदेशिकः॥१३६॥भूतेषुदुर्निमित्तादौविदध्यादभिषेचनं॥सर्वसंपत्करंपुंसांसर्वसौभाग्यसिद्धिदं॥१३७ सर्वरोगप्रशमनंसर्वा
पद्विनिवारणं॥गर्भरक्षाकरंस्त्रीणांदीर्घायुर्जननंपरं॥१३८॥प्रसूतानामपिस्त्रीणांसूतिकागाररक्षकं॥प्रनष्टपुष्पगर्भाणां
पुष्पगर्भाभिरक्षणं १३९ आसन्नशत्रुभीतानांनाशनंचमहीभृतां॥अभिषेकमिमंप्राहुरागमार्थविशारदाः ॥ १४० ॥ ॥

ब्रह्मकूर्चंदर्भमयग्रंथिः॥क्षौमैःपट्टवस्त्रैः।तान्कलशान्॥तंशिष्यम्॥वाससीपरिधाय।अभिषेकफलमाह॥नरपतिरिति॥यंत्रमाह ॥ श्री॥ ०

वेदादिस्थितइत्यादिना ॥ १४४ ॥ द्वादशारं पद्मं विरच्य तत्कर्णिकायां प्रणवं विलिख्य तन्मध्ये साध्यनाम श्रीशक्तिकामबीजसहितं । तथैव किंजल्केषु एकैकपत्रमूले किंजल्कद्वयं ॥ द्वादशपत्रमध्ये मंत्राक्षराण्येकैकशो लिखित्वा ॥ तद्बहिः षोडशदलं पद्मं कृत्वा तत्केसरस्थानेषु युग्मशो व्यंजनानि ॥ पत्रेषु षोडशस्वरान् लिखित्वा



वह्निभूबीजद्वयं ॥ वषट्‌ठंतयात्वरितया संवेष्ट्य भूपुरद्वयकोणेषु हस्रौं लेख्यौ ॥ पुनर्यंत्रफलमाह लक्ष्मीति ॥ मंत्रांतरमाह ॥ शंभुपत्नीति ॥ १४२ ॥ भुवनेश्वरीबीजं श्रीं नि रुद्धं ॥ श्रीबीजद्वं कमौ स्वर

वेदादिस्थितसाध्यनामयुगशः श्रीशक्तिमारान्वितं किंजल्केषु दिनेशपत्रविल
सन्मंत्राक्षरंतद्बहिः ॥ पद्मं व्यंजनकेसरं स्वरलसत्पत्रात्पूयुग्मधरा विंबाभ्यां वष
ठंतयात्वरितयायंत्रं लिखेद्वेष्टितं ॥ १४१ ॥ भूपुरद्वयकोणेषु हस्रौं लेख्यौ पुनः पु
नः ॥ महालक्ष्मीयंत्रमिदं सर्वैश्वर्यफलप्रदं ॥ १४२ ॥ सर्वदुःखप्रशमनं सर्वाप
द्विनिवारणं ॥ बहुना किमिहोक्तेन परमस्यान्न विद्यते ४४२ शंभुपत्नी श्रिया
रुद्धा कमौ भगवती मही ॥ ब्रह्मादित्यो धरादीर्घो लक्षादिभगवान्मरुत् १४४
प्रसीदयुगलं भूयः श्रीरुद्धा भुवनेश्वरी । महालक्ष्मि नमोंतः स्यात्प्रणवादिरयं
मनुः १४५ सप्तविंशत्यक्षराद्यः प्रोक्तः सर्वसमृद्धिदः ॥ कमले हृदयं प्रोक्तं शिरः
स्यात्कमलालये १४६ ॥ १९ पं भगवती एकारयुक्ता मही । भूबीजं ब्रह्मा ककारः आदित्यो मकारः धरा ल
कारः दीर्घयुक्तः । लक्षादि लकारः भगवानेकारयुक्तः मरुत् यकारः । प्रसीदयुगलं स्वरूपं । श्रीरुद्धा भुवनेश्व
री पुनरपि बीजत्रयं महालक्ष्म्यै स्वरूपं नमोंतः । प्रणवादिः ततस्त्वायमर्थः । श्रीं ह्रीं श्रीं कमले कमला

लये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः इति मंत्रः
बीजत्रयादिसप्तविंशत्यक्षरः ॥

शिखाप्रसीदतेनैवकवचंचतुरक्षरैः॥ अस्त्रमेतैःपदैःकुर्यात्त्रिबीजपुटितैःपृथक्॥१४७॥ सिंदूरारुणकांतिमब्जवसतिंसौंदर्यवारांनि
धिंकोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषितां॥ हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौवहंतींपरां॥ आवीतांपरिचारिकाभिरनिशंध्याये
त्प्रियांशार्ङ्गिणः॥१४८॥ लक्षंजपेत्फलैर्बैल्वैर्जुहुयान्मधुरोक्षितैः॥ दशांशसंस्कृतेवह्नौप्राक्प्रोक्तेनैववर्त्मना॥१४९॥ श्रीबीजोक्ते
यजेत्पीठेवक्ष्यमाणक्रमेणतां॥ अंगावृतेर्बहिःपूज्यामूर्तयःश्रीधरादयः॥१५०॥ श्रीधरस्त्वंहृषीकेशंवैकुंठंविश्वरूपकं॥ वासुदेवंसं
कर्षणंप्रद्युम्नमनिरुद्धकं॥१५१॥ दलमूलेषुसंपूज्यपत्रमध्येषुसंयजेत्॥ भारतींपार्वतींचांद्रींशचींचदमकादिकान्॥१५२॥ दलाग्रेष
र्चयेद्बाणान्महालक्ष्म्याःक्रमादमून्॥ अनुरागंचसंवादंविजयंवल्लभंमदं॥१५३॥ हर्षंबलंचतेजश्चलोकनाथाननंतरं॥ तदायुधा
नितद्बाह्येपूजयेत्साधकोत्तमः॥१५४॥ अनेनविधिनादेवींमहालक्ष्मीमुपासते॥ येतेषुनिवसेल्लक्ष्मीरस्मरंतीनिजालयं॥
॥१५५॥ उत्पलैर्जुहुयाल्लक्षंचंदनांभसिलोलितैः॥ शत्रूणांलभतेराज्यंविनायुद्धेनपार्थिवः॥१५६॥ जपन्राजसभांगच्छेत्संभा
व्येततयानरः॥ दूर्वादेवीमहालक्ष्मीविष्णुकांतामधुव्रता॥१५७॥ मुसलीशक्रवल्लीचसदाभद्रांजलिप्रिया॥ हरिचंदनकर्पूरचं
दनाकोलरोचनाः॥१५८॥ मालूरकेसरौकुष्ठंसर्वपिष्टानिशारसैः॥ अष्टोत्तरसहस्रंतुजपित्वातिलकक्रियां॥१५९॥ कुर्वंतोमंत्रि
णःसर्वेवशंतिष्ठंत्यहर्निशं॥ श्रियोमंत्रंभजेन्मंत्रीश्रीसूक्तान्यपिसंयजेत्॥१६०॥ भूयसींश्रियमाकांक्षन्सत्यवादीभवेत्सदा॥ प्रत्य
गाशामुखोश्नीयात्स्थितपूर्वंप्रियंवदेत्॥१६१॥ पूजयेद्गंधपुष्पाद्यैरात्मानंनियतःशुचिः॥ शयीतशुद्धशय्यायांतरुण्यासहनान्य
या॥१६२॥ नग्नोनावतरेदंभस्तैलाभ्यक्तोनभक्षयेत्॥ हरिद्रांनमुखेलिंपेन्नस्वपेदशुचिःक्वचित्॥ ६३ ॥ ० ॥
॥ ॥

॥श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयं॥श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरः इत्यादिना प्रकारेणान्यासः॥शेषं निगदव्याख्यातम्॥इति श्रीगूढार्थदीपिकायां
अष्टमः पटलः॥श्रीमंत्रकथनानंतरं भुवनेश्वरीमंत्रं वर्णयितुमारभते॥अथेत्यादिना॥मंत्रमुद्धरति॥लकुलीशो हकारः॥अग्निः रेफः॥वामनेत्रः इकारः॥अ

।न वृथा विलिखेद्भूमिं न विल्वं द्रोणमंबुजं॥धारयेन्मूर्ध्नि नैवाद्याल्लोणं तैलं च केवलं॥१६४॥ मलिनो न भवेज्जातु कुत्सिता
न्नं न भक्षयेत्॥द्रोणापंकजविल्वानि पद्मं जातु न लंघयेत् १६५ सहदेवीमिंद्रवल्लीं श्रीवल्लीं विष्णुवल्लभां॥कन्यां तु जप्रवा
लं च धारयेन्मूर्ध्नि सर्वदा॥१६६॥इत्याचारपरो नित्यं विष्णुभक्तो दृढव्रतः॥श्रियमाप्नोति महतीं देवानामपि दुर्लभां॥१६७इति श्री
शारदातिलके अष्टमः पटलः॥श्री॥अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरी॥ब्रह्मादयोपि यां ज्ञात्वा लेभिरे श्रियमूर्जितां॥१॥नकुली
शोग्निमारूढो वामनेत्रार्द्धचंद्रवान्॥बीजं तस्याः समाख्यातं सेवितं सिद्धिकांक्षिभिः॥२॥ऋषिः शक्तिर्भवेच्छंदो गायत्री देवता मनोः
कथिता सुरसंघेन सेविता भुवनेश्वरी॥३॥षट्दीर्घयुक्तबीजेन कुर्याद्गानि षट् क्रमात्॥संहारसृष्टिमार्गेण मातृकान्यस्तविग्र
हः॥४॥मंत्रन्यासं ततः कुर्याद्देवताभावसिद्धये॥हृल्लेखां मूर्ध्नि वदने गगनां हृदयांबुजे॥५॥रक्तां करालिकां गुह्ये महोच्छुष्मां प
दद्वये॥ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु च॥६॥सद्यादिह्रस्वबीजाढ्यान्न्यस्तव्या भूतसप्रभा॥अंगानि विन्यसेत्पश्चा
ज्जातियुक्तानि षट् क्रमात्॥७॥ब्रह्माणं विन्यसेद्भाले गायत्र्या सह संयुतं॥सावित्र्या संयुतं विष्णुं कपोले दक्षिणे न्यसेत्॥८॥वागी
श्वर्या समायुक्तं वामगंडे महेश्वरं॥श्रिया धनपतिं न्यस्येत् वामकर्णाग्रके पुनः॥९॥रत्या स्मरं मुखे न्यस्य पुष्ट्या गणपतिं न्यसेत्।
सव्यकर्णोपरि निधीकर्णगंडांतरालयोः॥१०॥न्यस्तव्यो वदने मूलं भूपश्चतास्तनौ न्यसेत्।कंठमूले स्तनद्वंद्वे वामांसे हृदयांबुजे

इंद्रचंद्रवान्॥ विंदुमान्॥एतैः संपिंडितं भुवनेश्वरीबीजं ह्रीं॥सद्यः ओकारः तदादिक्रमेण पंच ह्रस्वाः स्वराः ओ ए ऌ ऋ उ एभिः पंचभिर्बी ॥११॥
जैः॥तत्रस्थानेषु पूर्वमुक्तेषु॥हृल्लेखाद्या न्यस्तव्याः २० पूर्वोक्तेषु पूजापटलोक्तेषु वरांगगुह्यस्थाने।तत ध्वजं तत्स्पर्शन॥कामदंडस्पर्शन॥स्पष्टार्थमपरम्।

सव्यांसे पार्श्वयुगुले नाभिदेशे च देशिकः ॥ भालांसपार्श्वजठरपार्श्वांसापरके हृदि १२ ब्रह्माण्याद्यास्ततोन्यस्याविधिनाप्रोक्तलक्षणाः ।
मूलेन व्यापकं देहेन्यस्य देवीं विचिंतयेत् ॥१३॥ उद्यद्दिनद्युतिमिंदुकिरीटांतुंगकुचांनयनत्रययुक्तां ॥ स्मेरमुखींवरदांकुशपाशाभीतिकरां
प्रभजते भुवनेशीं ॥१४॥ प्रजपेन्मंत्रविन्मंत्रं द्वात्रिंशल्लक्षमानतः ॥ त्रिस्वादूक्तैः प्रजुहुयाद्दशांशतः ॥१५॥ दद्याद्दर्घ्येदिनेशायतत्रसं
चिंत्यपार्वतीं ॥ पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः १६ विलिखेत्कर्णिकामध्ये षट्कोणमतिसुंदरं ॥ ततः संपूजयेत्पीठं नवशक्तिसम
न्वितं ।१७। जयाख्याविजयापश्चादजिताचापराजिता ॥ नित्याविलासिनी दोग्ध्री अघोरामंगलानव ॥१८॥ वीजाद्यमासनं दत्वा मूर्तिं मूलेनक
ल्पयेत् ॥ तस्यांसंपूजयेद्देवीमावाह्यावरणैः सह ।१९। मध्यप्राग्याम्यसौम्येषु पश्चिमेषु यथाक्रमात् हृल्लेखाद्याः समभ्यर्च्याः पंचभूतसम
प्रभाः ॥२०॥ वरपाशांकुशाभीतिधारिण्योमितभूषणाः ॥ स्थानेषु पूर्वमुक्तेषु पूजयेदंगदेवताः ॥ षट्कोणेषु यजेन्मंत्रीपश्चान्मिथुनदेवताः ॥ इं
द्रकोणेलसन्मंडकुंडिकाक्षगुणाभयां ॥२२॥ गायत्रीं पूजयेन्मंत्रीब्रह्माणमपिताहृशं ॥ रक्षःकोणेचक्रशंखगदापंकजधारिणीं ॥२३॥ सावि
त्रीं पीतवसनां यजेद्विष्णुं च तादृशं ॥ वायुकोणे परश्वक्षमालाभयवरान्वितां ॥२४॥ यजेत्सरस्वतीमित्थं रुद्रं तादृशलक्षणं ॥ वह्निकोणे यजेद्र
त्नकुंभमणिकरंडकं ॥२५॥ कराभ्यां बिभ्रतं पीतंतुंदिलं धननायकं ॥ आलिंग्यसव्यहस्तेन वामेनांबुजधारिणीं २६ धनदांकसमारूढां म
हालक्ष्मीं प्रपूजयेत् । वारुणे मदनं बाणपाशांकुशशरासनं २७ धारयंतं जयारक्तं पूजयेद्रत्नभूषणं ॥ सव्येन पतिमाश्लिष्यवामेनोत्पलधा
रिणीं २८ पाणिनारमणांकस्थां रतिं सम्यक्समर्चयेत् ॥ ऐशाने पूजयेत्सम्यक् विघ्नराजंप्रियान्वितं २९ सृणिपाशधरं कांतांवरांगस्पृक्करां राम॰
गुलिं ॥ माध्वीपूर्णकपालाढ्यविघ्नराजं दिगंबरं ३० पुष्करे विलसद्रत्नस्फुरच्चषकधारिणं ॥ सिंदूरसदृशाकारा मुद्दाममदविभ्रमां ३१ धृत ३८
रक्तोत्पलामन्यपाणिनातुध्वजस्पृशं ॥ आश्लिष्टकांतामरुणां पुष्टिमर्चेद्दिगंबरां ३२ ॥ कर्णिकायां निधीपूज्यौ षट्कोणोभयपार्श्वयोः । अंगा
निकेसरेषु ताः पश्चात्पत्रेषु पूजयेत ॥३३॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अनंगकुसुमा पश्चादनंगकुसुमापरा॥ अनंगमदना पश्चादनंगमदनातुरा ३४ भुवनपाला गगनवेगा चैव ततः परम्॥ शशिरेखा च गगनरे
खा चैवाष्टशक्तयः॥३५॥ पाशांकुशवराभीतिधारिण्यो रुणविग्रहाः॥ ततः षोडशपत्रेषु करालीविकरालुमा॥३६॥ सरस्वती श्री दुर्गा च लक्ष्मी पु
ष्टीस्मृतिधृतिः॥ श्रद्धा मेधा मतिः कान्तिरार्याः षोडश शक्तयः।३७। खड्गखेटकधारिण्यः श्यामाः पूज्याश्च मातरः॥ पद्माद्बहिः समभ्यर्च्याः शक्तयः
परिवारिकाः ३८ प्रथमानंगरूपा स्यादनंगमदना ततः॥ मदनातुरा भुवनवेगा भुवनपालिका॥३९॥ स्यात्सर्वशिशिरानंगवदनानंगमेखला च
षकं तालवृंतं च तांबूलं छत्रमुज्वलं॥४०॥ चामरे चांशुकं पुष्पं बिभ्राणाः करपंकजैः॥ सर्वाभरणसंदीप्तान् लोकपालान् बहिर्यजेत्।४१। वज्रादीन्यपि
तद्बाह्ये देवीमित्थं प्रपूजयेत्॥ पूज्यते राकलैर्देवैः किं पुनर्मनुजोत्तमैः।४२। मंत्री त्रिमधुरोपेतैर्हुत्वाश्वत्थसमिद्वरैः ब्राह्मणान्वशयेच्छीघ्रं पा
र्थिवान्पद्महोमतः।४३। पालाशपुष्पैस्तत्पत्नीर्मंत्रिणः कुमुदैरपि॥ पंचविंशतिसंजप्तैर्जलैः स्नानं दिने दिने।४४। आत्मानमभिषिंचेद्यः सर्व
सौभाग्यवान् भवेत् पंचविंशतिसंजप्तं जलं प्रातः पिबेन्नरः।४५। आवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत्॥ कर्पूरागरुसंयुक्तं कुंकुमं साधुसा
धितं॥४६॥ गृहीत्वा तिलकं कुर्याज्जगद्वश्यमनुत्तमं॥ शालिपिष्टमयीं कृत्वा पुत्तलीं मधुरान्वितां।४७। जप्तां प्रतिष्ठितप्राणां भक्षयेद्रतिवासा
रे॥ वशं नयति राजानं नारीं वा नरमेव वा ४८ कंठमात्रोदके स्थित्वा वीक्ष्य तोयगतं रविं॥ त्रिसहस्रं जपेन्मंत्रमिष्टां कन्यां लभेन्नरः॥४९॥ अन्नं
तन्मंत्रितं मंत्री भुंजीत श्रीप्रसिद्धये लिखितां भस्मना मायां ससाध्यां फलकादिषु ५०॥ तत्कालेदर्शयेद्यंत्रं सुखं सूयेत गर्भिणी॥५१॥ शतपंतस्थि
तसाध्यकर्म भवनेवह्नेर्वृतं शक्तिभि र्वीतं त्र्येकोणगते यतं हरिहरैर्वर्णैः कपोलार्पितैः पश्चात्तैः पुनरीयुतैर्लिपिभिरप्यावीतमिष्टार्थदं यंत्रं भूप
रमध्यगं त्रिगुणितं सौभाग्यसंपत्करं ५२ बीजांतस्थितसाध्यनाम शरसोमायारमामन्मथैर्वीतं वह्निपुरद्वयेरसपुटे स्वाख्याढ्यबीजत्रयं सात्मा
नात्मकमीं शिखं हरिहरैरावद्गं डंवहीः षड्वीजैरनुबद्धसंधिलिपिभिर्वीतं गृहाभ्यां भुवः ५३ चिंतामणिर्नृसिंहाभ्यां लसत्कोणमिदं लिखेत् यंत्रं षट्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥यंत्ररचनाप्रकारमाह॥शान्तमंतरइत्यादि॥५०॥पूर्वनिर्ऋतिवायव्यकोणं वह्नित्रिकोणं गृहीवीतं विलिख्य॥तन्मध्ये भुवनेश्वरीबीजं लिखित्वा तन्मध्ये साध्यनामसहितं कर्म॥कथं देव
दत्तं रक्ष रक्षेति॥ततस्त्रिकोणाद्बहिः॥कोणत्रये भुवनेश्वरीबीजत्रयं लिखित्वा रत्नमित्यनेन सूचितत्वात्॥ग्रंथांतरप्रकारेणावधीयात्॥एवं मायाद्वयस्यापि वेधनं कार्यं तत



बीजं व्याहृतिभिर्वृतं गृहयुगं हं हेरसौः कोणागं दौर्गं बीजमनंत
रं लिपयुगैरावद्वगं उलिखेत्॥गायत्र्यारविशक्तिवह्निवि
वरं त्रिष्टुप्वृतं तत्ततो वीतं मातृकया धराउरयुगे सत्सिंह
चिंतामणि॥५५॥यंत्रं दिने धारणितं प्रोक्तं रक्षाप्रसिद्धि
दं॥सर्वसौभाग्यजननं सर्वशत्रुनिवारणम्॥५६॥लि
खेत्सरोजं रसपत्रयुक्तं मध्ये दलेष्वप्यभिलिख्य मायां ख
रावृतं यंत्रमिदं वधूनां पुत्रप्रदं भूमिगृहांतरस्थं॥५७॥ष
ट्कोणमध्ये प्रविलिख्य शक्तिं कोणेषु तामेव विलिख्य भू
यः॥ससाध्यगर्भं वसुधापुरस्थं यंत्रं भवेद्रूपकरं नरा
णां ५८॥वाग्भवं शंभुवनितारमाबीजत्रयात्मकं॥मंत्रं
समुद्धरेन्मंत्री त्रिवर्गफलसाधनम्॥ ५९ ॥ श्री ॥०



त्रिकोणांतस्थमायायाउपरिकोणत्रयमध्य एव कोणगत इति सानुस्वारं ईकारं कोणत्रये लिखेत्॥ततः कोणकपोलयोः॥हरिरिति वर्णद्वयमेकत्र हर इति वर्णा राम॰
द्वयमपरत्र कोणत्रयस्य मध्ये सानुस्वारमिकारं लिखेत्॥प्रत्येकं तद्बहिः कोणत्रये भुवनेश्वरीबीजत्रयं लिखित्वा रत्नमित्यनेन सूचितत्वात्॥ग्रंथांतर ॥ ३९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रकारेणवध्नीयात्॥कथं॥एषांवीजानामेकैकस्यरेफेणतत्तद्बीजंप्रदक्षिणीकृत्यअन्त्यस्यमायाग्रंईकाराग्रेवध्नीयात्।पश्चात्कोणकपोलयोः॥हरिहरंलिखेत् क
पोलशब्देनवीजत्रयस्यपार्श्वद्वयंविवक्षितं॥अत्रकेचिदेवंवर्णयंति॥हरिहरशब्देनस्वस्वग्रहणंनभवति॥किंतुहरिशब्देनहकाररेफइकाराःसूच्यंते॥हरश
ब्देनहकारउकाररेफाइति॥एतावताकिमुक्तंभवति॥ह्रीं ह्रूं इतिलिखेत्।अयमेवपक्षःसांप्रदायिकः॥एवंविलिख्यवृत्तंलिखेत्।पश्चात्हरिईहरईलिखेत्॥इतिपु
नःपुनः॥लेखनेननिरंतरंवेष्टयेत्॥अथवाह्रींईह्रूंईइतिवा॥तद्बहिःपंचाशदक्षरैर्वेष्टयेत्।पुनर्भूगृहद्वयेनवेष्टितम्॥एतत्त्रिगुणितयंत्रेउक्तफलदं॥अक्षरार्थ
स्तु॥वह्निर्भवनइतिसंवंधः॥कोणगतेषुतडीडतमितिच्छेदः॥तैःपुनरीयुतैःहरिहरवर्णैः।ईकारसहितैः॥अथवासामान्येनसर्वेनाम्नाप्रस्तुतपरामर्शेनप्रस्तुतसर्वे

षट्दीर्घभाजामध्येनवाग्भवाद्येनकल्पयेत्॥षडंगानिमनोरस्यजातियुक्तानिमंत्रवित्॥६०॥कुर्यात्पूर्वोदितान्न्यासान्तथैवात्रापिसा
धकः॥ध्यानं॥सिंदूरारुणविग्रहांत्रिनयनांमाणिक्यमौलिस्फुरत्तारानायकशेखरांस्मितमुखीमापीनवक्षोरुहांपाणिभ्यांम
णिपूर्णरत्नचषकंरक्तोत्पलंविभ्रतीं सौम्यांरत्नघटस्थमध्यचरणांध्यायेत्परामंविकां॥ ६१॥ रविलक्षंजपेन्मंत्रंपापसे
मधुरप्लुतैः॥दशांशंजुहुयान्मंत्रीपीठेप्रागीरितेयजेत्॥ ६२॥ देवींप्रागुक्तमार्गेणगंधाद्यैरतिशोभनैः॥हुत्वापलाशकुसुमैर्वीक
श्रियंमहतींव्रजेत्॥६३॥ब्राह्मीघृतंपीवेज्जप्तंकवित्वंवत्सराद्भवेत्॥ सिद्धार्थान्लवणोपेतान्हुत्वामंत्रीवशंनयेत्॥ ६४ नर
नारीनरपतीन्नात्रकार्याविचारणा॥चतुरंगुलजैःपुष्पैःचंदनांभःसमुक्षितैः॥६५॥हुत्वावशीकरोत्याशुत्रैलोक्यमपिसाधकः
जुहुयादरुणांभोजैरयुतंमधुरप्लुतैः॥ ग्रहणस्ययुक्तत्वात्॥प्रायुक्तत्वंहल्लेखावीजमपिगृहीत्वातेरितिपरामर्शोयुक्तस्ततस्वरहल्लेखासहितैर्हरिह
रवर्णैर्वेष्टयेदित्यर्थः॥इदानींषड्गुणितयंत्रंवक्तुमारभते॥वीजांतरित्यादिना॥अयमर्थः॥पूर्वोक्तत्रिकोणद्वयंसंपुटितंलिखित्वातन्मध्येहल्लेखावीजमालिख्यतद्दले
साध्यनामसहितंकर्मलिख्य॥पूर्वंयद्यपिचात्रसामान्येनसाध्यनामेत्युक्तं॥तथापितन्नांतरपरिपाट्यालेखनंकार्यं॥अंतस्थितवीजैकाभागेसाध्यनामविलिख्यउप
रिइकारस्वरभागेसाध्यकनामउभयोर्मध्येकर्म॥ततश्चदेवदत्तस्येति॥वामपार्श्वेयज्ञदत्तमिति अतस्तद्रेफस्यवशंकुर्वितितन्मध्ये॥एतद्बहस्य॥ततश्चशरसोमाये

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शरशः पंचवीजं भुवनेश्वरीवीजं वेष्ट्युनस्तथैव वह्निवीजेन वह्निपुरद्वयेन सपुरेण संपुटे षट्कोणांतराले पच पिसामान्येनोक्तं॥ तथापि वामभागे कोणत्रये ईकारस्था
नगतेन साध्यनामयुक्तानि शक्तिश्रीकामवीजानि सात्मकानि सानुस्वाराणि लिखित्वा तान्येव वह्निपत्नीपद्दक्षिणकोणत्रयांतराले साध्यनामसहितानि निरात्मकानि
विसर्गसहितानि लिखेत्। ईशिखं ईकारयुतं शिखा ईकारयुक् षट्कोणं षट्कोणमध्ये सानुस्वारमोकारं लिखेदित्यर्थः॥ पूर्ववद्वंद्वयोर्हरिहरवर्णान् लिखेत् षट्
वीजैरनुबंधसंधिपूर्ववत्॥ षट्कोणेषु वहिः षट्हृल्लेखावीजानि लिखित्वा पूर्ववदन्योन्यं वध्नीयात्॥ अनुलोमप्रतिलोमेन लिपिभिर्वृतं पूर्ववत् पंचाशल्लिपिभिर्वेष्ट
येत्॥ वहिर्भूपरद्वयेनापि तत्कोणेषु पूर्वादिदिक्षु नृसिंहवीजं कोणेषु चिंतामणिवीजं लिखेत्॥ एतत् षड्गुणितयंत्रमुक्तफलदम्॥ षड्गुणितयंत्रव्याख्यापाधुना।
॥६६॥ राज्यश्रियमवाप्नोति सतिले स्तंडुलैस्तथा॥ प्राप्य तान्यपि कर्माणि मंत्रेणानेन साधयेत्॥ ६७॥ वाग्वीजपुटितामायां विद्येयं
त्र्यक्षरी मता॥ मध्ये न दीर्घयुक्तेन वा कुपुटेन प्रकल्पयेत्॥ ६८॥ अंगानि जातियुक्तानि क्रमेण मंत्रवित्तमः॥ यथा पुरा समुद्दिष्टा
न्न्यासान् कुर्वीत मंत्रवित्॥ ६९॥ श्यामांगीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलं रत्नाढ्यं चषकं वरं भयहरं संविभ्रतीं शा
श्वतीं॥ मुक्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं वंदे हं सुरपूजितां हरवधूं रक्तारविंदस्थितां ७० तत्त्वलक्षं जपेन्मंत्रं
जुहुयात्तद्दशांशतः॥ पालाशपुष्पैः स्वाद्वक्तैः पुष्पैर्वा राजवृक्षजैः ७१ हृल्लेखाविहिते पीठे पूजयेत्परमेश्वरीं॥ मध्यादि
पूजयेन्मंत्री हृल्लेखाद्याः पुरोदिताः॥ ७२॥ मिथुनानि यजेन्मंत्री षट्कोणेषु यथा पुरा॥ अंगपूजा केसरेषु पूज्याः पत्रेषु मा
तरः॥ ७३॥ भैरवांकसमारूढाः स्मेरवक्त्रा मदालसाः॥ असितांगो रुरुश्चंडः क्रोधउन्मत्तभैरवः ७४ कपाली भीषणश्चैव संहा
रश्चाष्टभैरवाः॥ शूलं कपालं प्रेतं विभ्राणाः सुदर्दुदभिः॥ ७५॥ ११ द्वादशगुणितं यंत्रं निरूपयितुमारभते॥ वीजं व्याहृतिभिरित्यादिना॥
अस्यचापमर्थः॥ पूर्वोक्तषट्कोणद्वयं यथावत्संपुटितं लिखित्वा तन्मध्ये शक्तिवीजं लिखित्वा अनुक्तमपि पूर्ववत्साध्यसाधकादि लिखित्वा तद्वीजं विलो
मेन व्याहृतिभिर्वेष्टयित्वा यच्चप्यत्र विलोमादिविशेषो न कथितस्तथापि तंत्रांतरसिद्धं॥ अविरुद्धं सर्वं ग्राह्यं॥ सर्वशाखाप्रत्येकं कर्मेतिन्यायात्॥ वसाः
कोणगं अग्रेः कोणगं॥ दौर्गवीजं॥ रविकोणाभ्यंतरं दुर्गावीजं लिखेदित्यर्थः॥ लिपियुगेण वद्ध्वांडं प्रतिलोमेनैव गायत्र्या लिपियुगेणेति संबंधः॥ रवि

... शक्तिवीजकमित्यर्थः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तद्वह्निर्जीतवेदसमंत्रेण अनुलोमप्रतिलोममंत्ररूपेणावेष्टयेत तद्देवत्रिष्टुपमंत्रं। तद्बहिः पंचाश
द्वर्णैस्तथैववेष्टयित्वा तद्बहिर्भूपुराभ्यां वेष्टयेत॥ कोणेषु पूर्ववन्नृसिंहचिंतामणिबीजेन लि
खेत् एतद्द्वादशशरणितं प्रोक्तफलदं स्पष्टार्थमपरं। इदानीं त्रिबीजमंत्रं वक्तुमारभते॥ वाग्भवमित्यादि
नामंत्रोद्धारः स्पष्टः॥ रविलक्षं द्वादशलक्षं॥ प्रागीरितेयाऽठेभुवनेश्वरीपीठे शोषं तिगद्व्याख्यातम्। मं
त्रांतरमाह। वाग्बीजेति॥ दीर्घस्वराद्यामातरः पूज्याः। ह्रस्वस्वराद्यांभैरवाद्याः पूज्याः अतिरोहिता

गजत्वगंवराभीमाः कुटिलालकशोभिताः दीर्घाद्यामातरः प्रोक्ताः ह्रस्वाद्याभै
रवास्मृताः ७६ पूज्या षोडशपत्रेषु करालाद्याः पुरोहिताः॥ तद्बाह्ये नग
रूपाद्याः लोकेशास्त्वाणितद्बहिः ७७ एवमाराधयेद्देवीं शास्त्रोक्तेनैवव
र्त्मना। वशंनयतिराजानं वनितां अमरालगा: ७८ अन्नमाज्येनजुहु
यात्त्वभतेवसुवांछितं॥ सुगंधैः कुसुमैर्हुत्वाश्रियमाप्नोतिवांछितां ७९
मंत्रेणानेनसंजप्तमश्रीपादन्नमन्वहं। भवेद्रोगी नियतं दीर्घमायुरवाप्नुयात्
॥८०॥ र्घमन्यतामंत्रान्तरमद्धरति। अनंतः आकारः॥ विंदुभूषितः। माया भुवनेश्वरी। ककारो ब्रह्मा अग्निः रेफः॥ ततो विंदुः। आं ह्रीं क्रौं इति बीजत्रयात्मको भुवनेश्वरीमंत्रः। बीजेनमध्यबीजे
न० तत्वलक्षं चतुर्विंशतिलक्षं। तत्सहस्रं॥ इदानीं यंत्रार्गलमारभते। आलिखेदित्यादिना तदन्त्रव्य
क्तीकरिष्यामः॥ प्रथमं यंत्ररचनाप्रकारमाह॥ पूर्वं संपुटितं चतुरस्रद्वयं लिखित्वा चतुरस्रद्वयसूत्रा



श्रालिख्याष्टाग्निर्गला मितिएवंरित्यापा शांकुशवीजा पाविपरिभ्र मयेत्॥



ऍंहंसः ईंहंसः ऐ। एव मष्टसु पत्रेषु लिखे दिति टीकाका रःसम्प्रदायक्षरा एयेवम्॥

॥फ़२४८

तानिसूत्राणिअर्गलाकाराणिकृत्वाअर्गलाग्रसंदष्टवृत्ते।कृत्वातद्बहिरष्टदलंपद्मंकृत्वातद्बा
ह्यवृत्तंवर्तयित्वापुनर्वृत्तत्रयंभ्रामयेत्॥त्रिःपाशांकुशवेष्टनार्थंतद्बाह्येक्रोंमोंक्रमात्मात्
काभिर्वेष्टयेत्तद्बाह्येघटवृत्ताकारंविलिख्य॥मुखेअधोमस्खंतत्पृष्ठेऊर्ध्वमुखंपद्मद्वयंलि
खेत्चतुरस्रद्वयसूत्राणांबाह्यसंधिषुवृत्तंकुर्यात्॥आभ्यंतरसंधिषुचवृत्तेकृतेचतुरस्राष्टको
णानिद्विधाविभक्तानिभवंति।तत्राभ्यंतरकोष्ठेषुपूजापटलोक्तमार्गेणगणानिष्टदऽष्टकोणेष

अनंतोविंदुसंयुक्तोमायाब्रह्माग्नितारवान्॥पाशादिच्यक्षरोमंत्रःसर्ववं
श्यफलप्रदः॥८१॥ध्याद्याः पूर्वमुक्ताःस्युर्बीजेनाङ्गक्रियामता।वरांकु
शौपाशमभीतिमुद्रांकरैर्वहंतीकलशासनस्थां॥बालार्ककोटिप्रतिमां
त्रिनेत्रांभजेयमाद्यांभुवनेश्वरींतां॥८२॥हविष्यभुक्जपेन्मंत्रंतत्त्वलक्षं
जितेन्द्रियः॥तत्सहस्रंप्रजुहुयाज्जपांतेमंत्रवित्तमः॥८३॥दधिक्षौद्रयुता
क्ताभिःसमिद्भिःक्षीरभूरुहां॥तत्संख्यपातितैःशुद्धैःपयोनैर्जुहुयात्ततः
॥८४॥हन्नेत्सव्यापजेदाद्यैःकर्णिकायांयथाविधि॥अंगानिकेसरेष्वस्युःप
त्रस्थामातरःक्रमात्॥८५॥विलिख्यतदुपरितेनाष्टकोष्ठेषुपाशश्रीशक्तिस्मरमन्मथश
क्तिरिंदिरास्वांकुशात्मानंअष्टाक्षरंलिखेत् तद्बाह्येवर्तुलाभ्यंतरीयकोष्ठेषुकामिनिरंजिनिस्वा राम·
हा॥इत्यष्टाक्षराणिलिखित्वा॥अर्गलाबाह्यसंध्युपरिअर्गलावृत्तादन्यत्पुनरपिवृत्तंकु ४१
र्यात्।एवंकृतेतत्रषोडशकोष्ठानिजायंते॥तेषुशक्तिःषोडशाक्षरप्रणवगौरीरुद्रदयितेयोगे

[illegible]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry





षोडशकेसरस्थानेषुसानुस्वारंस्वरचतुर्थस्वरंमध्येतत्यास्थेपोर्हे समंत्रंतत्यांश्चयोः सानुस्वारमकारा
दिस्वरयुग्मंमाययाक्रमंलिखेत्॥ एवंप्रतिकेसरं सम्प्रापाक्षराणिभवेयुः॥ दलमध्येचक्राकोराणकर्णि
कागताक्षराणित्रीणिपंक्तौलिखेत्॥ तिर्यक्रूपतयाकोरोणतिकेचित्॥ एष सांप्रदायिकः॥ चतुर
स्रमध्येतेरवचतुलमालिख्यतन्मध्येपाशयांकुशन्यक्षरात्मकंमंत्रंलिखेत्॥ पुनः पुनर्ह्रीं गं

इन्द्राद्यः पुनः पूज्यास्तेषामस्त्राणितद्बहिः॥ एवंसंपूजयेद्देवीं साक्षाद्देव्याश्चवशोभवेत् ८६ स्पृश्यतेसकलैर्लोकैस्तेजसाभास्करोपमः॥ अनेनाधिष्ठितंगेहंनिशिदीपशिखाकुले ८७ दृश्यतेप्राणिभिः सर्वैर्मंत्रस्यास्यप्रभावतः। सर्षपैर्लोणसंमिश्रै राज्यांते जुहुयान्निशि ८८ राजानंवशयेत्सद्यस्तत्पत्नीमपिसाधकः॥ अन्नवानन्नहोमेनश्रीमान्स्याद्धुतात्मवेत् ८९ राजवृक्षसमुद्भवैः पुष्पैर्हुत्वाकविर्भवेत्॥ अरोगीतिलहोमेनघृतेनायुरवाप्नुयात्॥ ९०॥ प्राक्प्रोक्तान्यपिकर्माणिसाधयेत्साधकोत्तमः आलिख्याष्टदिगर्गलान्युदरगंपाशांदिकंत्र्यक्षरंकोष्ठे "षंगमवून्परेषुविलिखेदष्टार्णमंत्रद्वयं॥ अष्टौपूर्वापरषट्कयुग्लयवरान्व्योमासनानर्गलेष्वालिख्येन्द्रजलाधिपादिगुणशः पंक्तिद्वयंतत्परं॥ ९१॥ कोष्ठेषष्टयुगार्णमात्मसहितांयुग्मस्वरांतंगतांमायांकेसरदिग्दलेषुविलिखेन्मूलंत्रिपंक्तिः क्रमात्॥ त्रिःपाशांकुशवेष्टितंलिपिभिरावीतंक्रमाद्व्युत्क्रमात्पद्मस्थेनघटेनपंकजमुखेनावेष्टितंतद्बहिः॥ ९२॥

लासुपूर्ववत्स्वान्यषट्चस्वरभिन्नंहकारंक्रमेणलयवरयुक्तंलिखेत्॥ तद्यथा॥ पूर्वार्गलायांचतुरस्रंव
हिर्वृत्तमारभ्योत्तरतः उपरितेनवृत्तिपर्यंतंह्रूंह्रांह्रौं। दक्षिणसूत्रेह्रींहूंहुंइति उतरसूत्रेपूर्ववल्लिखेत्॥ ततः ईशानस्थमर्गलेपश्चिमसूत्रेह्रूंह्रैंह्रौंइति॥ ततस्तथैव
पूर्वसूत्रेपिह्रौंह्रंह्रः॥ इतिचलिखेत्॥ ततोषट्दलकेसरस्थानेप्रत्येकंस्वात्मसहितायुग्मस्वरांतगतांमायांकेसरगांअत्रमायाशब्देनसानुस्वारांचतुर्थस्वरंसांप्रदायि

कः॥ इत्यादिद्वादशकंपद्माद्बहिः पाशांकुशबीजाभ्यां वेष्टयेत्।

॥:४।४४:२२८:४६

शा॰ति॰ पुनः पंचाशदक्षरैरेकस्मिन्वर्तुले अनुलोमेनान्यस्मिन्प्रतिलोमेनतद्वाह्ये वकारेणावेष्टयेदितिरहस्यंतदुक्तं॥ श्रीशंकराचार्यैः घटेनचापीतिवहिःपद्मसंपुटेनघटेनवे

टी॰गू॰ ष्टयेत्तदुपरिसंपुटेनापिभूविंवेनापीतिकेचित्॥ एतत्घटार्गलनामयंत्रम्॥ अस्मिन्नर्थे आलिख्येत्यादिग्रंथोयोजनीयः॥ ग्रंथस्तुस्पष्टार्थः॥ पंत्रांतरमाहावज्रांकिते

४२ घटार्गलमिदंयंत्रंमंत्रिणांप्राभृतंमतं॥ पाशश्रीशक्तिकंदर्पकामशक्तींदिरांकुशाः ९३ प्रथमोष्टाक्षरोमंत्रः ततः कामिनिरंजिनि॥ स्वा

हांतोष्टाक्षरः सद्भिरपरः परिकीर्तितः ॥९४। ह्रींगौरिरुद्रदयितेयोगेश्वरिसवर्मफट्॥ द्विठांतः षोडशार्णोयंमंत्रः सद्भिरुदीरितः

९५ लिखित्वाभूर्जेपत्रादौयंत्रमेतद्यथाविधि॥ धारयेद्वामबाहौ वाकंठेवानिजमूर्द्धनि॥ ९६॥ वशयेत्सकलान्मर्त्यान्विशेषेणम

हीपतिं॥ नीलपट्टेविलिख्यैतत्गुटिकीकृत्यतत्पुनः ९७ साध्यप्रतिकृतौसिक्थेनिर्मितायांहृदिन्यसेत्॥ पात्रेत्रिमधुरापूर्णेनि

क्षिप्यैनांविधानतः ९८ संपूज्यगंधपुष्पाद्यैर्वलिंनिक्षिप्यरात्रिषु॥ मूलमंत्रंजपेन्मंत्रीनित्यमष्टसहस्रकं ९९ सप्ताहाद्वांछि

तांनारीमाहरेत्स्मरविह्वलां॥ भूर्जपत्रेविलिख्यैतत्गुटिकीकृत्यतत्पुनः १०० लाक्षयाताम्ररजतकांचनैर्वेष्टयेत्क्रमात्॥ तत्कुंभे

न्यस्यसंपूज्ययथावद्भुवनेश्वरीं १०१ संस्पृश्यतंजपेन्मंत्रीदिवाकरसहस्रकं॥ अभिषिंच्यप्रियंसाध्यंवश्रीयाद्यंत्रमाशिखं १०२

कांतिंपुष्टिंधरारोग्यप्रशांसिलभतेनरः॥ भित्तौविलिख्यतद्यंत्रंपूजयेन्नित्यमादरात् १०३ भूतप्रेतपिशाचास्तंनवीक्षितुमपिक्षमाः

तद्विलिख्यशिरस्त्राणेसाधितंधारयेद्भटः १०४ युद्धेरिपून्वहून्हत्वाजयमाप्नोतिपार्थिवः॥ वज्रांकितेवह्निपरद्वयेतांपाशांकुशा

द्यामुदरस्थसाध्यं॥ मध्येषट्कोणेष्वथवात्यवृत्तेपुनः पुनस्तांविलिखेत्समंतात् १०५ भूर्जेलिखितमेतत्स्यात्सर्ववश्यकरंनृणां॥ आ

रोग्यैश्वर्यजननंयुद्धेषुविजयप्रदं १०६ लिखेत्सरोजेस्वरकेसराढ्येवर्गाष्टपत्रेवसुधापुरस्थे॥ पाशांकुशाभ्यांगगराशः प्रवद्धांमायां

लिखेन्मध्यगतांससाध्यां १०७ सर्वोत्तममिदंयंत्रंधारितंकुरुतेनृणां॥ आरोग्यैश्वर्यसौभाग्यविजयादीननारतं १०८ इतिश्रीशार

दातिलकेभुवनेश्वर्याः नवमः पटलः ॥ त्यादिना षट्कोणंविलिख्यतत्कोणेषुलिखित्वा उपरिवृत्तंविरच्यतन्मध्ये पुनस्तामेवलिखेद्वृत्ताकारेणकुं

कुमरोचनाभ्यांलिखित्वा वश्रीयात्तत्फलसिद्धिः। पंत्रांत

रमाह। लिखेत्सरोजंस्पष्टार्थमिदं॥ इतिगूढार्थदीपिकायां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥ अथ भुवनेश्वरीमंत्रकथनानंतरं। श्रीत्वरिताविधानं वक्तुमारभते॥ ततोभिधास्य इत्यादिना॥ मंत्रमुद्धरति॥ तारो मायेत्यादिना॥ तारः प्रणवः माया भुवनेश्वरी वर्म हुं
ऋद्धिः खकारः॥ एकादशस्वरयुतः॥ तदा ततः॥ खे इति सिद्धं॥ कूर्मः चकारः॥ तदंतः छकारः॥ भगवान् एकारयुतः॥ छे इति सिद्धं॥ क्षखरूपस्त्री स्वरूपं दीर्घ
तनुछदं हूंकारः। संवर्तः क्षकारः भगवान् एकारयुतः॥ ततः क्षे इति सिद्धं॥ मायाहृल्लेखा॥ अस्त्रं फट्॥ एवं द्वादशाक्षरो मंत्रः॥ मायाद्यपवर्जितान् द्वादशवर्णान् द
शस्थाने षुन्यसेत्॥ इत्याह॥ मायेति॥ कूर्माद्यैरिति॥ पूर्वपूर्ववर्जितमित्यर्थः॥ च छे हृदयाय॥ छेक्ष शिरसे॥ क्ष स्त्रीं शिखायै॥ स्त्रीं हूं कवचाय हूं क्षे नेत्रत्रयाय॥ क्षे फ

ततोभिधास्ये त्वरितां त्वरितं फलदायिनीं तारो माया वर्म बीजमृद्धिरीशस्वरान्विता १ कूर्मस्तदंत्यो भगवान् क्षस्त्री दीर्घतनुच्छदं
संवर्तो भगवान्माया फडंतो द्वादशाक्षरः॥ २॥ मुनिरर्जुनमाख्यातो विराट्छंदः समीरितं त्वरिता देवता प्रोक्ता पुरुषार्थफल
प्रदा ३ मायाविवर्जितान्वर्णान्मूर्द्धि भाले गले हृदि नाभिगुह्ये रुयुग्मेषु जानुजंघापदेषु च ४ विन्यस्य व्यापकं कुर्यात्समस्ते
नैव साधकः कूर्माद्यैः सप्तभिर्वर्णैः पूर्वपूर्वविवर्जितैः ५ द्वाभ्यां द्वाभ्यां षडंगानि कल्पयेत्साधकोत्तमः श्यामां बर्हिकला
पशेखरयुतामाबद्धपर्णांशुकां गुंजाहारलसत्पयोधरभरामष्टाहिपान्बिभ्रतीं ताटंकांगदमेखलागुणरणन्मंजीरतां प्रापि
तान्कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे ७ लक्षं संजप्य मंत्रज्ञो मनुमेनं जितेंद्रियः दशांशं जुहुयाद्बिल्वैर्मधुराक्तैः स
मिद्वरैः ८ हृल्लेखाकल्पिते पीठे नवशक्तिसमन्विते पूजयेत्त्वरितां देवीं वक्ष्यमाणविधानतः ९ संवर्तको बिंदुयुतः कवचं सर्गैः ॥ ११ ॥
कलं वियत् वज्रदेहं पुरुहूंदं संभाष्य हिंगुलुहृदयं १० गर्जयुग्मं वियत्सेंदु वर्मांत्यो दीर्घबिंदुमान् पंचाननाय हृदयपीठमंत्रः प्रकी

र्त्तिताये त्यनेन प्रकारेणान्यासं कुर्यात्॥ ताटंकं कर्णभूषणं॥ अंगदं बाहुभूषणं॥ मंजीरं चरणभूषणं॥ मेखला कटिभूषणं॥ एवं रूपकृतां प्रतिमां अष्टनागाना
मासनं॥ मंत्रमुद्धरति॥ संवर्तक इत्यादिना॥ संवर्तः क्षकारः॥ सबिंदुयुतः॥ ततः क्षं इति सिद्धं॥ कवचं हुंकारः॥ वियत् हकारः॥ सकलं॥ कलाशब्देन बिंदुः ततो
हमिति सिद्धं भवति॥ वज्रदेहं पुरुहूं दं स्वरूपमेव॥ हिंगुलुहृदयं स्वरूपं॥ गर्ज्जयुग्मं स्वरूपं॥ वियत् हकारः॥ अंत्यं क्षकारः दीर्घबिंदुयुतः॥ क्षां इति सिद्धं॥ पंचानना

पखरूपे। हृदयपनमः इति पीठमंत्रः। उद्धृतः किंकरमं
त्रमुद्धरति। किंकरेत्यादिना। स्पष्टार्थः॥

दद्यादासनमेतेनमूर्तिंमूलेनकल्पयेत्॥अंगैःप्रणीतांगायत्रींकेसरेषुचर्चयेत्क्रमात् १२ दलेषुपूजयेद्देवीःश्रीबीजाद्याःसुभूषिताः॥हुंकारींखे
चरींचंडांछेदनींक्षेपणींस्त्रियं॥१३॥हुंकारींक्षेमकारींचचतस्रोकोणगावरभूषिताः॥फट्कारीमग्रतोवाह्येकोदंडशरधारिणी॥१४॥द्वारस्यपार्श्व
योःपूज्येहेमवेत्रकरांबुजे॥जयाख्याविजयाख्याचकिंकरायपदंततः॥१५॥रक्षरक्षपदस्यांतेत्वरितात्तास्थिरोभव॥वर्मास्त्रांतेनमनुना
किंकरंतंबहिर्यजेत्॥१६॥लगुडंबिभ्रतंकृष्णंकृष्णवर्वरमूर्द्धजं॥आरण्यैरक्तरोःपुष्पैरतिमुक्तैःसुगंधिभिः॥१७॥पूजयेद्धूपदीपाद्यैर्नृत्यगीतै
र्मनोरमैः॥एवंसिद्धमनुर्मंत्रीनारीनरनरेश्वरैः॥१८॥मान्यतेवत्सरादर्वाक्कुलक्ष्म्याजितधनेश्वरः॥योनिकुंडंप्रकल्प्याथकुर्याद्धोमंनिजेच्छ
या १९ मल्लिकाकुसुमैर्हुत्वावशयेदखिलंजगत्॥कृत्याद्रोहादिशमनंपलाशकुसुमैर्हुतं॥२०॥इक्षुखंडैःशुभैर्हुत्वामहतीश्रियमाप्नुयात्॥
दीर्घमायुरवाप्नोतिदूर्वाहोमेनसाधकः॥२१॥धान्यैःप्रक्षालितैर्हुत्वाश्रियमिष्टांसमाप्नुयात्॥यवैर्धान्यसमृद्धिःस्यादाज्यधूमैरिष्टसिद्धयः२२
तंडुलैरक्षयात्सिद्धिःस्याद्वृद्धिर्महतीतिलैः॥मंत्रीनीलोत्पलैर्हुत्वानृपपत्नींवशंनयेत्॥२३॥प्रबुद्धैःपंकजैर्हुत्वावशंनयतिमेदिनीं॥अशो
कैःपुत्रमाप्नोतिमधुकैरिष्टमाप्नुयात्॥२४॥फलैर्जंबुभवैर्हुत्वालभतेधनमीप्सितं॥पुष्पैःपाटलिसंभूतैरिष्टामाप्नोतिसुंदरीं॥२५॥पुष्पैर्वकु
लसंभूतैःकीर्तिःस्यादनपायिनी॥दीर्घमायुर्भवेद्धोमैरश्वपकैःकांचनंभवेत् २६ कुर्वीतसर्षपैर्होमंशत्रोर्नाशकरंसुधीः॥पत्रैर्वकुलजै
र्हुत्वाशीघ्रमुन्मादयेदरीन्॥२७॥शाल्मलीपत्रहोमेनसपत्नान्नाशयेद्ध्रुवम्॥कोद्रवैःखंडनैस्तद्वन्निर्वैविद्वेषयेन्मिथः॥२८॥माषहोमेन
मूकःस्यादुन्मतोसैर्भवेदरिः॥अयुतंहोमसंख्यास्याज्जपस्तावान्प्रकीर्तितः २९ स्नानंतन्मंत्रितैस्तोयैःसर्वव्याधिहरंस्मृतं॥तज्जप्तंखलुकंतोयं
मुखेक्षिप्तंविषापहं॥३०॥आर्तीयभेषजंदद्यान्मंत्रेणानेनमंत्रितं॥सभवेद्व्याधिनिर्मुक्तोमंत्रस्यास्यप्रभावतः॥३१॥त्रैलोहीमुद्रिकानेनमनुना
साधसाधिता॥कृत्याद्रोहादिशमनीसर्वव्याधिविनाशिनी ३२ सर्वसंपत्प्रदानित्यंसर्ववश्यकरीमता॥यद्यद्वांछतिमंत्रज्ञस्तत्तदेतेनसाध्यते॥३३॥

संत्रमुद्धरति॥ मध्येसरोजमितिस्पष्टार्थः॥ मन्त्रांतरमाह॥ तारे हु मिति॥ अष्टदलपद्मकर्णिकायां॥ प्रणवमालिख्यातन्मध्ये हुंबीजंसाध्यनामान्वितंविलिख्यावशिष्टमंत्रवर्णा न्वसुदलेष्वालिख्य॥ तद्बाह्ये शक्त्याशक्तिबीजेनत्रिवारंवेष्टयित्वाकमलपुटेनघटेनापिवेष्टयित्वाधारयेत्॥ उक्तफलप्राप्तिः॥ यंत्रांतरमाह कोष्ठानामितिप्रत्या यः॥ प्राक्प्रत्यगग्राद्वादशरेखाविलिख्यदक्षिणोत्तरतोपितथैवरेखाग्राणिशूलाकाराणिकृत्वा॥ मध्यकोष्ठेप्रणवमालिख्यतन्मध्येकर्मसंहितांसाध्या ख्यां सर्वकोष्ठादिकं प्रादक्षिण्येनत्वरितास्त्वंद्वादशावृत्तिंलिखेत्॥ एतद्यंत्रंप्रोक्तफलदम्॥ यंत्रांतरमाह॥ एकाशीतिमध्येष्विति॥ प्राक्प्रत्य।

मध्येसरोजेदशपत्रयुक्तेमायांलिखेद्धांछितसाध्यगर्भां। तारादिवर्णान्दशपत्रसंस्थान्षट्कोणवीतंवसुधापुरस्थं २४ कृत्वाद्रो
हादिशमनंव्यालचौरभयापहं॥ विधृतंत्वरितायंत्रंविशेषाद्विजयप्रदं २५ तारंहुंविलिखेत्सरोजकुहरेसाध्याभिधानान्वितं।
मन्त्राणान्वसुसंख्यकान्वसुदलेष्वालिख्यतद्बाह्यतः॥ शक्त्यात्रिःपरिवेष्टितंघटगतंपद्मस्थम
ज्ञाननं॥ यंत्रंवश्यकरंग्रहादिभयहृल्लक्ष्मीप्रदंकीर्तितं २६॥ कोष्ठानांशतमेकविंशतियुतंकृ
त्वाऽथवंमध्यतःसाध्याढ्यंत्वरितांशिवादिविलिखेन्मायांवि
नामंत्रवितारेखाग्रेषुलसत्त्रिशूलमसकृत्तंजप्यसंपाति
तं। यंत्रंस्वेउमहाभिचारशमनंवश्यावहंश्रीप्रदं २७ एका
शीतिपदेषुयंत्रविवरेसाध्यंलिखेन्मध्यतः। पश्चात्तंत्रिपदि
गातासुलिपिशोज्जुमःशिखांतंलिखेत्॥ शिष्टेष्वीशनिशाच
रादिविलिखेल्लक्ष्मीमनुंपंक्तिशः॥ शस्त्रादिर्वषडंतयात्वरि
तयावीतंचतुर्दिक्ष्वपि २८ लांतैःप्रवीतंकमलासनेनघटेनवी
तंकमलासनेनसंसाधितंचक्रमनुग्रहाख्यंदद्याद्यथावल्लननकादिवृद्धीः।





शा·ति· टी·गू· ४४

कः प्राक्प्रत्यक् कवेवलं कापुंसः नां त



दशसूत्राणि॥ तथैव तिर्यक्पातयित्वा तन्मध्ये प्रणवं तन्मध्ये ठकारं तन्मध्ये जकारं तन्मध्ये मकारं ततः साध्याख्यां लिखेत्॥ इत्युपदेशः॥ रमात्र मित्याचार्यः॥ पुनश्चतुर्दिक्षु च चतुष्कोष्ठं चतुष्कोष्ठेषु प्रत्येकं जूंसः ववषडिति अक्षरचतुष्टयं पंक्ति लिखेदित्युपदेशः। आचार्यमतं इत्येवं मनुते। के चनैवं वर्णयंति। आचार्यस्याप्ययमेव पक्षः संमत इति वयं मन्यामहे। कथं शिवांतमित्यत्र शिवांत मीशामिति नकेवलं शिखातमं त्रशब्देन शिखामंत्रमभिधीयते। तेन वषडंतमेवोक्तं भवतीति साधीयान्। अयं पक्षः पुनः शिष्टचतुः षष्टिपदेषु ईशकोष्ठमारभ्य पं

कृत्यापमृत्युरोगादीन्क्ष्वेडभूतमहाग्रहान्॥ जीवेद्वर्षशतं पुत्रैः पौत्रैर्लक्ष्म्याच नंदति ४३ श्रीसामा यायामासाश्रीसानोयाज्ञेज्ञेयानोस्या मायालीलालीयामायाज्ञेलीलीलाज्ञेया ॥ ४४ ॥ लिखेच्च तुःषष्टिपदेषु विद्वानीशादिकान्यादिरमाममंत्रं ॥ वात्येययावत्वरितामिवीतंलींतेश्ववीतंयरकांचन स्थ ४५ देशेपुरेवानगरेगृहेवाविनिःक्षिपेच्च क्रमिदं यथावत्॥ तत्र श्रुवं गोमहिषाभिवृद्धिः सम्यक्प्रजा सस्यसमृद्धयः स्युः॥ ४६॥ कवचं भगवान्ब्रह्मा डोमेरुः सर्गसमन्वितः॥ त्रिकंटकी समाख्याता विद्या वर्णत्रया त्मिका ४७ ह्रीरुक्तैर्मंत्रवर्णैः स्यादंगक्लृप्तिरितीरिता॥ नीलाना भेरथस्तादरुणारुचिरथ कंठदेशास्सिता स्या द्वक्त्रेर्दंष्ट्राकराले रुदरपरिगतैर्भीषणांगीच तुर्भिः॥ दीपोकं रुरथांगं करसरसिरुहैर्धारयं तीजयातः स्फूर्जेच्छीतांसु खंडा भवतु भयहरा देवता वस्त्रिनेत्रा॥ ४९॥ त्रिलक्षं प्रजपेदेनमाज्येनांतेदशांशतः॥ हुत्वा प्राक्प्रोक्तमार्गेण पूजयेत्तां त्रिकंटकीं॥ ५०।

त्तिशः सर्वतोभद्रात्मकं लक्ष्मीमनुमेकवारं प्राक् लिखित्वा पुनस्तमेव लक्ष्मीमनुं निर्ऋतिकोष्ठमारभ्य पंक्तिशो लिखेत्॥ पुनश्च तुरस्रे चतुर्द्वारेषु प्रत्येकं दलानि विरच्य स्वकोणेषु॥ चतुर्दलानि कृत्वा एवं कृते दिक्षु प्रत्येकं दशदलानि भवंति॥ तत्र त्वरिताख्यां विद्यां लिखेद्दशशः॥ शक्त्यादिर्वषडंतमेत्यत्र मन्त्र

राम· ४४

अत्र पदस्थाने फट्कारस्थाने प्रथमं वषट्कारान्तं यजेत् इति। तथा चोक्तं तन्त्रान्तरे। त्वरितावषडन्तत्वात् फट्कारपरिवर्जिता इति। तदुपरि वृत्तं कृत्वा लोतैर्वकारैर्वेष्टयेत्। एतत्
मंत्रमुक्तफलदं। यंत्रांतरमाह। लिखेच्चतुःषष्ठीति। अयमर्थः। प्राक्प्रत्यग्गता नव रेखाः दक्षिणोत्तरेपि। तथैव लिखित्वा तत्र ईशानादिद्वात्रिंशत्कोष्ठेषु लक्ष्मीमंत्रम्
अक्षरशो विलिखेत्। पुनर्निर्ऋतिमारभ्योत्तरतः पश्चाद्बहिस्त्वरितया चतुर्दिक्षु वेष्टयेत्। लोतैर्वकारैर्बहिः। एतद्युक्तफलप्रदं। मंत्रांतरमुद्धरति। कवचमिति। कवचं हुंकारः
भगवानेकारयुक्तः स्फें ङः। स्फें इति सिद्धं। मेरुः सकारः। विसर्गः तद्युक्तः सः। एवं बीजत्रयात्मकः। त्रिकंटकीमंत्रः। केतुः शरवः रथांगवक्त्रं। त्रिशूलमुद्रा। अंगुष्ठ

त्रिशूलमुद्रां पाणिभ्यां बध्वात्मानं त्रिकंटकीं ध्यायन्स्पृष्ट्वा जपेद्भक्तः संसचयत्संमुंचति ग्रहः ॥५१॥ सेरुद्धास्त्री त्रिवर्णेयं विद्यात्र
ष्टपत्रिकंटकी ॥ मंत्रार्णैर्वीमितिः कुर्याद्गावषट्कमथापरा ५२॥ पूर्वोक्तां देवतां ध्यायन्मंत्रं त्रिनियुतं जपेत्। दशांशं सर्पिषा हु
त्वा वशयेद्वनितां नरान् ५३ तारो माया वाग्भवं तु नित्यक्लिन्ने मदद्रवे ॥ वाङ्गुज्ञा च वह्निजायान्तो मंत्रः पंचदशाक्षरः ५४ द्वाभ्यां
द्वाभ्यां पुनर्द्वाभ्यां द्वाभ्यां पंचभिरक्षरैः वाचं विना समस्तेनाप्यंगषट्कमथाचरेत् ॥ द्वीपं त्रिकोणं विपुलं सुरद्रुममनोहरं कू
जत्कोकिलनादाढ्यं मंदमारुतसेवितं ५६ भृंगपुष्पलताकीर्णं मुद्यच्चंद्रदिवाकरं ॥ स्मृत्वा सुराब्धिमध्यस्थं तस्मिन्माणिक्य
मंडपे ५७ रत्नसिंहासने न्यस्ते त्रिकोणोज्ज्वलकर्णिके ॥ पद्मे संचिंतयेद्देवीं साक्षात्त्रैलोक्यमोहिनीं ॥५८॥ नित्यां भजे बाल
शशांकचूडां पाशांकुशोत्कल्पलतां कपालं ॥ हस्तैर्वहंतीमरुणां त्रिनेत्रामास्फालयंतीं करवल्लकीं तां ॥५९॥ त्रिलक्षं प्रज
पेन्मंत्रमाज्येन जुहुयात्ततः ॥ दशांशं पूजयेत्पीठं चतुःशक्तिसमन्वितं ॥६०॥ अग्रे पूर्वौ द्रांविणीं वामां शंभुकोणे समर्चयेत् ॥
अग्रे ह्लादकारिणीं ज्येष्ठां मोकाराद्यां हुताशने ६१ पूजयेत्क्षोभिणीं रौद्रीं उकाराद्यां निशाचरे ॥ वायौ यजेद्रुत्य शक्तिं वाग्भवा
द्या विचक्षराः ॥६२॥ पाकनिषिक्तां बध्वा अंगुलीत्रयं प्रसारयेत् ॥ मंत्रांतरमाह। सेस्त्रीति सकारपुटितस्त्रिकंटकीमंत्रः। स्वच्छार्थमपरं। मंत्रांतरमा
ह। तारो मायेति तारः प्रणवः। माया भुवनेश्वरी। वाग्भवं ऐंकारः। नित्यक्लिन्ने मदद्रवे। स्वरूपं वा स्वाहा पूर्वोक्तो वह्निजाया स्वाहाकारः। न्यासमाह। द्वाभ्यामिति। वाचं वि

ना वाग्भवबीजं विना इति। आद्यन्तेति आदि अन्त्ययोः आस्व
रूपं स्त्रीं स्त्रीं इति। अन्त्यवर्गमध्ये शः। ल्कौ च वर्जिताः न पुंसक च

शा·ति· जिताः॥ अवशिष्टस्वराः बिंदुताः केतोंईइंउंऊंएंऐंओंऔं एते प्रत्येकं दूतीनां मंत्राः॥ मन्मथव्योमेति॥ ह्रीँ एतदनंगादीनां बीजं॥ क्लीबेति॥ क्लीबः नपुंसकचतु
टी·पू· ष्टयं ऋॠऌॡ या एऐ। एतद्वर्जितस्वरसमन्वितश्चतुराननः ककारो बिंदुमान्॥ कंकां किं कीं कुं कूं कों कौं कंकः॥ एतानिकामांगनानां बीजानीत्यर्थः॥ मंत्रांतरमुद्ध
४५ मायाद्यमासनं दत्वा मूर्तिं मूलेन कल्पयेत्॥ अत्र संपूजयेद्देवीं वक्ष्यमाणक्रमेण तु ६३ शृंगार्चनं केसरेषु दलेष्वेताः समर्चयेत्॥
आद्या नित्या सुभद्रान्या मंगला नरवीरिणी ६४ सुभगा दुर्भगा भूयः सप्तमी स्यान्मनोन्मनी॥ अष्टमी रुद्ररूपा च वीणावादनत
त्परा॥ ६५॥ रक्ता मनोरमा ह्येताः सर्वेषामदमंथराः॥ आद्यंतयुग्मरहिताः स्वराः क्लीबविवर्जिताः ६६ बिंदुता मनवस्तासामनंगस्म
रमन्मथाः कामो मारश्च पंचेषु पाशांकुशधनुर्भृतः ६७ अपरांगनिषंगाढ्या रक्ताः पूज्याः सुभूषणाः॥ मान्मथं व्योमसंगाढ्यं तेषां
बीजमुदाहृतं ६८ रतिः स्याद्विरतिः प्रीतिर्विप्रीतिर्मतिदुर्मती। धृतिश्च विधृतिस्तुष्टिर्वितुष्टिश्च दश स्मृताः ६९ रक्ता वीणाकरा
द्वे द्वे कामानां पार्श्वयोः स्थिताः॥ सर्वाभरणसंपन्नाः पूज्याः स्मेरमुखाम्बुजाः॥ ७०॥ क्लीबौष्ठद्वयनिर्मुक्तस्वराढ्यश्चतुराननः॥ बिं
दुमान्बीजमेतासां क्रमाच्चोक्तं स्वरान्वहिः ७१ एवं संपूजयेद्देवीं देवानामपि दुर्लभां॥ परमैश्वर्यमाप्नोति प्रार्थ्यते वनिताजनैः ७२
वाग्भवं मान्मथं बीजं नित्यक्लिन्ने मदद्रवे ठद्वयं। वह्निवधूर्मंत्रो द्वादशार्णोयमीरितः ७३ ऋषिः संमोहनश्छंदो निचृन्नित्या च दे
वता॥ वाचा शत्वा षडंगानि नित्यां ध्यायेन्निजे हृदं॥ ७४॥ अर्द्धेंदुमौलिमरुणाममराभिवंद्यामंभोजपाशसृणिपूर्णकपालहस्तां।
रक्तांगरागवसनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनितां मदविह्वलांगीं ७५ चतुर्लक्षं जपित्वांते मधुराक्तैर्मधूकजैः॥ कुसुमैरयुतं
हुत्वा तोषयेद्गुरुमात्मनः ७६॥ ११ इति· इतरत्स्पष्टं· मंत्रांतरमाह॥ मंत्रोद्धारः स्पष्टः। अतिरोहितार्थमन्यत्॥ मंत्रांतरमाह॥ श्रीमायेति सोपि स्पष्टः॥ आ
रग्वधः राजवृक्षः। चतुरंगुलः स्मृता॥ फलपरोयं योनिगदव्याख्यातः। मंत्रांतरमाह॥ पाशांकुशेति कथितार्थः एवं बीजद्वयरुद्धा भुवनेश्वरी॥ क्लिंदी शः एकारः। गगनहं

कारः॥ सुद्रई ईकार एकाः परमेश्वरीस्वरूपं हितांतः। ४५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शक्तिपीठे यजेद्देवीं वक्ष्यमाणेन वर्त्मना ॥ अंगान्यर्च्चेद्यथापूर्वं ततः शक्तीरिमा यजेत् ७७ नित्या निरंजना क्लिन्ना क्लेदिनी मदनातुरा ।
मदद्रवा द्राविणी च द्रविणी त्यष्टशक्तयः ७८ ॥ नीलोत्पलकपालाढ्यकरा रक्ताम्बुजेक्षणाः ॥ लोकपालान्यजेद्दत्ये वाहनायुधसंयुतान्
॥ ७९ ॥ सिद्धमंत्रं जपेन्मंत्री सहस्रं शयनस्थितः ॥ यां विचिंत्य स्त्रियं रात्रौ सा समायाति तत्क्षणात् ॥ ८० ॥ वाग्भवाद्यानंतरं नित्यक्लिन्ने भूयो
मदद्रवे ॥ हृदंतो रविसंख्याणो मनुर्वश्यप्रदायकः ॥ ८१ ॥ ऋषिर्गिरीशः स्याद्[illegible] छंदो मुनिभिरीरितं ॥ वज्रप्रस्तारिणी प्रोक्ता देवता
भीष्टदायिनी ॥ ८२ ॥ वाग्भवेन षडंगानि विदध्यान्मंत्रवित्तमः ॥ वज्रप्रस्तारिणीं ध्यायेत्समाहितमनास्ततः ॥ ८३ ॥ रक्ताब्धौ रक्तपोते रविद
लकमलाभ्यंतरे सन्निषण्णां रक्तांगीं रक्तमौलिस्फुरितशशिकलां स्मेरवक्त्रां त्रिनेत्रां ॥ बीजापूरेषुपाशांकुशमदनधनुः सत्कपालानि ह
स्तैर्बिभ्राणामानतांगीं स्तनयुगलभरादंबिकामाश्रयामः ॥ ८४ ॥ मंत्री मंत्रं जपेल्लक्षं जपांते जुहुयात्ततः ॥ अयुतं राजवृक्षोत्थैः [illegible] सि
तैः समिद्वरैः ॥ ८५ ॥ शक्तिपीठे यजेद्देवीं मरुशोः कुसुमादिभिः ॥ अंगानि केसरेष्वग्र्ये नीपादलेष्विमाः ॥ ८६ ॥ हृल्लेखा क्लेदिनी क्लि
न्ना क्षोभिणी मदनातुरा ॥ निरंजना रागवती सप्तमी मदनावती ॥ ८७ ॥ मेखला द्राविणी पश्चाद्वेगवत्यष्टमा स्मृता ॥ कपालोत्पलधारि
ण्यः शक्तयो रक्तविग्रहाः ॥ ८८ ॥ मातरो दिग्विदिक्ष्वर्च्याः पुनः पूज्या दिगीश्वराः ॥ भजेन्मंत्री मुखं नित्यं अर्चनादिभिरादरात् ॥ ८९ ॥ दा
रिद्र्यरोगनिर्मुक्तः सजीवेच्च शरदां शतं ॥ अस्मिन्मंत्रे रतो मंत्री वशयेदखिलं जगत् ॥ ९० ॥ नित्यं मंत्रे वंधः कुर्यान्मुखलालनमन्वहम् ॥
अंजनं तिलकं पुष्पं धारयेन्मंत्रितं सुधीः ॥ ९१ ॥ तांबूलं मंत्रितं भक्ष्यं मंत्री सः स्याज्जगत्प्रियः ॥ श्रीमायामदने प्रोक्तो मंत्रो वीजत्रया
त्मकः ॥ ९२ ॥ ऋषिः संमोहनः छंदो गायत्री देवता मनोः ॥ त्रिपुटाख्या ह्रिरुक्तैर्लेर्वीजैः रंगानि षट् क्रमात् ॥ ९३ ॥ पारिजातवने र
म्ये मंडपे मणिकुट्टिमे ॥ रत्नसिंहासने सौम्ये पद्मे वह्न्यस्रशोभिते ॥ ९४ ॥ अथ स्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वाहाकारांतः॥प्रणवादिः॥न्यासमाह॥द्वाभ्यामिति॥ॐ आं हृदयाय नमः॥ॐ श्रीं शिरसे स्वाहा॥ॐ क्रों शिखायै॥ॐ एहि क कवचाय हुं॥ॐ परमेश्वरि नेत्रत्रयाय वौष
ट्॥ॐ स्वाहा अस्त्राय फट्॥ध्यानमाह॥रक्तामिति॥बाणलक्षं पंचलक्षं।तेनैव लवणहोमेनैव॥यंत्रमाह लिखेदिति। विकारकोष्ठं षोडशकोष्ठं॥मंत्रांतरमाह॥मायेति
चापंपाशांवुजसरसिजान्यंकुशंपुष्पवाणान् विभ्राणांतांकरसरसिजैरत्नमौलिंत्रिनेत्रां॥हेमाब्जाभांकुचभरनतांरत्नमंजीरकांची
ग्रैवेयाद्यैर्विलसिततनुंभावयेच्छक्तिमाद्यां॥९५॥चामरादर्शीतांबूलकरंडकसमुद्गकान्॥वहंतीभिःकुचार्ताभिर्दूतीभिःपरिवारि
तां॥करुणामृतवर्षिण्यापश्यंतीसाधकंदृशा॥भानुलक्षंजपेदेनंमंत्रंतावत्सहस्रकं।९७। विल्वारग्वधसंभूतैर्मधुराक्तैःसमि
द्भैः॥जपापुष्पैश्चजुहुयात्तोषयेद्गुरुं॥९८॥हृल्लेखाविहितेपीठेपूजयेत्तांविधानतः॥आग्नेयादिषट्कोणेषुलक्ष्म्याद्याः
परिपूजयेत्॥९९॥लक्ष्मींहेमप्रभांतन्वींसवराब्जयुगाभयां॥चक्रशंखगदांभोजधरंहेमनिभंहरिं॥१००॥पाशांकुशाभयाभीष्ट
धरांगौरींजपारुणां॥मृगटंकाभयाभीष्टधरंस्वर्णनिभंहरं॥१०१॥नीलोत्पलकरांसौम्यांरतिंकांचनसन्निभां॥धृतपाशांकुशेष्वा
संपुष्पेषुमरुणंस्मरं॥१०२॥पूर्ववन्निधियुग्मंतद्यजेदुभयपार्श्वयोः॥बहिरंगानिसंपूज्यपूज्याःपत्रेषुमातरः॥१०३॥लोके
शान्वनितारूपानर्चयेत्सौम्यविग्रहान्॥इत्थंयःपूजयेद्देवींनित्यंभक्तिसमन्वितः॥१०४॥संप्राप्यकवितांदिव्यांप्राप्यलक्ष्मी
मनंतरां॥सौभाग्यमतुलंलब्ध्वाविहरेत्सुचिरंभुवि॥१०५॥पाशांकुशपुटाशक्तिर्जिरीशोगगनंसहकः॥परमेश्वरिशब्दांतेद्विठांतः
प्रणवादिकः॥१०६॥अस्यारूढामनुःप्रोक्तस्त्रयोदशभिरक्षरैः॥द्वाभ्यामेकेनचैकेनद्वाभ्यांपंचभिरक्षरैः१०७।द्वाभ्यांमंत्रानि
षट्कुर्यात्ततोदेवींविचिंतयेत्॥ रक्तामम्भोधिरूढांशशधरशकलांबद्धमौलिंत्रिनेत्रांपाशेनाबध्यसाध्यांस्मरशरविवशांदक्षिणेना
नयन्तीं॥हस्तेनान्येनवेत्रंवरकनकमयंधारयंतींमनोज्ञांदेवींध्यायेदजस्रंकुचभरनमितांदिव्यहाराभिरामां१०८॥मायाहृल्लेखाप
र्यायतिस्वरूपं॥पावकवल्लभास्वाहाकारः॥मंत्रांतरमाह॥षडस्त्रइति॥षट्कोणंलिखित्वातन्मध्येमायांविलिख्यकोणेषुवशिपूर्वर्णानावास्त्येमातृकावर्णैर्वे

॥पद्मावतीयंत्रंप्रशस्तं॥मुखन्यासमाह॥तारमिति॥अमसौअंअः॥इत्यक्षरद्वयंदक्षिणवामनेत्रयोः॥सूर्यमग्निंक्रमेणाध्यायन्न्यसेत्॥ठांतंठकारमक्षरम्॥मुखवृ
त्तौ॥लक्षंजपेन्मंत्रमाज्येनांतेजितेन्द्रियः॥दशांशंजुहुयाद्देवींशक्तिपीठेसमर्चयेत्॥ १०९॥पाशादित्र्यक्षरोक्तेनविधानेनसमाहितः
॥आज्याढ्यान्नाहुतान्मंत्रीलभतेवांछितंफलं॥११०॥लवणैर्मधुसंसिक्तैर्होमेनवशयेन्नृपान्॥तेनैवविधिनामंत्रीवशयेद्ध्नि
नामपि १११ आलिख्यकोष्ठानिविकारसंख्यान्यतश्चतुष्केप्रणवंससाध्यं॥अन्येष्वपिद्वादशमंत्रवर्णांल्लिखेदिदंयंत्रमशेषवश्यं
११२ मायाहृद्भगवत्यंतेमाहेश्वरिपदंवदेत्॥अन्नपूर्णेठयुगलंमनुःसप्तदशाक्षरः ११३ अंगानिमाययाकुर्यात्ततोदेवींविचिंतयेत्।
रक्तांविचित्रवसनांनवचंद्रचूडामन्नप्रदाननिरतांस्तनभारनम्रां॥नृत्यंतमिंदुशकलाभरणंविलोक्यहृष्टांभजेभगवतींभवदुःखहंत्रीं
११४॥यथाविधिजपेन्मंत्रंवसुयुग्मसहस्रकं॥साज्येनान्नेनजुहुयात्तद्दशांशमनंतरं॥११५॥शक्तिपीठेयजेद्देवीमंगलोकेश्वरायु
धैः॥प्रातरेनंजपेन्मंत्रंनित्यमष्टोत्तरंशतं॥११६॥एतस्यान्नसमृद्धिःस्याच्छ्रियासहमहीयसी॥मायापद्मावतिपदंततःपावक
वल्लभा॥११७॥सप्तार्णोमनुराख्यातःसर्ववश्यप्रदायकः।अंगानिमाययाकुर्याद्ध्यायेत्त्रैलोक्यमोहिनीं ११८ पद्मासनस्थांकर
पंकजाभ्यांरक्तोत्पलेसंदधतींत्रिनेत्रां॥आबिभ्रतीमाभरणानिरक्तांपद्मावतींपद्ममुखींभजामि ११९ पक्षलक्षंजपेन्मंत्रंदशां
शंजुहुयाद्धुतैः॥शक्तिपीठेयजेद्देवीमंगाद्यावरणैःसह॥१२०॥किंजल्केषंगपूजास्यात्पूज्याःपत्रेषुमातरः॥लोकपालाबहिः
पूज्याःतदस्त्राणिततोबहिः॥१२१॥इत्थंयोभजतेमंत्रंजपहोमार्चनादिभिः॥सुभगःसर्वनारीणांभवेत्कामइवापरः १२२॥षडस्रम
ध्येप्रविलिख्यशक्तिंकोणेषुशिष्टानिषडक्षराणि॥तद्बाह्यतोमातृकयाभिवीतंपद्मावतीयंत्रमिदंप्रशस्तं॥ १२३ ॥ ॥

॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नेन्यसेत्॥ चंद्रमंडलं ध्यात्वा रमां विचिंत्य॥ श्रीबीजं वक्त्रेन्यसेत्॥ हल्लिहृदयं विचिंत्य स्वाहा॥ इत्यक्षरद्वयं गंडयोर्न्यसेत् एवं न्यासकृते उक्तफलसिद्धिः॥ इति गूढार्थदीपिकायां दशमः पटलः॥ अथ दुर्गामनून्वक्तुमारभते॥ ततो दुर्गामनूनिति माया हृल्लेखा अग्निरेकारः॥ कर्णउकारः। कर्णउकारः॥ विंदुरनुस्वारः। दुइति सिद्धं॥ भूयो सौ सर्गवान्॥ पुनरपिद

तारं शिरसि विन्यस्य देवीं संचिंत्य भारतीं॥ शक्तिबीजं न्यसेद्भाले संस्मृत्य भुवनेश्वरीं १२४ भ्रमसौ नेत्रयोर्न्यस्येत्। ध्यात्वा सूर्यहुताशनं॥ मुखवृत्तेन विन्यस्य द्वांतं चंद्रमनुस्मरन् १२५ जिह्वायां विन्यसेद्बीजं रमायास्तां विचिंतयन्॥ स्वाहार्णौ गंडयोर्न्यस्य तत्तज्जेन्द्रधियासुधीः १२६ अमुं न्यासमाख्यातं कुर्वन्प्रतिदिनं नरः॥ कीर्तिश्रीकांतिमेधानां वल्लभो भवति ध्रुवम् १२७ इति श्रीशारदातिलके दशमः पटलः॥ १०॥ ततो दुर्गामनुं वक्ष्ये रक्षार्थफलप्रदम्॥ माया ग्निः कर्णविंद्वाढ्यो भूयो सौ सर्गवान्भवेत् १ पंचांतकः प्रतिष्ठावान्मारुतो भौतिकासनः॥ तारादिहृदयांतोयं मंत्रो वस्वक्षरात्मकः २ ऋषिश्च नारदश्छन्दो गायत्री देवता मनोः॥ दुर्गासमीरिता सद्भिर्दुरितापन्निवारिणी ३ नमस्कारवियुक्तेन मूलमंत्रेण साधकः॥ ह्रामाद्यैः सह कुर्वीत षडंगानि यथाविधि॥ ४॥

११ इति भवति। पंचांतको गकारः॥ प्रतिष्ठावान् दीर्घयुक्तः। गा इति भवति। मारुतो भौतिकासनः मारुतः यकारः। भौतिकः ऐकारः। स्वाधवान् ये इति भवति। तारादिः प्रणवादिः। हृदयांतः नमोंतः। तेन ॐ ह्रीं दुं दुर्गायै नमः॥ वस्वक्षरः। अष्टाक्षरो मंत्रः॥ षढस्वैरैः। स्वर ऋ ॠ लृ ॡ अ इति नपुंसकैश्च रहितैः॥ आ ई ऊ ए ऐ ओ औ अं अः इति प्रत्येकं शक्तिवि

मातृकयावीतं



श्रीं	ह्रीं	क्रीं	ए
हा			हि
स्वा	ॐ सा॰		य
रि	प्र	मे	र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥अभिषेकप्रकारं वक्तुमारभते॥ प्रतिष्ठेत्यादिना॥ अभिषेकफलमाह॥ राज्येत्यादिना॥ यंत्रस्वरूपप्रकारमाह॥ मध्येतारमिति॥ अष्टदलपद्ममध्ये प्रणवं तन्मध्ये
शक्तिबीजं तन्मध्ये साध्याख्यां तदंतर्मध्ये वर्णं विलिख्य जातवेदोमंत्रेणावेष्टयित्वा॥ पश्चान्मातृकावर्णैश्च भूगृहेण च वेष्टितं विदध्यात्॥ उक्तफलप्रदं॥ मंत्रांतर

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः॥ शंखं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता॥ आमुक्तांगदहारकंकणरण
त्कांचीरणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुंडला ५ वसुलक्षं जपेन्मंत्रं तिलैर्मधुरलोलितैः॥ पयोंधसा वा जुहुया
त्तत्सहस्रं जितेंद्रियः ६ पीठमित्थं यजेत्सम्यक् नवशक्तिसमन्वितं॥ प्रभा माया जया सूक्ष्मा विशुद्धा नंदिनी पुनः ७ सुप्रभा विजया स
र्वसिद्धिदा नवशक्तयः॥ वज्रिमर्हे स्वत्रयल्ली वरहितैः पूजयेदिमाः॥ ८ प्रणवानंतरं वज्रनखदंष्ट्रायुधाय च॥ महासिंहाय वर्मांत्वेन
तिः सिंहमनुर्मतः ९ दद्यादासनमेतेन मूर्तिं मूलेन कल्पयेत्॥ तस्यां संपूजयेन्मूर्तौ देवीमावाह्य मंत्रवित् १० अंगावृतिं पुरोभ्यर्च्य श
क्तीः पत्रेषु पूजयेत्॥ जया च विजया कीर्तिः प्रीतिः पश्चात्प्रभा पुनः ११ श्रद्धा मेधा श्रुतिः प्रोक्ताः स्वनामाद्यक्षरादिकाः॥ पत्राग्रेषु चये
दष्टावायुधानि यथाक्रमात् १२ चक्रशंखगदाखड्गपाशांकुशशराश्च नुः॥ लोकेश्वरांस्ततो बाह्ये तेषामस्त्राण्यनंतरं १३ इत्थं जया
भिर्मंत्री मंत्रसिद्धे विधानवित्॥ कुर्यात्प्रयोगानेतेन मनुना स्वमनीषितान्॥ १४॥ प्रतिष्ठाप्य विधानेन कलशान्नव शोभनान्॥ रत्नहेमा
दिसंयुक्तान्पूर्वेषु नवसु स्थितान् १५ मध्यस्थे पूजयेद्देवीमितरेषु जयादिकाः॥ संपूज्य गंधपुष्पाद्यैरभिषिंचेन्नराधिपं १६ राजा विजय
ते शत्रून्पोधको विजयश्रियम् प्राप्नोति रोगी दीर्घायुः सर्वव्याधिविवर्जितः॥ वंध्याभिषिक्ता विधिना लभते तनयं वरं॥ मंत्रेणानेन सं
जप्तमाज्यं भुक्तं ज्वरापहं १८ गर्भिणीनां विशेषेण जप्तं भस्मादिकं तथा॥ मध्येतारं बीजमतः स साध्यं पत्रेष्वष्टौ मंत्रवर्णान्विलिख्य १९

सहमंतममकारः वियतहकारः सनयनं इकारयुतः ह्रि इति सिद्धं शांतवकारः॥ मर्दि निसरूपं उद्दयं स्वाहाकारः॥ एवमष्टाक्षरो दुर्गामंत्रः॥ ध्यानमाह गारुडेति॥ दीर्घस्व
रैः॥ आ ई ऊ ऐ औ अः॥ पादिभिः पंचशाय नमः॥ रंशंखाय नमः॥ प्रत्यादिषु कारेण शेषं विज्ञेयं॥ ध्यात्वा नमः॥ मंत्रांतरमुद्धरति॥ तारो दुर्गेति॥ तारः प्रणवः प्रसिद्धः॥ दुर्गेयुगं स

त्रिष्टुप्‌वीतं वेष्टितं मातृकार्णैर्यंत्रं दौर्गं भूपुरस्थं विदध्यात् ॥ क्षुद्रभूतमहारोगचौरसर्पनिवारणं ॥ २० ॥ विजयश्रीप्रदं पुंसां गर्भिणीनां सुख
प्रदं ॥ भांतं वियत्सनयनं श्वेतो मर्द्दिनि ठद्वयं २१ अष्टाक्षरी यमाख्याता विद्या महिषमर्द्दिनी ॥ महिषहिंसिके हुं फट् हृदयं परिकीर्तितम् ॥ २२ ॥
महिषशत्रो शाङ्करि हुं फट् शिरोंगं समुदाहृतम् ॥ महिषं भीषय द्वंद्वं हुं फट् ततः शिखामनुः ॥ २३ ॥ महिषं हन युग्मं ते देवि हुं फट् तनुच्छदं ॥ महिषा
ते सूदिनी हुं फट् तमस्त्रमीरितं २४ मंत्रैरेतैर्जातियुक्तैः पंचांगानि प्रकल्पयेत् ॥ गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौमि भाल
विलोचनां महिषोत्तमांगनिषेदुषीं ॥ चक्रशंखकृपाणखेटकबाणकार्मुकशूलकांस्तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखरां २६
अष्टलक्षं जपेन्मंत्रं तत्सहस्रं तिलैः शुभैः ॥ हुत्वा प्राग्गीरिते पीठे यजेन्महिषमर्द्दिनीं ॥ २७ ॥ संपूज्यांगानि पत्रेषु दुर्गाख्यां वरवर्णिनीं ॥ आ
र्याह्वयां तृतीयां च चतुर्थीं कनकप्रभां ॥ २८ ॥ पंचमीं कृत्तिकासंज्ञां षष्ठीमप्यभयप्रदां ॥ कन्यां सुरूपां प्रभजेन्मंत्री दीर्घस्वरैः क्रमात् २९ य
जेदग्रेष्वायुधानि चक्रशंखासिखेटकान् ॥ बाणं बाणासनं शूलं कपालं यादिभिः क्रमात् ३० लोकपालाः पुनः पूज्यास्तदस्त्राणि ततः परं
वशयेत्तिलहोमेन नरान्नरपतीनपि ३१ सिद्धार्थैर्जुहुयान्मंत्री रोगान्मुच्येत तत्क्षणात् ॥ पयोभिर्हुत्वा जयेन्मृत्यून्दूर्वाभिः शांतिमाप्नुयात् ॥
३२ ॥ पलाशकुसुमैः पृथिवीं धान्यैर्धान्यश्रियं व्रजेत् ॥ काकपक्षैः कृतो होमो द्वेषं वितनुते नृणां ॥ ३३ मरीचहोमान्मरणं रिपुः प्राप्नोति सर्वथा ॥
क्षुद्रादिचौरभूताद्यान्ध्यात्वा देवीं विनाशयेत् ३४ तारो दुर्गे युगं रक्ष मंत्यं ठांतं सलोचनं ॥ द्विठांता जयदुर्गेयं विद्या वेद्या दशाक्षरी ३५ तारा
दि दुर्गे हृदयं दुर्गे शिर उदाहृतं ॥ दुर्गायै स्याच्छिखा वर्म भूतरक्षिणि कीर्तितं ३६ तारादि दुर्गे युगलं रक्षिण्यस्त्रं समीरितं ॥ कालाभ्राभां कटाक्षैर
रिकुलभयदां मौलिबद्धेंदुरेखां ॥ शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्रां ॥ सिंहस्कंधाधिरूढां त्रिभुवनमखिलं तेजसा पूर
यंतीं ॥ ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ३७ बाणलक्षं जपेन्मंत्रं घृतेन जुहुयात्ततः दशांशं संस्कृते वह्नौ ब्राह्मणानपि भो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ग्रंगमंत्रानाह॥ ज्वलज्वलइतिस्वरूपं॥ शूलिनिपदंच दुष्टग्रह इत्यपिहुंस्वरूपं॥ अस्त्रंफट्॥ वह्निजायास्वाहाकारः॥ अंगान्याह॥ दुर्गेति॥ अयंभावः ज्वलिनिदुंहुंफट्

अक्षराक्षरोदितेपीठेपूजयेत्पूर्ववत्सुधीः॥ मंत्रंजपन्विशेद्युद्धेशत्रून्हन्यादिशेषतः ४० प्रजपेद्व्यवहारादौतत्रापिविजयीभवेत् अर्चये
दस्त्रशस्त्राणिजयार्थीविद्ययानया ४१ ज्वलज्वलपदांतेस्याच्छूलिनीतिपदंवदेत्॥ दुष्टग्रहहुमस्त्रांतेवन्हिजायावधिर्मनुः ४२
भूतेन्द्रियाक्षरःप्रोक्तोग्रहस्त्वद्रारिनाशकः॥ ऋषिर्दीर्घतमःप्रोक्तः ककुप्छंदउदाहृतं ४३ शूलिनीदेवताप्रोक्तासमस्तसुरवंदिता
दुर्गेहृदरदेशीर्षविंध्यवासिनितच्छिखा ४४॥ असुरांतेमर्दिनिस्याद्युद्धपूर्वेप्रियेपुनः॥ त्रासयद्वितयंवर्मदेवसिद्धसुपूजिते ४५
नंदिनीस्यादक्षयुगंमहायोगेश्वरीत्यमात्॥ शूलिन्याद्यांहुंफडंताःपंचांगमनवःस्मृताः ४६ अध्यारूढांमृगेंद्रंसजलजलधर
श्यामलांहस्तपद्मैः शूलंबाणंकृपाणामरिजलजगदाचापपाशान्वहंतीं चंद्रोत्तंसांत्रिनेत्रांचतसृभिरसिनाखेटकान्विभ्रतीभिःक
न्याभिःसेव्यमानांप्रतिभरभयदांशूलिनींभावयामि ४७ मनुमेनंजपेन्मंत्रीवर्णलक्षंविचक्षणः सर्पिषान्नेनहोमस्तुतद्दशांशमि
तोभवेत्॥ ४८॥ प्रागुक्तेपूजयेत्पीठेवक्ष्यमाणेनवर्त्मना॥ विधायपूजामंगानांपूज्याःपत्रेषुशक्तयः ४९ दुर्गाद्यावरदाविंध्यवासि
न्यसुरमर्दिनी युद्धप्रियापंचमीस्याद्देवसिद्धसुपूजिता ५० सप्तमीनंदिनीप्रोक्तामहायोगेश्वरीपरा दलाग्रेषुतदस्त्राणिशं
खचक्रमसिंपुनः ५१ गदेषुचापशूलानिपाशंपश्चाद्दिशाधिपान्॥ इत्थंजपादिभिःसिद्धःकुर्यात्कर्मनिजेप्सितं ५२ अष्टोत्तर
सहस्रंयस्तिलैस्त्रिमधुराप्लुतैः॥ नित्यंप्रजुहुयात्तस्यशांतिःस्यादतिमानुषी ५३ अष्टोत्तरशतंनित्यंसर्पिषाजुहुयान्नरः॥ वांछितंव
त्सरादर्वाक्प्राप्नुयान्महतींश्रियम्॥ ५४॥ ॥ हृदयंज्वलिनिवरदेहुंफट्॥ शिरःज्वलिनिविंध्यवासिनिहुंफट्॥ शिखेत्यादिप्रकारेणाषडंगानिकुर्
यादिति॥ अरिरिप जलजः शंखः॥ मंत्रांतरमुद्धरति ॥ ३ तिष्ठेत्यादिना स्पष्टार्थेनग्रंथेन पितामहःककारः॥ सनेत्रेंदुः इकारानस्वारयुक्तः॥ किंरतिभव

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अंगमंत्रानाह। ज्वलज्वल इति स्वरूपं। शूलिनिपदं च दुष्टग्रह इत्यपि हुं स्वरूपं। अस्त्रं फट्। वह्निजाया स्वाहाकारः। अंगान्याह। दुर्गेति। अयं भावः ज्वलिनि दुं हुं फट्

अष्टाक्षरोदिते पीठे पूजयेत्पूर्ववत्सुधीः॥ मंत्रं जपन्विशेषाद्युद्धे शत्रून्हन्याद्विशेषतः ४० प्रजपेद्व्यवहारादौ तत्रापि विजयी भवेत् अर्चये
द्दश शस्त्राणि जयार्थी विद्ययानया ४१ ज्वलज्वलपदांते स्याच्छूलिनीतिपदं वदेत्॥ दुष्टग्रह हुमस्त्रांते वह्निजायावधिर्मनुः ४२
भूतेन्द्रियाक्षरः प्रोक्तो ग्रहक्षुद्रारिनाशकः॥ ऋषिर्दीर्घतमः प्रोक्तः ककुप्छंद उदाहृतं ४३ शूलिनी देवता प्रोक्ता समस्तसुरवंदिता
दुर्गे हृद्वरदे शीर्षं विंध्यवासिनि तच्छिखा ४४॥ असुरांते मर्द्दिनि स्याद्युद्धपूर्वे प्रिये पुनः॥ त्रासयद्वितयं वर्म देवसिद्धसुपूजिते ४५
नंदिनी स्याद्रक्ष युग्मं महायोगेश्वरि क्रमात्॥ शूलिन्याद्या हुं फडंताः पंचांगमनवः स्मृताः ४६ अध्यारूढां मृगेंद्रं सजलजलधर
श्यामलां हस्तपद्मैः शूलं बाणं कृपाणामरिजलजगदाचापपाशान्वहंतीं चंद्रोत्तंसां त्रिनेत्रां चतसृभिरसिनाखेटकान्विभ्रतीभिः क
न्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ४७ मनुमेनं जपेन्मंत्री वर्णलक्षं विचक्षणः सर्पिषान्नेन होमस्तु तद्दशांशमि
तो भवेत्। ४८ प्रागुक्ते पूजयेत्पीठे वक्ष्यमाणेन वर्त्मना॥ विधाय पूजामंगानां पूज्याः पत्रेषु शक्तयः ४९ दुर्गाद्या वरदा विंध्यवासि
न्यसुरमर्द्दिनी युद्धप्रिया पंचमी स्याद्देवसिद्धसुपूजिता ५० सप्तमी नंदिनी प्रोक्ता महायोगेश्वरी परा दलाग्रेषु तदस्त्राणि शं
खचक्रमसिं पुनः ५१ गदेषुचापशूलानि पाशं पश्चाद्दिशाधिपान्॥ इत्थं जपादिभिः सिद्धः कुर्यात्कर्म निजेप्सितं ५२ अष्टोत्तर
सहस्रं यस्तिलैस्त्रिमधुराप्लुतैः॥ नित्यं प्रजुहुयात्तस्य शान्तिः स्यादतिमानुषी ५४ अष्टोत्तरशतं नित्यं सर्पिषा जुहुयान्नरः॥ वांछितं व
त्सरादर्वाक्प्राप्नुयान्महतीं श्रियम्॥ ५४॥

१ हृदयं ज्वलिनि वरदे हुं फट्। शिरः ज्वलिनि विंध्यवासिनि हुं फट्। शिखेत्यादि प्रकारेण षडंगानि कु
र्यादिति॥ अस्त्रिप जलजः शंखः। मंत्रांतरमुद्धरति॥ उत्तिष्ठेत्यादिना स्पष्टार्थेन ग्रंथेन पितामहः ककारः। सनेत्रेंदुः रकारान्तस्सारयुतः। किंरतिभ

प्रत्येकमेकैकोक्षरस्थानान्याह॥पादाद्येत्यादिना। आधारः लिंगयदंतरालः मंत्रंषोढा विभज्य वह्निपदैः षडंगन्यासः कर्तव्यः। षड्भिरित्यादिनाध्यानमाह॥
सौवर्णइति।करोटीनृकपालः। अहिभुजामष्टभुजां। सशृंगैः सायकैः सारानुच्चदिशान् बाणान्संपातयेत् होमशेषाज्येनसिंचनात्कुडवंप्रस्थं।मूढःप्रक्षेप्तं
दूर्वाहोमोभवेन्नृणां सर्ववांछितसिद्धिदः॥क्षुरिकाद्यानिशस्त्राणि जप्तानि मनुनामुना ५५ संपाताज्यविलिप्तानि वितरंति जयश्रियं
अश्वत्थार्कसमिद्भिर्वातिलैर्वा मधुरोक्षितैः ५६ होमोवशयति क्षिप्रमीप्सितान्मंत्रिणोनरान् उद्यदायुधहस्तां तां देवीं कालघनप्रभां॥
।५७।ध्यात्वात्मानं जपेन्मंत्रं स्पृष्ट्वार्थं मुंचति ग्रहः। सर्पाखुवृश्चिकादीनां विषमाशु विनश्यति ५८ मनुनानेनविधिवन्मंत्रविद्दंता
धिपामंत्रेणानेन संजप्तान्वाणान्नाशयसाधकः ५९ विमुंचेत्प्रतिसेनायां सा द्रुतं विद्रुता भवेत् शूलपाशधरां देवीं ध्यात्वात्मानमनाकु
लः प्रविशेच्छत्रुदेशं यो जित्वा याति स निर्व्रणः॥ जतुपात्तिलसिद्धार्थैर्लक्षमेकं यथाविधि ६१ नामयुक्तं जपेन्मंत्रं यस्यासौ मृत्युमेष्य
ति। गुटिकां गोमयोत्पन्नां हुत्वाष्टशतसंख्यया॥६२॥सप्ताहात्कुरुते मंत्री विद्वेषं स्निग्धयोर्मिथः। गृहीत्वा गोमयं व्योम्नि त्रिसहस्रं ज
पेत्ततः ६३ गमिष्यतो द्वारदेशे निखातं स्तंभनं भवेत् बहुनोक्तेन किं सर्वं साधयेन्मनुनामुना।६४।उत्तिष्ठपदमाभाष्य पुरुषिस्या
त्पदं ततः॥पितामहः सनेत्रेंदुः सपिपिस्याद्द्वयं चमे॥६५॥समुपस्थितमुच्चार्य यदि शक्यमनंतरं॥ अशक्यं चापुनस्तन्मे वदेद्भगव
तिं ततः ६६ शमयाग्निवधूसमन्विं शाहूर्णात्मकोमनुः॥ ऋषिरारण्यकश्छंदो प्रस्तारपंक्तिरुदाहृतं ६७ देवतावनदुर्गास्यात्सर्वदुर्गवि
मोचनी पादाष्टसंधियुग्दलिंगाधारोदरेषु च ६८ पार्श्वहृत्स्तनकंठेषु पुनर्वा हृष्टसंधिषु॥मुखनासाकपोलाक्षिकर्णभ्रूमध्यमू
र्द्धसु ६९ मंत्राक्षराणि विन्यस्य देवताभावसिद्धये षड्भिः स्वरैर्भिरष्टाभिरष्टाभिः षड्भिरिन्द्रियैः ७० मंत्रार्णैरंगक्लृप्तिः स्याज्जातियुक्तैर्य
थाक्रमं॥सौवर्णांबुजमध्यगां त्रिनयनां सौदामिनीसन्निभां चक्रं शंखवराभयानि दधतीमिंदोः कलां बिभ्रतीं। ग्रैवेयांगदहारकुंडलधरा
माखंडलाद्यैस्तुतां ध्यायेद्विंध्यनिवासिनीं शशिमुखीं पार्श्वस्थपंचाननाम् ७१॥ कारस्कारः विषवृक्षः अश्रमांभाषायां निर्गुंडी भाषांतरे कोकिला कुलिकोषि॥

एवंध्यात्वाजपेल्लक्षचतुष्कंतद्दशांशतः॥ जुहुयाद्द्विधामंत्रीशालिभिःसर्पिषातिलैः ७२ प्राग्गीरितेयजेत्पीठेदेवीमंगादिभिःसह॥ अंग
पूजांयथापूर्वंदलमूलेष्विमायजेत्॥ ७३॥ आर्यादुर्गाचभद्राख्याभद्रकालीततोंबिका॥ क्षेमान्यावेदगर्भाख्याक्षेमंकर्यष्टशक्तयः ७४ अस्त्राणि
पत्रमध्येषुशंखचक्रासिखेटकान्॥ बाणकोदंडशूलानिकपालंतानिपूजयेत् ७५ ब्राह्म्याद्याःसुदलाग्रेषुलोकपालास्ततःपरं॥ सिद्धमंत्र
प्रयोगेषुदेवीमित्थंविचिंतयेत् ७६ कालपावकसन्निभांकलितार्द्धचंद्रशिरोरुहांभालनेत्रविभूषणांभपदापिसिंहनिषेदुषीं॥ चक्र
शंखकृपाणखेटकचापबाणकरोत्थितां शूलवाहिभुजांभजेविजिताखिलासुरसैनिकां॥ ७७॥ प्रातःस्नानरतोनित्यमष्टोत्तरसहस्रकं
जपेत्तस्याशुसिद्ध्यंतिधनधान्यादिसंपदः ७८ अनेनैवविधानेनग्रहक्षुद्ररिपूञ्जयेत्॥ नाभिमात्रोदकेस्थित्वादेवीमर्कगतांस्मरेत् ७९ ज
पेदष्टोत्तरशतंलभतेमहतींश्रियं॥ अश्वत्थवटवृक्षोत्थैःसमृद्धैरर्चितेनले ८० होमंसमिद्वरैःकुर्यान्नाशयत्यपरांकुलं॥ घोराभिचारसंभूता
दीन्शमयेद्धिधिनामुना ८१ अपामार्गसमिद्भिर्वातिलैर्वाकाननोद्भवैः॥ सर्षपैर्वाकृतोहोमःक्षुद्रापस्मारनाशनः ८२ अभीष्टसिद्ध्यैजुहु
यादर्कैर्मंत्रीसमिद्वरैः॥ सहस्रमर्कवारादिदिवसान्दशसंयतः॥ ८३॥ शरान्शुद्धान्समादायशकलान्मंत्रनामुना जुहुयादेधितेवह्नौस
प्तवारमतंद्रितः ८४ साधयेदखिलंशत्रुदर्भीष्टंमंत्रवित्तमः॥ कुमुदैर्वशयेद्धिप्राज्ञन्नृपतीन्पद्महोमतः॥ ८५॥ तत्पत्नीःसत्फलैःफुल्लैर्वश्यंकुहू
रहोमतः॥ शूद्रान्लवणहोमेनजातीपुष्पैःशुभांगनाः ८६ व्रीहिभिर्जुहुयान्नित्यंवत्सराद्व्रीहिमान्भवेत्॥ दूर्वाहोमेनदीर्घायुर्मधुना
रत्नवान्भवेत् ८७ अन्नैरन्नसमृद्धिःस्याद्राज्येनलभतेधनं गोदुग्धेनगवांवृद्धिमाप्नुयान्नात्रसंशयः ८८ ज्वरेग्रहेगरेसर्पेतज्जन्या
संस्पृशञ्जपेत् स्पृष्ट्वाशूलकरांदेवींतत्क्षणाद्देवतान्हरेत् ८९ दर्भितंसाध्यनामार्णैःपत्रैर्भूर्जमिमंलिखेत्॥ कुलालमृत्कृतायांचप्रति
मायांहृदिन्यसेत्॥ ९०॥ कृतप्राणप्रतिष्ठांतांपूजितांकुसुमादिभिः॥ निधायाग्रेजपेन्मंत्रमष्टोत्तरसहस्रकम् ॥ ९१॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संध्यासुपक्षमात्रेण वशमायाति वांछितः॥ अभ्यर्च्य देवीमनले तीक्ष्णतैलेन मंत्रवित् ९२ हुत्वायुतं निधापाग्रे तीक्ष्णां स्त्रिंशाच्छरां पुनः
तेषु संपातयेद्भूपः स्पृष्ट्वा तान्नियुतं जपेत् ९३ वेधयेत्परसेनायांस्त्रशान्नष्टादिशो दश॥ प्राप्नुयान्नष्टसंज्ञा सा पलायनपरायणा ९४
जपित्वासितगुंजानां कुडवं कुलिकोदये। विकिरेच्छत्रुसेनायां गूढः संत्रापणादिषु ९५ ज्वरमारीमहारोगैः पीडिता सैन्यनायकैः। पर
स्परविरोधन नश्येयुश्छेन्म्रियेतसा ९६ सेनायांस्तंभनं मंत्री कारस्करसमुद्भवैः॥ पुष्पैः सहस्रं जुहुयात्तत्र सैन्यं निवर्तयेत्। अङ्गार
वारे कुलिके जन्त्वाभसा वितोद्भवं॥ विनिःक्षिपेद्रिपोर्भूमिं विद्विष्टो देशतो व्रजेत् ९८ मरुन्निपातितैः पत्रैः कारस्करसमुद्भवैः तस्य
पादरजोयुतैर्होमादुच्चाटयेदरीन् ९९ कारस्करमयीं कृत्वा प्रतिमां च सुशोभनां जप्तां प्रतिष्ठितप्राणां छेदयेदंगशः पुनः १०० काको
लूकवसायुक्तामष्टोत्तरसहस्रकं कृष्णपक्षे चतुर्दश्यां श्मशाने हव्यवाहने १०१ जुहुयान्म्रियते शत्रुरेवमेव दिनत्रयात्॥ उन्मत्तस
मिधैर्होमान्मताः स्युः शात्रवः क्षणात् १०२ उलूककाकयोः पक्षैः खवसारक्तसंयुतैः जुहुयान्निशि क्रांतारे शत्रुः कालातिथिर्भवेत्॥ १०३
शत्रोः प्रतिकृतिं मंत्री प्रतिष्ठितसमीरणां विशोषकविलिप्तांगोमत्युष्णे निक्षिपेज्जले १०४ ज्वराक्रांतो भवेच्छीघ्रं दग्ध्य सेकाच्छमं नयेत्
तर्जनीत्रिशिखदोर्भ्यां धारयंती भयंकरीं १०५ रक्तां ध्यात्वा रवेर्बिंबे प्रजपेदयुतं मनुं मारयेदचिराद्देवरिपून्बंधुसमन्वितान् १०६ खड्ग
खेटकसंकुद्धां सन्नद्धां भानुमण्डले ध्यात्वा मंत्रं जपेन्मंत्री नाशयेदचिरादरीन् १०७ चापबाणधरां भीमां सिंहस्थां ज्वलनोपमां॥ सृजंती
बाणनिवहान्धावन्तीं तादृशीं रिपुं १०८ ध्यात्वा जपेन्मनुमिमं मयुतं तोयमध्यगः॥ रिपुं च परसेनां च द्रुतमुच्चाटयेद्ध्रुवं १०९ आनित्य
कसमिद्धोमान्मुच्यते रोगशोकतः॥ पुष्पैस्तदीयैर्वशयेन्मधुराक्तैर्मत्तगजान् ११० रक्षायै पंचगव्येन लिंपेज्जप्तेन दंतिनः गव्याज्यति
लसिद्धार्थैरानित्यकसमिद्वरैः १११ दुग्धान्नपंचगव्याभ्यां तंडुलेन घृतेन च॥ एतैः पृथक् पृथक् द्रव्यैरष्टोत्तरसहस्रकं ११२ जुहुयादि
नशो विप्रान्भोजयेन्मधुरादिभिः गुरवे दक्षिणां दद्याद्वस्त्राभरणसंयुतां ११३ मातंगाश्च तुरंगाश्च वर्द्धंते विधिनामुना सर्वव्याधिविनिर्मुक्ताः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तस्य शत्रोः खवसा काकोलूकवसा ॥ तादृशं बाधावंतं ॥ अनित्यसमिधं ॥ कारस्करसमिधं ॥ आदित्यकं समिधमिति पाठे ॥ अवटात् गर्तात् दुर्गात् ॥ यंत्रमाह ॥
मर्द्दिनी महिषमर्द्दिनी ॥ महिषमर्द्दिन्यंतराणि ॥ अष्टपत्रेषु मूलमंत्रांतराणि त्रिशो लिखेत् ॥ त्रिशस्त्रीणि त्रीणि द्वादशसु लिखेत् ॥ अंत्यमंत्यपत्रे लिखेत् ॥ पश्चाद्

कारयेद्दृढसारवृक्षेण शिल्पिनायुधपंचकं ॥ शंखखड्गरथांगानि शार्ङ्गं कौमोदकीं क्रमात् ११५ पंचगव्येषु निःक्षिप्य तानि स्पृष्ट्वा मनुं जपे
त् सम्यक् पंचसहस्राणि तेषु संपातयेत्पुनः ११६ तावदाज्येन जुहुयान्मंत्रैः स्वैः पूजयेत्क्रमात् ॥ उद्धृत्य पंचगव्येभ्यः पूर्ववत्प्रजपेन्म
नुं ११७ अवटान्यं च निखने दिक्षु मध्यादिषु क्रमात् ॥ अवटेष्वेषु पूर्वेषु पंचगव्येन साधकः ११८ आयुधानि प्रजप्तानि पंच घोषपुरः
सरं ॥ विन्यसेत्तेषु मध्यादि पूजां कुर्याद्यथापुरः ११९ वालुकाभिः समापूर्य भूङ्गिः कुर्यात्समं स्थलं ॥ बलिं च विकिरेत्तत्र तेषां मंत्रैर्यथाक्र
मं १२० ॥ दिक्पतिभ्यो बलिं दत्वा ब्राह्मणान्भोजयेत्ततः ॥ दीनांधकृपणादींश्च तोषयेद्भोजनादिभिः १२१ गुरवे दक्षिणां दद्याद्दात्मवि
त्तानुसारतः ॥ यत्रैवं विहिता रक्षा देशे वा नगरेपुरे १२२ ग्रामे गेहेथवा तत्र वर्द्धंते संपदः सदा ॥ अश्मपातादयो दोषा भूतप्रेतादिसं
युताः १२३ अभिचारकृताः कृत्या रिपुचौराद्युपद्रवाः ॥ नेक्ष्यंते तां दिशं भीतास्तर्जिता देवताज्ञया १२४ पद्मं भानुदलान्वितं प्रविलि
खेत्तत्कर्णिकायां पुनस्तारं शक्तिगबीजसाध्यसहितं तत्केसरेषु क्रमात् ॥ मर्द्दिन्या मनुसंभवान्युगलशो वर्णान्पुनः पत्रगान्मंत्रा
र्णान्त्रिशो विधाय विलिखेदंत्यं तदंत्ये दले १२५ मातृकावर्णसंवीतं भूपुरद्वयमध्यगं ॥ यंत्रं विंध्यनिवासिन्याः प्रोक्तं सर्वसमृद्धि
दं १२६ रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम् राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छतां १२७ सुतार्थिनीनां सुतदं रोगिणां
रोगशांतिदं बहुनाकिमिहोक्तेन यंत्रं तत्कामदोमतं ॥ १२८ ॥ इति शारदातिलके एकादशः पटलः ११ ॥ ० ॥

हि मातृकावर्णान् तद्बहिः क्षोणीपुरद्वयं एतद्यंत्रमुक्तफलदं ॥ इति गूढार्थदीपिकायामेकादशः पटलः ११ ॥ समाप्तः ॥ ० ॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दैर्गान्मंत्रान्यथावदभिधायाऽधुनात्रैपुरंवक्तुमारभते॥ अथेत्यादिना॥ वियद्धकारः। भृगुः सकारः। हुताशनः रेफः। भौतिकः ऐकारः विंदुः अनुस्वारः। एतैः सपिं
डितं। प्रथमंवीजं पुनर्वियत्॥ तदादिः सकारः। कस्वरूपं। इंद्रः लकारः। अग्निरेफः। वामाक्षि रिकारः विंदुसहितः। एतैः सपिंडितं द्वितीयं। आकाशो हकारः भृगुः सकारः
वह्निः रेरेफः। मनुः औकारः। इंदुखंडो विंदुः। एतैः सपिंडितंतृतीयं॥ वीजानां संज्ञा वाग्भवमित्यादि न्यासस्थानान्याह॥ नाभेरित्यादिना॥ शंखयोः कंठपार्श्वयोः॥ न

अज्ञानतिमिरध्वंसि संसारार्णवतारकं॥ आनंदवीजमवतादतर्क्यं त्रैपुरंमहः १ अथवक्ष्ये परांविद्यां त्रिपुरांमतिगोपितां॥ यां
ज्ञात्वा सिद्धसंघानामधिपो जायते नरः २ वियद्भृगुहुताशस्थो भौतिको विंदुशेखरः वियत्तदादिकेंद्राग्निस्थितं वामाक्षिवि
दुमत् ३ आकाशभृगुवह्निस्थो मनुः सर्गेंदुखंडवान् वाग्भवंप्रथमंवीजं कामंवीजं द्वितीयकं ४ तृतीयं कामराजाख्यं त्रिभि
र्वीजैरितीरिता पंचकूटात्मिका विद्या वेद्या त्रिपुरभैरवी ५ ऋषिः स्याद्दक्षिणामूर्तिश्छंदः पंक्तिः समीरितं। देवता देशिकै
रुक्ता देवी त्रिपुरभैरवी॥ ६॥ नाभेराचरणं न्यस्येद्वाग्भवं मंत्रवित्तमः॥ हृदयान्नाभिपर्यंतं कामवीजं प्रविन्यसेत्। शिरसो हृत्प्र
देशांतं तार्तीयं विन्यसेत्ततः। आद्यं द्वितीयं करयोस्तार्तीयमुभयोर्न्यसेत् ८ मूर्द्धाधारे हृदि न्यस्येद्रूपो वीजत्रयं क्रमात्। नवयोन्या
त्मकं न्यासं कुर्याद्वीजैस्त्रिभिः पुनः ९ कर्णयोश्चिवुके भूयः शंखयोर्वदने पुनः। नेत्रयोर्नसि विन्यस्येदंसयोर्जठरे पुनः १०
ततः कूर्परयोः कुक्षौ जानुनोर्ध्वजमूर्द्धनि पादयोर्गुह्यदेशे च पार्श्वयोर्हृदयांवुजे ११ स्तनयोः कंठदेशे च रत्यादिमथ विन्यसे
त्॥ मूले रतीं हृदि प्रीतिं भ्रुवोर्मध्ये मनोभुवां॥ १२॥ ९ सिनासिकायां पिठरे उदरे कौर्परयोः। वाहुमध्यपृष्ठभागयोः॥ ध्वजमूर्धनि॥ अनन्तरं रत्यादि
न्यासस्थानान्याह॥ मूलेति॥ वालात्रिपुरावीजन्यासमाह। वालेति॥ एषपूर्वोक्तिषु। एष्वेव मूलेशीत्यादिना। तथैव ईशानादिमूर्तिन्यासस्थानानि निरूप्यंते मूर्ध्नीत्यादिना॥
कयं ईं ईशानाय मनोभवसहिताय नमः॥ तंतत्पुरुषाय मकरध्वजसहिताय नमः॥ इत्यादि प्रकारेण ऊर्ध्वादिमुखेष्वपि तान्येवा तथैव पयाक्रमं न्यसेदित्याह॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ऊर्ध्वेति।भृगुः सकारः।व्योम हकारः।अग्निः रेफः।सद्यः औकारः।तदादि ऐकारः।प्रतिलोमेन पंचह्रस्वस्वरसमन्वितानि एषां मूर्तीनां बीजं ततश्च सकारहकाररेफ औ
कार ह्सौं ह्सैं ह्सुं ह्सिं ह्सं।।एवं प्रयोगः।।प्रधानमंत्रबीजत्रयमध्ये।आद्यबीजत्रयमध्ये।आद्यबीजेन दीर्घभाजा अगन्निपेत्याह।षडिति।सर्गान्तेति।विसर्गयुक्तसका
रसहितानीति।।सुभगादिशक्तीनां न्यासस्थानान्याह।।भालइति।।लंबिकाघंटिका।अधिष्ठानं।लिंगाधारं पंचतारा एव निरूप्यंते।।वागिति।।वाग्बीजं ऐमिति।ऐं

बालाबीजैस्त्रिभिर्न्यस्येत्स्थानेष्वेषु विलोमतः।।अमृतेशोऽचयोगेशो विश्वयोनिः क्रमादिमाः १३ विलोमबीजैर्विन्यस्येन्मूर्तिन्यासम
थाचरेत्।।स्वस्वबीजादिकं पूर्वं मूर्ध्नीशानमनोभवं १४ न्यसेद्वक्त्रे तत्पुरुषं मकरध्वजमात्मवित्।।हृद्यघोरकुमारादिकं दर्पतदनंत
रं १५ गुह्यदेशे प्रविन्यस्येद्वामदेवादिमन्मथं।सद्योजातं कामदेवं पादयोर्विन्यसेत्ततः १६ ऊर्ध्वप्राग्दक्षिणोदीच्य पश्चिमेषु मुखेषु ता
न् प्रविन्यसेद्यथा पूर्वं भृगुव्योमाग्निसंस्थितः।।१७।।सद्यादिपंचह्रस्वस्थो बीजमेषां प्रकीर्तितं।।षट् दीर्घयुक्तेनाद्येन बीजेनांगक्रिया
मता १८ पंचबाणान्ततो न्यस्येन्मंत्री त्रैलोक्यमोहनान्।द्रामाद्यान्द्राविणीं मूर्ध्नि द्रीडग्व्यां क्षोभिणीं पदे १९ क्लीं वशीकरिणीं वक्त्रे गु
ह्येब्लूं बीजपूर्विकाम् आकर्षिणीं हृदि पुनः सर्गांतभृगुसंयुतम् संमोहनीं क्रमादेवं बाणन्यासोयमीरितः।।भालभ्रूमध्यवदनकंठि
कांकठहृत्सु च २१ नाभ्यधिष्ठानयोः पंचताराद्याः सुभगादिकाः।।न्यस्तव्या विधिना देव्यो मंत्रिणा सुभगा भगा २२ भगसर्पिण्यथ
परा भगमालिन्यनन्तरं।।अनंगानंगकुसुमा भूयश्चानंगमेखला २३ अनंगमदना सर्वामदविभ्रममंथरा ।प्रधानदेवतावर्णा भूषणा
द्यैरलंकृताः २४।।अक्षस्रक्पुस्तकाभीतिवरदाढ्यकरांबुजाः।।वाक्कामब्लूं पुनः स्त्रीं सः ताराः पंचोदितास्त्वमी।।न्यासं कुर्याद्भूषणा
ख्यं ततः साधकसत्तमः न्यसेच्छिरसि भालभ्रूकर्णाक्षियुगले नसि २६ गंडयो रोष्ठयोर्दंतपंक्त्योरास्ये न्यसेत्स्वरान्। चिबुके यगले कं
ठे पार्श्वयोस्तनयुग्मके ।। २७ ।। क्लीं ब्लूं स्त्रीं सः।।अमी पंचताराः।भूषणान्यासे षोडशस्वरन्यासस्थानान्याह।।न्यसेदित्यादिना।।ककारादिरकारपर्यंतं सप्तविं
शत्यक्षरन्यासस्थानानि कथ्यंते।।चिबुकेत्यादिना।।चिबुके ऊर्ध्वस्थानं।।तत्र लनद्वयमेएकः।।पाणिपृष्ठे।प्राच्यां।उक्तस्थानेषु अपसव्यथाक्रमं वलशवषसान्। शा

कांच्यादीत्यादिना॥ कांचीकट्याभरणं॥ ग्रैवेयकं कंठभूषणं। कटकं बाहुभूषणं॥ मौलिः शिरोभूषणं ध्यानमाह॥ उद्यदिति जपवटीं जपमालां विद्यापुस्तकमा त
त्वलसं॥ पीठमंत्रमुद्धरति 'वाग्भवमित्यादिना॥ वाग्भवमैकारः॥ लोहितः पकारः॥ यैसरूपां श्रीकं ठ अकारः लोहितपकारः॥ अनलो रेफः। सएव दीर्घवान्। राइ
तिभवति। यैसरूपां परापरायेसरूपं॥ हसौसदाशिवमहाप्रेतस्वरूपं ङें तेचतुर्थ्यंतं पद्मासनेनमः स्वरूपं॥ ततश्च ऐं परायै अपरायैपरापरायैहसौः सदाशिव

दोर्मूलयोः कूर्परयोः पाण्योस्तत्पृष्ठदेशतः॥ नाभौ गुह्ये पुनश्चोर्वोर्जानुनोर्जंघयोस्ततः २८ स्फिचोः पत्तलयोः पश्चाच्चरणांगुष्ठयोर्द्वयोः
कादिशांतान्यसेद्वर्णान्स्थानेष्वेषु समाहितः २९ कांच्यां ग्रैवेयके पश्चात्कटके हृदि शत्यके कर्णकुंडलयोर्मौलौ वललानुपक्षसा
न्शाहो ३० अष्टाविमान्प्रविन्यस्येद्देवदेशिकसत्तमः॥ एवंन्यस्तशरीरोसौ ध्यायेत्त्रिपुरभैरवीं ३१ उद्यद्भानुसहस्रकांतिमरु
णक्षौमां शिरोमालिनीं रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरं॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवीं बद्धहि
मांशुरत्नमुकुटां वंदे रविंदस्थितां ३२ दीक्षां प्राप्य जपेन्मंत्रं तत्वलक्षं जितेंद्रियः॥ पुष्पैर्भानुसहस्राणि जुहुयाद्ब्रह्मवृक्षजैः ३३ त्रिम
ध्वक्तैः प्रसूनैर्वा करवीरसमुद्भवैः॥ पद्मं वसुदलोपेतं नवयोन्याढ्यकर्णिकं ३४ इच्छादिशक्तिभिर्युक्तं भैरव्याः पीठमर्चयेत॥ इच्छा
ज्ञाना क्रिया पश्चात्कामिनी कामदायिनी ३५ रती रतिप्रियानंदा नवमी स्यान्मनोन्मनी॥ वरदाभयधारिण्यः संप्रोक्ता नवशक्त
यः ३६ वाग्भवं लोहितोरायैश्रीकंठं लोहितोनलः॥ दीर्घवान्यैपरापश्चादपरायैहसौः पुनः ३७ सदाशिवमहाप्रेतङें तं पद्मासनं
नमः॥ अनेन मनुना दद्यादासनं श्रीगुरुक्रमं ३८ प्राङ्गन्ध्यपोन्यंतरालेषु जपेत्कल्पयेत्पुनः॥ पंचभिः प्रणवैर्मूर्तिं तस्यामावाह्य
देवताम् ३९ पूजयेदागमोक्तेन विधानेन समाहितः॥ तास्वाकृशक्तिकमलाहसस्वप्रेंहसौः स्मृताः ४० वामकोणे यजेद्देव्या रतिमिंद
समप्रभां॥ रतिं पाशधरां सौम्यां मदविभ्रमविह्वलां ४१॥ १९ महाप्रेतपद्मासनायनमः इतिसिद्धमंत्रः॥ पूर्वमध्ययोरंतराले पंचप्रणवानेव दर्शयति॥ तारे

त्यादिना देव्या वामभागकोणेषु संपूज्या यथान्यासं पूर्वं। पूजापटलोक्तप्रकारेणां गानि संपूज्य निजैर्मंत्रैः॥ पूर्वोक्तस्वस्वबीजैर्वर्णान् यथोक्तलक्षणान भ्यर्चयेत्

प्रीतिं रक्षिराकोणस्थां तप्तकांचनसन्निभां ॥ अंकुशं प्रणतिं रोम्यैर्धारयंतीं समर्चयेत् ४१ अग्रे मनोभवां रक्तां रक्तपुष्पाद्यलंकृतां ॥
रक्तकार्मुकपुष्पेषून्धारयंतीं शुचिस्मितां ॥ ४२ ॥ अंगान्यभ्यर्चयेत्पश्चाद्यथापूर्वं विधानवित् ॥ दिक्ष्वग्रे च निजैर्मंत्रैः पूजयेद्बाणदेवताः
४३ ॥ हस्ताब्जैर्धृतपुष्पेषुप्रणामाभूतसप्रभाः ॥ अष्टयोनिषु शक्तीः पूजयेत्तु भगादिकाः ४४ मातरो भैरवांकस्थाः मदविभ्रमविह्वलाः ॥
अष्टपत्रेषु संपूज्या यथावत्कुसुमादिभिः ॥ ४५ ॥ लोकपालांस्ततो दिक्षु तेषामस्त्राणि तद्बहिः ॥ पूर्वजन्मकृतैः पुण्यैर्ज्ञात्वैनां परदेवतां ॥
४५ ॥ यो भजेद्दत्तमार्गेण स भवेत्संपदां पदं ॥ एवं सिद्धमनुर्मंत्री साधयेदिष्टमात्मनः ॥ ४७ ॥ जुहुयादरुणांभोजैरदोषैर्मधुराप्लुतैः ॥ ल-
क्षसंख्यं ततर्द्वुवाप्रस्थं हं भोजयेद्द्विजान् ॥ ४८ ॥ वनिता युवती रम्याः पूजयेद्देवताधिया ॥ होमांते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः ४९
एवं कृते जगद्वश्या रमा या भवनं भवेत् ॥ रक्तोत्पलैस्त्रिमध्वक्तैरुरौर्वा हयारिजैः ५० पुष्पैः पयोन्नैः सघृतैर्होमो विश्वं वशं नयेत् ॥ वाक्-
सिद्धिं लभते मंत्री पलाशकुसुमैर्हुतात् ॥ ५१ ॥ कर्पूरागरुसंयुक्तं गुग्गुलुं जुहुयात्सुधीः ॥ ज्ञानं दिव्यमवाप्नोति तेनैव स भवेत्कविः ५२ क्षीरो-
त्थैरमृतखंडैर्होमः सर्वोपमृत्युजित् ॥ दूर्वाभिरायुषे होमः क्षीराक्ताभिर्दिनत्रयं ५३ गिरिकर्णीभवैः पुष्पैर्ब्राह्मणान्वशयेद्धुतात् कह्लारैः
पार्थिवान्पुष्पैस्तद्वधूः कर्णिकारजैः ५४ मल्लिकाकुसुमैर्हुत्वा राजपत्नान्वशं नयेत् ॥ कोरंटकुसुमैर्वैश्यान्शूद्रान्पाटलोद्भवैः ५५ अनु-
लोमविलोमांतःस्थितसाध्याह्वयान्वितं ॥ मंत्रमुच्चार्य जुहुयान्मंत्री मधुरलोलितैः ५६ सर्षपैर्लवणोन्मिश्रैर्वशयेत्पार्थिवान्क्षणात् ॥ अने-
नैव विधानेन तत्पत्नीस्तत्सुतानपि ५७ जातीबिल्वफलैः पुष्पैर्मधुरत्रयलोलितैः ॥ नरनारीनरपतीन्होमतो वशयेद्ध्रुवम् ५८ मालतीबकु-
लोद्भूतैः पुष्पैश्चंदनलोलितैः ॥ जुहुयात्कवितां मंत्री लभते वत्सरांतरे ५९ मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः ॥ जुहुयाद्वशयेल्लोकं स्त्रि-
॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हयारिजैः। करवीरजैः। अमृताखंडैः गुडूचीखंडैः॥ मध्वाज्यमित्यपमर्थः॥ यंत्रमाह॥ मध्वाद्यमिति॥ प्रथमं पूर्वेनिर्ऋतिवायव्यकोणं वह्निमंडलं कृत्वा। तत्पू
र्वकोणमध्ये दक्षिणोत्तररेखां कृत्वा तद्द्वयोर्पत्रं कृत्वा। यथा षट्कोणमध्ये कोणं भवति तथा कुर्यात्॥ एवं कृते नवयोनिचक्रं भवेत्॥ तत्र षट्कोणमध्ययोनि
मारभ्य॥ उपरितनमीशानकोणमारभ्य अष्टयोनिषु मंत्रबीजानि त्रीणि त्रीणि यथाक्रमं पुनः पुन र्लिखेत्॥ उपरि अष्टदलं पद्मं कृत्वा तत्पत्रेषु प्रत्येकं त्रिशः॥ त्रि

पाटलैः कुमुदैः कुंदैरुत्पलैर्नागचंपकैः। नंद्यावर्तैर्विकसितैः कृतमालैर्जुहोति यः ६१ जायते वत्सरादर्वाक् श्रिया विजितपार्थिवः
॥ साज्यमन्नं प्रजुहुयाद्भवेदन्नसमृद्धिमान् ६२ कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी कंदर्पादधिकं सद्यः सौंदर्यमधिगच्छति।
६३ लाजान्प्रजुहुयान्मंत्री दधिक्षीरमधुप्लुतान्। विजित्य रोगानखिलान्स जीवेच्छरदां शतं ६४ पादद्वयं मलयजं पादं कुंकुमकेस
रं। पादं गोरोचनायाश्चतानि पिष्ट्वा हिमांबुना ६५ विदध्यात्तिलकं भूपो यान्यश्येद्यैर्विलोक्यते। यान्स्पृशेत्स्पृशते येर्वा वश्याः स्यु
स्तस्य ते चिरात् ६६ कर्पूरकपिचोराणां समभागानि कल्पयेत्॥ चतुर्भागा जटामांसी तावती रोचना मता ६७ कुंकुमं सप्तभागं स्या
द्विभागं चंदनं मतं अगरुर्नवभागः स्यादिति भागक्रमेण च ६८ हेमाद्रिःकन्यकापिष्टमेतत्सर्वं सुसाधितं॥ आदाय तिलकं भाले
कुर्यादुभूमिपतीन्नरान् ६९ वनितां मदगर्वाढ्यां मदोन्मत्तान्मतंगजान्॥ सिंहव्याघ्रान्महासर्पान्भूतवेतालराक्षसान् ॥ ७० ॥
दर्शनादेव वशयेत्तिलकं धारयन्नरः। मध्वाद्यं नवयोनिषु प्रविलिखेद्बीजानि वर्णोस्त्रिशो गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य
लिप्यावृतां भूबिंबद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं यंत्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभकं श्रीप्रदं ७१ अस्मिन्यंत्रे समावाह्य
सम्यक् संपूज्य देवताम् होमेन कृत संपातं लाक्षालोहत्रयावृतं ७२ विधृतं वाहुना यंत्रं पुंडेषु विजयावहा। वादेवा द्विजपंक्तिर्यात्कवि
त्वं पण्डकेलेदिशेत् ७३॥ ९ शोगायत्रीवर्णान्। तदुपरि वृत्तं कृत्वा तन्मध्ये मातृकावर्णान्। तदुपरि भूपुरद्वयं। तत्कोणेषु मन्मथबीजं लिखेत्। एवं यंत्रे प्रोक्तफलदं

अस्मिन्नर्थे मध्वादीति। ग्रंथो योजनीयः त्रिलोहीमुद्रिकाविधानं वक्तुमारभते अस्मिन्नित्यादिना। लोहत्रयं सुवर्णरजततास्राणि। यंत्रांतरमाह। वह्नेर्गेहमिति। षट्कोणं लिखित्वा॥
तन्मध्ये कामबीजं तन्मध्ये ह्रीमिति लिखित्वा॥ तत्कोणेषु वाग्भवं प्रथमबीजं लिखेत्॥ ततः धिषु हुंकारी पश्चात्॥ श्रीबीजेन वेष्टयेद्बहिः ॥ एतदुक्तं फलदम् ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यंत्रांतरमाह॥ अथ रएकारः खविंदुयुतः॥ ब्रह्मा ककारः इंद्रस्थः लकारः युतः॥ शशांकः विंदुः ईश्वररूपं। एतैर्युक्तं द्वितीयबीजं॥ भृगुः सकारः सर्गाधः विसर्गयुतः

आयुरारोग्यमित्राणिपुत्रान्पौत्रान्विवर्द्धयेत् कामं षट्कोणमध्ये लिखतु पुनरिमं षट्सु कोणेषु पश्चात्पत्रेषु द्व्यष्टसंख्येषु मुमथ
पुरतो व्योमबीजेन वीतं॥ क्षोणीविंबांतरस्थं भुजदललिखितं रोचनाकुंकुमाभ्यां प्रोक्तं सौभाग्यसंपन्निरुपमकविताकीर्तिदं यंत्र
मेतत्॥ ७५॥ वह्नेर्गेहद्वयांतरस्थमदने मायां लिखेद्वाग्भवं षट्कोणे षयसंधिषु प्रविलिखेद्धूंकारमावेष्टयेत्॥ स्त्रीबीजेन समीरि
तं त्रिभुवनप्रक्षोभकं त्रैपुरं॥ यंत्रं पंचमनोभवात्मकमिदं सौन्दर्यसंपत्करम् ७६ अथ रेविंदुमानाद्यो ब्रह्मेंद्रस्थः शशीयुतः॥
द्वितीयं भृगुसर्गाढ्यो मनुस्तार्तीयमीरितं ७७ एषा बालेति विख्याता त्रैलोक्यवशकारिणी॥ जपपूजादिकं सर्वमस्याः पूर्वव
दाचरेत् ७८ मान्मथं त्रिपुरादेवि विद्महे पदमीरयेत्॥ उक्त्वा कामेश्वरिपदं प्रवदेद्धीमहीततः ७९॥ तदंते प्रवदेद्भूयस्तन्नः
क्लिन्नप्रचोदयात्॥ गायत्र्येषा समाख्याता त्रिपुरीसर्वसिद्धिदा ८० स्तुत्यानया त्वां त्रिपुरे स्तोष्येभीष्टफलाप्तये॥ यया व्रजं
तिता लक्ष्मीमनुजाः सुरपूजिता॥ ८१॥ ब्रह्मादयस्तुतिपदैरपि सूक्ष्मरूपां जानंति नैव जगदादिमनादिमूर्त्तिं॥ तस्माद्वयं
कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूताम्॥ ८२॥ सद्यः समुद्यतसहस्रदिवाकराभां विद्याक्षसूत्रव
रदाभयचिह्नहस्तां॥ नेत्रोत्पलैस्त्रिभिरलंकृतपद्मवक्त्रां त्वां तारहाररुचिरां त्रिपुरे भजामः॥ सिंदूरपुंजरुचिरं कुचभार
नम्रं जन्मांतरेषुकृतपुण्यफलैकगम्यं॥ अन्योन्यभेदकलहाकुलमानभेदैर्जानंति किं जडधियस्तवरूपमंब॥ ८३ ॥

मनुः ओंकारः॥ तार्तीयं तृतीयं ततश्च बाला त्रिपुरोद्धृता॥ स्पष्टमपरम्॥ श्री॥० श्री॥० श्री॥० ॥ श्री॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शा॰ति॰ स्थूलां वदंति मुनयः श्रुतयो गृणंति सूक्ष्मां वदंति वचसामधिवासमन्ये॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिं
टी॰गृ॰ ॥ चंद्रावतंसकलितां शरदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंति॥ त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां च हस्तकमलैर्दध
५४ तीं त्रिनेत्रां॥ ८४॥ शंभुस्त्वमद्रितनयाकलितार्द्धभागो विष्णुस्त्वमंब कमलापरिबद्धदेहः॥ पद्मोद्भवस्त्वमसि वागधिवासभूमिस्तेषां
क्रियाश्च जगति त्रिपुरे त्वमेव॥ आश्रित्य वाग्भवभवांश्चतुरः परादीन्भावान्पदेषु विहितान्समुदीरयंतीं॥ कंठादिभिश्च करणैः परदेवतां
त्वां संविन्मयीं हृदि कदापि न विस्मरामि ॥ ८५॥ आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रं॥ ध्यायंति
मूर्ध्नि कलितेंदुकलावतंसं त्वद्रूपमंब कृतिनस्तरुणार्कबिंबं॥ त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोषि जगतामिति वेदवादः॥
सत्यं तदद्रितनये जगदेकमातर्नो चेदशेषजगतः स्थितिरेव न स्यात् ८६ पूजां विधाय कुसुमैः सुरपादपानां पीठे तवांब कनकाचलग
ह्वरेषु॥ गायंति सिद्धवनिताः सह किन्नरीभिरास्वादितासवरसारुणनेत्रपद्माः॥ ८७॥ विद्युद्विलासवपुषः श्रियमावहंतीं यांतीं स्ववास
भवनाच्छिवराजधानीं॥ सौषुम्नमार्गकमलानि विकाशयंतीं देवीं भजे हृदि परामृतसिक्तगात्रीं॥ ८८॥ आनंदजन्मभवनं भवनं श्रुती
नां चैतन्यमात्रतनुमंब समाश्रयामि॥ ब्रह्मेशविष्णुभिरभिष्टुतपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत्॥ ८९॥ शब्दार्थभावि
भुवनं सृजंती द्रुरूपा यातद्बिभर्ति पुनरर्कतनुः स्वशक्त्या॥ ब्रह्मात्मिका हरति तत्सकलं युगांते तां शारदां मनसि जातु न विस्मरामि ९०
नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति॥ ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये विबुधा राम॰ ५४
वदंति ॥ ९१ ॥ ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात्॥ त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिम् ॥ ९२ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥मंत्रांतरमाह॥ वाङ्मायेत्यादिना॥ वाक् वाग्भवंबीजं॥ माया ह्ल्लेखा कमला श्रीबीजं॥ तारः प्रणवः॥ नमोंतः भगवति स्वरूपं श्रीमतंगेश्वरि इति वा॥ सर्वजनमनो
हरीत्यपि॥ अन्यदपि स्वरूपमेव॥ ब्रह्मा ककारः नेत्रं इकारः॥ अग्निः रेफः किमिति सिद्धं॥ शिवयुक्तः॥ एकारयुक्तः रविः मकारः॥ मेइति भवति॥ अन्यत्स्वरूपं॥
एषा मातंगिनी विद्या॥ अक्षरन्यासमाह॥ ललाटेत्यादिना॥ अनाहते॥ उदरमध्ये॥ जठरे ततोधस्तनभागे स्वाधिष्ठानभागे॥ नाभेरधोभाग मूलाधारे॥ मूला

वाङ्मायाकमलास्तारं नमोंते भगवत्यथ॥ श्रीमातंगेश्वरि वदेत्सर्वजनमनोहरि ९३ सर्वादिमुखराज्यंते सर्वादिमुखरंजिनि॥ सर्व
राजवशंपश्चात्कारिसर्वपदं वदेत्॥ ९४॥ स्त्रीपुरुषवशंब्रह्मा नेत्रमग्न्यासनं पुनः॥ सर्वदुष्टमृगवशंकारिसर्वभूगस्तव ९५ ॥ शं
करिस्यात्सर्वलोकममुकंशिवयुग्रविः॥ वशमानयजायाग्रेरष्टाशीत्यक्षरो मनुः ९६ न्यासान्मंत्रीतनौकुर्याद्धसमाणान्यथाक्रमं॥
शिरोललाटभ्रूमध्ये तालुकंठगलोरसि॥ ९७॥ अनाहते भुजद्वन्द्वे जठरे नाभिमंडले॥ स्वाधिष्ठानेगत्यदेशे पादयोर्दक्षिणान्ययोः
९८ मूलाधारेगदेन्यस्येत्पदान्यष्टादशक्रमात्॥ गुणैकद्विचतुःषड्भिर्वसुषट्पर्वताष्टभिः ९९ दशपंक्त्यष्टवेदाग्निचंद्रयुग्मयु
पाक्षिभिः॥ पदक्लृप्तिरियंप्रोक्ता मंत्रवर्णैर्यथाक्रमं १०० रत्याद्यामूलहृद्भूमध्येषु विन्यसेत्क्रमात्॥ वाक्शक्तिलक्ष्मीबीजाद्यामा
तङ्ग्यंत्याः प्रविन्यसेत् १०१ शिरोवदनहृद्गुह्यपादेषु विधिनान्यसेत्॥ ह्ल्लेखागगनारक्ता भूपो मंत्री करालिका १०२ महोल्का
विनामादिवर्णबीजपुरःसराः॥ मातङ्ग्युत्ताः षडंगानि ततः कुर्वीत साधकः १०३ वर्णैश्चतुर्विंशत्या स्याद्द्वात्रिंशता पोडशभिः शिरः॥ शि
खाष्टादशभिः प्रोक्ता वर्मता वह्निरक्षरैः १०४ स्यान्नेत्रं षोडशभिर्नेत्रं द्वाभ्यामस्त्रं समीरितं॥ विभक्तैर्मूलमंत्रार्णैर्वाणन्यासमथाच
रेत्॥ मूर्ध्न्यास्यांसगत्येषु हृदंभोजे प्रविन्यसेत्॥ द्राविणी शोषिणी भूयो बंधनी मोहनी पुनः १०६॥ धारलिंगगुदमध्ये॥ पदेसाक्षरविभागमा

हागुणेत्यादिना॥ गुणास्त्रिभिः॥ वसुभिः अष्टभिः॥ पर्वताः॥ अष्टौ॥ पंक्तिः दश॥ वेदाः चत्वारि॥ अग्निस्त्रीणि॥ चंद्रः एकः॥ पक्षः द्वौ॥ वाग्बीज शक्ति बीजाद्या मातंग्यंताः
॥ ततश्च॥ ऐं ओं ऐं रत्यै मातंग्यै नमः इत्यादिप्रकारेण॥ उक्तस्थानेषु न्यसेदित्यर्थः॥ उक्तस्थानेषु॥ ओं ह्रीं हृल्लेखायै मातंगिन्यै नमः॥ ओं गंगगनायै मातंगिन्यै नमः॥ इ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत उक्तरीत्या षडंगन्यासं कुर्यात्॥ ततः द्रां द्रावि ण्यै मातंगिन्यै नमः। ॐ यों शोषिण्यै मातंगिन्यै नमः इत्यादिप्रकारेणोक्तस्थानेषु पंचबाणान्न्यसेत्॥ तत उक्त।
स्थानेषु मन्मथादीनष्टौ न्यसेत्॥ कथं॥ ॐ ह्रीं श्री मन्मथमातंगिन्यै नमः इत्यादिप्रकारेणाष्टौ न्यस्तव्याः ततः वक्ष्यमाणस्थानेषु। ॐ लक्ष्म्यै मातंगिन्यै नमः।

आकर्षणीं स्वनामादिबीजाद्याः शुभलक्षणाः॥ मातङ्ग्यंत्यास्ततो न्यसेन्मन्मथान्वदनांसयोः १०७ पार्श्वकद्योर्नाभिदेशे कटि
पार्श्वांसके पुनः॥ बीजत्रयादिकान्मंत्री मन्मथं मकरध्वजं १०८ मदनं पुष्पधन्वानं पंचमं कुसुमायुधं षष्ठं कंदर्पनामानं मनोभ
वरतिप्रियौ १०९ मातङ्ग्यंतांस्ततो न्यसेत्स्थानेष्वेतेषु मंत्रवित्॥ प्रथमानंगकुसुमा भूयो न्यानंगमेखला ११० अनंगमदनातद्वदनं
गमदनातुरा। अनंगमदनवेगा भूयश्चानंगसंभवा १११ सप्तम्यनंगभुवनपालिनी स्यादथाष्टमी॥ अनंगशशिरेखान्या मातङ्ग्यंताः
समीरिताः ११२ विन्यस्तव्यास्तयोर्मूलेधिष्ठाने मणिपूरके। हत्कंठास्येभ्रुवोर्मध्ये मस्तके मंत्रिणा ततः ११३ आद्ये लक्ष्मीसरस्वत्यौ
रतिः प्रीतिश्च कीर्तिका॥ शांतिः पुष्टिः पुनस्तुष्टिर्मातंगीपदशेखराः ११४ मूलमंत्रं प्रविन्यस्येन्निजमूर्द्धनि मंत्रवित्। आधारदेशे
धिष्ठाने नाभौ पश्चादनाहते ११५ कंठवक्त्रे भ्रुवोर्मध्ये मस्तके विन्यसेत्क्रमात्। ब्राह्म्याद्याः पूर्वमुद्दिष्टा मातंगीपदपश्चिमाः ११६
एषु स्थानेषु विन्यस्येदसितांगादिभैरवान्॥ मातङ्ग्यंतान्न्यसेन्मंत्री मूलमंत्रं स्वमूर्द्धनि ११७ आधारदेशे धिष्ठाने नाभौ पश्चा
दनाहते॥ कंठदेशे भ्रुवोर्मध्ये विंदौ भूयः कलापदे। ११८ निसेधिकायामर्द्धेंदौ नादनादांतयोः पुनः। उन्मन्यां विषुवक्त्रे च ध्रुव
मंडलके शिवे ११९ मातङ्ग्यंताः प्रविन्यस्येद्वामाज्येष्ठामतः परम्॥ रौद्रीं प्रशांतिश्रद्धाख्या पुनर्माहेश्वरीमथ॥ १२० ॥

ॐ सरस्वत्यै मातंगिन्यै नमः। इत्यादिप्रकारेणाष्टौ न्यस्तव्याः तत उक्तस्थानेषु। ब्राह्मीमातरो न्यस्तव्याः मातंगीपदपश्चिमाः अनंतरं तेष्वेव स्थानेषु। मातंग्यंतान् भैर
वान् न्यसेत् ततो वक्ष्यमाणस्थानेषु। वामादिशक्तीर्न्यसेत् विंदौ ललाटांते। कलापदे वा तदुपरि मूर्द्धस्थाने निरोधिका। तस्मादुपरि तस्मादुपर्युपरि द्वादशांतपर्यंते

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

क्रियांशक्तिंसुलक्ष्मींचसृष्टिसंज्ञांचमोहिनीं॥प्रथमांभ्रासिनींविद्युल्लतांविच्छित्तिमप्ययं १२१ ततश्चसुंदरानंदांनंदबुद्धिमिमाः
क्रमात्।शिरोभालहृदाधारेषुतावीजत्रयादिकाः १२२॥मातङ्ग्यंताःप्रविन्यस्येद्यथावद्देशिकोत्तमः।मातंगींमहदाद्यांतांमहालक्ष्मीप
दादिकां।सिद्धलक्ष्मीपदाद्यांतांमूलमाधारमंडले॥न्यस्यतेनैवकुर्वीतव्यापकंदेशिकोत्तमः १२४ एवंन्यस्तशरीरोसौचिंतयेदात्मदेवतां
॥ध्यायेयंरत्नपीठेशुककलपठितंशृण्वतींश्यामलांगींन्यस्तैकांघ्रिंसरोजेशशिशकलधरांवल्लकींवादयंतीं।कह्लारावद्धमालांनियमि
तविलसच्चोलिकांरक्तवस्त्रांमातंगींशंखपात्रांमधुमदविवशांचित्रकोद्भासिभालां १२५॥अयुतंप्रजपेन्मंत्रीतद्दशांशंमधूकजैः।पुष्पै
स्त्रिमधुरोपेतैर्जुहुयान्मंत्रसिद्धये॥१२६॥त्रिकोणकर्णिकंपद्ममष्टपत्रंप्रकल्पयेत्।अष्टपत्रावृतंवाह्येवृत्तंषोडशभिर्दलैः १२७ चतु
रस्रसमायुक्तंकांत्याद्यष्टिमनोहरं।एतस्मिन्पूजयेत्पीठेनवशक्तीःक्रमादिमाः १२८ विभूतिरुन्नतिःकांतिःसृष्टिःकीर्तिश्चसन्नतिः।
व्युष्टिरुत्कृष्टिरृद्धिश्चमातंगीपदपश्चिमाः १२९ सर्वेतिशक्तिकमलासनायनमइत्यया॥वाक्शक्तिलक्ष्मीवीजाद्योमनुरासनसंज्ञ
कः १३० मूलेनमूर्तिसंकल्प्यतस्यामावाह्यदेवतां॥अर्चयेद्विधिनानेनवक्ष्यमाणेनमंत्रवित् १३१ रत्याद्यास्त्रिषुकोणेषुपूजयेत्पूर्व
वत्सुधीः।हृल्लेखाद्याःपंचपूज्यामध्येदिक्षुचमंत्रिणा १३२ पाशांकुशाभयाभीष्टधारिण्योभूतयःप्रभाः।अंगानिपूजयेत्पश्चाद्यथाविधि
विधानवित् १३३ वाणानभ्यर्चयेद्दिक्षुपंचमंडलतोयजेत्।दलमध्येषुसंपूज्याअनंगकुसुमादयः १३४॥पाशांकुशाभयाभीष्टधारिण्योरुणावि
ग्रहाः॥पत्राग्रेषुपुनःपूज्यालक्ष्म्याद्यावल्लकीकराः १३५॥वहिरष्टदलेपूज्यामन्मथाद्यामदोद्धताः॥अपरांगनिषंगाढ्याःपुष्पास्त्रेषुध
नुर्द्धराः १३६।पत्रस्थामातरःपूज्यावाह्म्याद्याःप्रोक्तलक्षणाः।तदग्रेचर्चयेद्विद्वानसितांगादिभैरवान्।१३७।पुनःषोडशपत्रेषु
॥

शा॰ति॰ पूज्याःषोडशशक्तयः॥वामाद्याःकलवीणाभिर्गायंत्यःश्यामविग्रहाः।१३८॥ चतुरस्रचतुर्दिक्षुचतस्रःपूजयेत्पुनः।मातंग्याद्याःमदो
टी॰पृ॰ न्मत्तावीणाललितपाणयः १३९ आग्नेयकोणेविघ्नेशंदुर्गांनैशाचरेयजेत्॥वायव्येवटुकंपश्चादैशान्येक्षेत्रपंयजेत् १४० लोकपा
५६ लाबहिःपूज्यावज्राद्यैरायुधैःसह॥मंत्रेस्मिन्साधितेमंत्रीसाधयेदिष्टमात्मनः १४१ मल्लिकाजातिपुन्नागैर्होमाद्वागालयोभवेत्।फ
लैर्बिल्वसमुद्भूतैस्तत्पत्रैर्वाहुताद्भवेत् १४२॥राजपुत्रस्यराज्याप्तिःपंकजैःश्रियमाप्नुयात्॥उत्पलैर्वशयेद्विश्वंलक्ष्मीपुष्पैस्तथानरः॥
१४३ बंधूकपुष्पैर्बकुलैर्जपोत्थैःकिंशुकोद्भवैः।वश्यायजुहुयान्मंत्रीमधुनासर्वसिद्धये १४४ लवणैर्मधुरोपेतैर्हुत्वाकर्षतिसुंदरीः॥
वंजुलस्यसमिद्धोमोवृष्टिंवितनुतेचिरात् १४५॥क्षीराक्तैरमृताखंडैर्होमोनाशयतिज्वरं॥दूर्वाभिरायुराप्नोतिकदंबैर्वश्यमाप्नुयात् १४६
अन्नवानन्नहोमेनतंडुलैर्धनवान्भवेत्।सर्वंत्रिमधुरोपेतंहोमद्रव्यमुदाहृतं॥१४७॥नंद्यावर्तभवैःपुष्पैर्होमोवाक्सिद्धिदायकः।निं
बप्रसूनैर्जुहुयादीप्सितांश्रियमश्नुते १४८ पलाशकुसुमैर्होमात्तेजस्वीजायतेनरः॥चंदनागरुकर्पूररोचनाकुंकुमादिभिः १४९ व
श्यायप्रजुहुयान्मंत्रीवशयेदखिलंजगत्॥एतानिजप्त्वातिलकंकुर्याल्लोकप्रियोभवेत् १५० निर्गुंडीमूलहोमेननिगडान्मुच्यतेनरः
निंबतैलान्वितैर्लोणैर्होमःशत्रुविनाशनः १५१ हरिद्राचूर्णसंमिश्रैर्लवणैःस्तंभयेत्परान्।रसवद्भिःफलैःपक्वैःपुष्पैरपिमलान्वितैः
१५२ हुत्वासंम्यग्गवाप्नोतिसाधकःसर्वमीप्सितं॥देवतांजगतामाद्यांमातंगीमिष्टदायिनीं।१५३॥अवाप्तुमिष्टांतांवाचंभूषयेद्दलमा राम॰
लया॥आराध्यमातश्चरणांबुजंतेब्रह्मादयोपिस्तुतिकीर्तिमापुः १५४ अन्येपरंवाविभवंमुनींद्राःपरांश्रियंभक्तिभरेणचान्ये।नमामि ५६
देवींनवचंद्रमौलिंमातंगिनींचंद्रकलावतंसां १५५॥आम्नायवाग्भिःप्रतिपादितार्थंप्रबोधयंतींशुकमादरेण॥विनम्रदेवासुरमौलिरत्नैर्नी

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ततोवक्ष्यमाणस्थानेषुमहामातंग्यान्यस्तव्याः।कथंॐ ऐंह्रींश्रीमातंगिन्यैनमः।।महालक्ष्म्यैमातंगिन्यैनमः।।सिद्धलक्ष्म्यैमहामातंगिन्यैनमइत्यादिप्रकारेणप्रत्ये
कंबीजत्रयादिकान्न्यसेत्।। ततोमूलमंत्रमाधारमंडपेन्यस्यतेनैवव्यापकंन्यसेत्।।ततोवक्ष्यमाणवर्त्मनाध्यायेत्।। वल्लकींवीणां।। चूडिकांशिखां।।शंखप
त्रं।। शंखमयकर्णाभरणं।। मधुमदविवशां।।आसवमदपरवशां।।चित्रकोज्ज्वलभालां।। चित्रकेणकृष्णपीतरेखाभिः शोभितललाटां।। एवंविधांदेवींध्या

भजंतियेदेविमहीपतीनांव्रजंतितेसंपदमादरेण।।मातंगलीलागमनेभवत्याःसिंजानमंजीरमिषाद्भजंते ।।१५६।। मातस्त्व
दीयंचरणारविंदमकृत्रिमाणांवचसांनिगुंफाः।।पदात्पदंसिंजितनूपुराभ्यांकृतार्थयंतींपदवींपदाभ्याम् ।। १५७ ।। आस्फा
लयंतींकलवल्लकींतांमातंगिनीमद्धृदयंधिनोतु।। नीलांशुकाबद्धनितंबविंबांतालीदलेनार्पितकर्णभूषा ।। १५८ ।। माध्वी
मदाघूर्णितनेत्रपद्मांघनस्तनींशंभुवधूंनमामि।।तडिल्लताकांतमनर्घ्यभूषंचिरेणलक्ष्यंनवलोमराज्या ।। १५९ ।। स्मरामि
भक्त्याजगतामधीशेवलित्रयांकंतवमध्यविंबं।।नीलोत्पलानांश्रियमावहंतीकांत्याकटाक्षैःकमलाकराणां ।। १६० ।। क
दंवमालांचितकेशपाशांमातंगकन्यांहृदिभावयामः।।ध्यायेयमारक्तकपोलकांतंविंबाधरन्यस्तललामरम्यं ।। १६१ ।।
आलोलनीलालकमायताक्षंमंदस्मितंतेवदनंमहेशि।।स्तुत्यानयाशंकरधर्मपत्नींमातंगिनींवागधिदेवतांताम्। १६२
स्तुवंतियेभक्तियुतामनुष्याःपरांश्रियंनित्यमुपाश्रयंति ।। १६३।। इतिश्रीशारदातिलकेद्वादशःपटलः ।। १२ ।। ।।

येत्।। पूजाप्रकारमाह०।।त्रिकोणेत्यादिना।। पीठमंत्रमुद्धरति।। सर्वांतेति।। पूर्वोक्तबीजत्रयादिकोयंमंत्रः स्पष्टः ।। देवतांजगतामित्यंतप्रातनः।। पूजाहो
मपरोग्रंथः स्पष्टः।।आराध्यमातरमित्यादिपरमेश्वरिस्तोत्रंनिगदव्याख्यातम् ।। इतिगूढार्थदीपिकायांद्वादशःपटलः ।। १२ ।। १२ ।।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ ति॰ ॥ त्रिपुरादिमंत्रकथनानंतरं गणेश्वरमंत्रान्वक्तुमारभते॥ फंतांतक इति॥ मंत्रमुद्धरति॥ फंतांतको गकारः॥ शशिधरः विंदुयुक्तः॥ गमिति सिद्धं॥ दानपूरं॥ वेदल

टी॰ गू॰ क्षं हृदयावधिः॥ नमस्कारावधिः॥ भक्तलक्षितपुष्करान्॥ लडुकयुक्तकुंडलान्॥ यथा पूर्वं पूजापटलोक्तप्रकारेण अनुलोमविलोमस्थावीजक्रमात्॥ क्रमलिखि

५७

अथवक्ष्ये गणपतेर्मंत्रान्सर्वार्थसाधकान्॥ यान्ज्ञात्वा साधका नित्यं साधयंति मनोरथान्॥ १॥ फंतांतकं शशिधरं वीजं गणपते
र्विदुः॥ गणकः स्यादृषिश्छंदो निचृद्विघ्नोस्य देवता॥ २॥ षड्दीर्घभाजा वीजेन कुर्यादंगक्रियां मनोः॥ ३॥ सिंदूराभं त्रिनेत्रं
पृथुतरजठरं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं॥ बालेंदुद्योतमौलिं करिपतिवदनं दानपू
रार्द्रगंडं भोगींद्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागं॥ ४॥ वेदलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः॥ मोदकैः पृथुकैर्लाजैः
सक्तुभिः सेक्षुपर्वभिः॥ ५॥ नारिकेलैस्तिलैः शुद्धैः सुपक्वैः कदलीफलैः॥ अथ द्रव्याणि विघ्नस्य कथितानि मनीषिभिः ६
तीव्रादिशक्तिभिर्युक्ते पीठे विघ्नेश्वरं यजेत्॥ तीव्रा चाज्वालिनी नंदा भोगदा कामरूपिणी उग्रा तेजोवती सत्या नवमी विघ्ननाशि
नी सर्वादिशक्तिकमलासनाय हृदयावधिः॥ ८॥ पीठमंत्रोयमेतेन प्रदद्यादासनं विभोः मूलेन मूर्त्तिं संकल्प्य तस्यां विघ्नेश्व
रं यजेत् ९ कर्णिकायां चतुर्दिक्षु प्रथमं पूजयेदिमान्॥ गणाधिपं गणेशानं तृतीयं गणनायकं॥ १०॥ गणक्रीडं पीतगौररक्तनी
लरुचः क्रमात्॥ सर्वान्नागेंद्रभूषाढ्यान्पद्मलसितपुष्करान्॥ ११॥ यथा पूर्वं ततोभ्यर्चेत्केसरेष्वंगदेवताः॥ पत्रमध्येषु वि
धिवद्वक्रतुंडादिकान्यजेत्॥ १२॥ वक्रतुंडमेकदंष्ट्रं महोदरगजाननौ॥ लंबोदराख्यं विकटं विघ्नराजमनंतरम्॥ १३ ॥ राम॰ ५७

तवीजे॥ कथं वेगं देवदत्तं गं॥ महागणपतिमंत्रमुद्धरति॥ श्रीशक्तिरिति॥ अपमर्थः॥ प्रथमं प्रणवं॥ श्रीशक्तिस्मरभूः गणपतिवीजान्युच्चार्य चतुर्थ्यंतं गणपति॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मुच्चार्य्यपश्चाद्वरदरसर्वजनंमेवशमानयस्वरूपंहृदयंस्वाहाकारः॥अष्टाविंशत्यक्षरोमहागणपतिमंत्रः॥षड्वीजस्यस्ववीजेति॥ॐश्रींह्रींक्लींग्लौंगंगांहृ

धूम्रवर्णैस्तलाग्रेषुब्राह्म्याद्याःपूजयेत्ततः॥लोकपालांस्तदस्त्राणिदेवमित्थंप्रपूजयेत्।१४॥सिद्धेमंत्रेप्रकुर्वीतप्रयोगान्कल्प
देशितान् तर्पयेत्सलिलैःशुद्धैर्दिनशोगणनायकं १५॥चतुश्चत्वारिंशदाढ्यंचतुःशतमतंद्रितः॥प्राप्नुयान्मंडलादर्वागभीष्ट
धिकंनरः १६नारिकेलैःकृतोहोमश्चतुर्थ्यांश्रीप्रदोभवेत्॥शुक्लपक्षप्रतिपदमारभ्यदिनशःसुधीः १७चतुर्थ्यंतंनारिकेलसक्तु
लाजतिलैःक्रमात्॥चतुःशतंप्रजुहुयाद्दृश्याःस्युःसर्वजन्तवः १८सतिलैस्तंडुलैर्होमात्स्वस्मीवश्यप्रदोभवेत्॥लाजैस्त्रिमधुरोपेतै
र्होमःकन्यांप्रयच्छति १९अनेनविधिनाकन्यावरमाप्नोतिवांछितं॥आज्यान्नहविषाहोमःसाधयेदीप्सितंधनं॥२०॥रम्भाविलोलि
तैर्लोणैर्होमोनिशिचतुर्दिनं॥संवादंकुरुतेतद्वद्दृश्यंवितनुतेसदा २१श्वेतार्कमूलेनरक्तचंदनदारुणा॥रम्भमप्येनविंबेनहस्ति
दंतेनवाकृते २२विघ्नेश्वरंसमभ्यर्च्यशीतांशुग्रहणेजयेत्॥स्पृष्ट्वामंत्रीनिराहारस्तंशिखायांसमुद्वहन्॥२३॥युद्धेषुव्यवहारेदैवि
जयश्रियमाप्नुयात्॥मंत्रेणानेनसंजप्तगोरोचनामदसंयुता २४ तिलकक्रियपासर्वान्वशंनयतिमानवान्॥अनुलोमविलोम
स्थवीजेनामसमालिखेत् २५ नवनीतैःसमभ्यर्च्यस्पृष्ट्वाप्राणामनुंजपेत्॥अष्टोत्तरशतंभूयोमूलमंत्रंप्रजप्यततः॥२६॥असयेन्मो
नमास्थायपामिन्यांसप्तवासरं सवश्योजायतेशीघ्रंसाधकस्यनसंशयः २७ श्रीशक्तिस्मरभूविघ्नवीजानिप्रथमंवदेत्॥ङेंतंगण
पतिंपश्चाद्वरांतेवरदंपदं २८ उक्त्वासर्वजनंमेंतेवशमानयठद्वयं॥अष्टाविंशत्यक्षरोयंताराद्योमनुरीरितः २९गणकःस्यादृषिश्छं
दोगायत्रीनिचृदन्विता॥ दयायनमः॥इत्यादिप्रकारेणांगन्यासंकुर्यात्॥अथवा॥ॐगांहृदयायनमः॥श्रींगींशिरसेस्वाहा॥ह्रींगूंशिखायैवषट्॥क्लींगैं

महागणपतिःप्रोक्तोदेवतादेववंदिता॥३०॥षड्वीजस्यस्ववीजेनदीर्घभाजाप्रकल्पयेत् षडंगानिमनोरस्ययथाविधिविधानवित् ३१ न
वरत्नमयंद्वीपंस्मरेदिक्षुसुधांबुधौ॥तद्वीचीधौतपर्यंकंमंदमारुतसेवितं॥३२॥मंदारपारिजातादिकल्पवृक्षलतावृतं॥तद्भूतरत्नछायाभिर
रुणीकृतभूतलं॥३३॥उद्यद्दिनकरेंदुभ्यामुद्भासितदिगंतरं॥तस्यमध्येपारिजातंनवरत्नमयंस्मरेत्॥ऋतुभिःसेवितंषड्भिरनिशंप्रीतिवर्द्ध
नैः तस्याधस्तान्महापीठेरचितेमातृकांबुजे॥३५॥षट्कोणांतस्त्रिकोणस्थमहागणपतिंस्मरेत्॥हस्तीन्द्राननमिंदुचूडमरुणच्छायंत्रिनेत्रं
रसादाश्लिष्टंप्रियपासपद्मकरयास्वांकस्थयासंततं॥बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान्ह
स्तैर्वहंतंभजेत्॥३७॥गंडपालीगलद्दानपूरलालसमानसान्॥द्विरेफान्कर्णतालाभ्यांवारयंतंमुहुर्मुहुः॥३८॥ करग्रधृतमाणिक्यकुंभ
वक्त्रविनिर्गतैः॥रत्नवर्षैःप्रीणयंतंसाधकान्मदविह्वलं॥३९॥माणिक्यमुकुटोपेतंरत्नाभरणभूषितं॥ध्यायेन्मंत्रंजपेन्मंत्रीचतुर्ल
क्षंसमाहितः॥४०॥चतुःसहस्रसंयुक्तंचत्वारिंशत्सहस्रकं॥दशांशंजुहुयाद्द्रव्यैरष्टभिर्मोदकादिभिः॥तर्प्पयेद्दिनशोविघ्नंप्रागुक्तेनै
ववर्त्मना॥प्रागुक्तेपूजयेत्पीठेविधिनागणनायकं॥४२॥त्रिकोणवास्त्येपूर्वादिचतुर्दिक्षुसमर्चयेत्॥अग्रस्थविल्ववृक्षाधः श्रियंश्री
पतिमर्चयेत्॥४३॥पद्मयुग्मधरापद्माचक्रशंखधरोहरिः॥दक्षिणेवटवृक्षाधोगौरींगौरीपतिंयजेत्॥४४॥पाशांकुशधरागौरीटंकशू
लधरोहरः॥पश्चिमेपिप्पलस्याधोरतिंरतिपतिंयजेत्॥४५॥रतिरुत्पलहस्ताढ्याकोदंडास्त्रधरःस्मरः॥सौम्येप्रियंगुवृक्षाधोमहींयोनि
णामर्चयेत्॥४७॥शुकव्रीह्यग्रहस्ताभूर्गदाचक्रधरःपतिः॥षट्सुकोणेषुसंपूज्याः आमोदाद्याःप्रियान्विताः॥४८ आमोदंसिद्धिस
हितंअग्रकोणेसमर्चयेत् ॥ समृद्ध्यायुतमभ्यर्चेत्प्रमोदंवह्निकोणतः॥४९॥ सुमुखंकांतिसंयुक्तमीशकोणेसमर्चयेत् ॥०॥
॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नेत्रत्रयाय॥ गं गः अस्त्राय॥ गंडपाली गंडस्थलं गलद्दानपूरस्रवन्मदप्रवाहः॥ भूवीजेति स्मृतिस्थमिति॥ स्मृतिर्गकारः॥ मांसः लकारः॥ औ स्वरूपं विंदुयुक्तः
॥ अनुस्वारयुतः॥ ततः ग्लौं इति सिद्धं॥ यंत्रमुद्धरति॥ वीजं षट्कोणमध्येति॥ अस्यार्थः॥ त्रिकोणं लिखित्वा॥ तन्मध्ये प्रणवं तन्मध्ये गं वहिः षट्कोणं त्रिकोण

दुर्मुखं मदनावत्या यजेद्वरुणकोणके॥५०॥ विघ्नं प्रमदयायुक्तं कोणे नैशाचरे यजेत्॥ वायव्ये विघ्नकर्तारं द्राविण्या सह संयजेत्।
५१ पाशांकुशाभयाभीष्टधारिण्योरुणविग्रहाः॥ गंडभित्तिगलद्दानपूरधौतमुखांवुजाः॥ विघ्नास्तत्रमदाः सर्वामदाघूर्णितलोचनाः
॥ एकहस्तधृतांभोजा इतरालिंगितप्रियाः॥५२॥ षट्कोणपार्श्वयोः पूज्यौ शंखपद्मनिधी क्रमात्॥ निजप्रियाभ्यां सहितौ पूर्वोदीरित
लक्षणौ ५४ केसरेषंगपूजा स्याद्ब्राह्म्याद्याः पत्रमध्यगाः॥ वहिर्लोकेश्वराः पूज्या वज्राद्यानि ततः परं॥५५॥ इत्थं जपादिभिः सिद्धः
प्रयोगान्स्वमनीषितान्॥ साधयेदष्टभिर्द्रव्यैरन्यैर्वा कल्पचोदितैः॥५६॥ पद्महोमेन भूपालांस्तत्पत्नीरुत्पलैः शुभैः॥ मंत्रिणः
कुमुदैः फुल्लैर्विप्रान्पिप्पलसंभवैः॥५७॥ समिद्भिरैर्नरपतीनुदुंवरसमुद्भवैः॥ प्लक्षैर्वैश्यान्वटोद्भूतैः शूद्रान्मंत्री वशं नयेत्॥
५८॥ मधुना स्वर्णलाभः स्याद्दुग्धेन लभते गाः॥ आज्यहोमेन महतीं श्रियमाप्नोति मानवः ५९ दध्ना सर्वसमृद्धिः स्यादन्नैरन्न
पतिर्भवेत्। वृष्टिकामः प्रजुहुयाद्वेतसानां समिद्वरैः॥६०॥ कुसुंभकुसुमैर्हुत्वा वासांसि लभते चिरात्॥ प्रत्येकमादौ मूलेन चतुर्वारम
र्तयेत् ६१ श्रीशक्तिरतिभूलक्ष्मीः स्ववीजाद्याः प्रियान्विताः आमोदादीन्स्ववीजाद्यान्शक्तियुक्तांस्तु तर्पयेत् ६२ चंतस्त्रतः पृथगमं
त्री शंखपद्मनिधी पुनः। नामादिवीजसहितौ तर्पयेत्स्वप्रियान्वितौ ६३ तर्पणेनामुना स्वीयमिष्टं प्राप्नोति मंडलात्। स्मृतिस्थं मांसमौ
विंदुयुक्तं भूवीजमीरितं ६४ वीजं षट्कोणमध्यस्थं स्फुरदनलपुरेताग्रं दिक्षु लक्ष्मीमायाकंदर्पभूमीस्तदनुरसपुटेष्वालिखेद्वीजषट्कं। तत्सं
धिष्वंगमंत्रान्वसुदलकमले मूलमंत्रस्य वर्णान्॥ ६५ द्वहि॥ दिक्षु यथाक्रमं श्रीं ह्रीं क्लीं ग्लौं इति लिखेत्॥ षट्कोणेषु प्रणवादिषड्वीजानि लिखेत्। कोणसं
धिष्वंगमंत्रान्। तदुपरि स्वस्वपत्राग्रे॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ ति॰ शा॰ टी॰ ५९ पद्मं कृत्वा तद्दलेषु गणाः त्रयस्त्रयः प्रत्येकमष्टाविंशद्वर्णा इति॥ अंत्यमंत्यदले लिखेत्॥ यंत्रप्रोक्तफलदं॥ मंत्रांतरमुद्धरति॥ मायेति॥ माया हृल्लेखा॥ विरिप
दद्वंद्वं स्वरूपं॥ खड्गीशो वकारः पावकः रकारः॥ वरवरदस्वरूपं॥ इतरत्स्पष्टम्॥ एषविरिगणपतिमंत्रः॥ षड्विंशत्यक्षरः॥ अंतःकरणं चत्वारि॥ वेदाः चत्वारः॥

शिष्टान्यत्रेषु विद्वान्विलिखतु गणशस्त्वंत्यमंत्ये पलाशे॥ ६५॥ आवीतं लिपिभिः क्रमोत्क्रमवशान्याशांकुशाभ्यामपि स्म्यागेहद्वि
तयेन वेष्टितमिदं यंत्रं गणाधीशितुः॥ लाक्षाकुंकुमरोचनामृगमदैर्भूर्येवरे हेम्नि वा संलिख्याभिवहन्न लभेत सकलैः संप्रार्थ
नीयां श्रियं॥ ६६॥ ॐ महागणपते र्विधानं सुरपूजितं॥ सर्वसिद्धिकरं पुंसां समस्तपुरुषार्थदं॥ ६७॥ मायाविरिपदद्वंद्वं ततो
गणपतिं वदेत्॥ खड्गीशपावकौ पश्चाद्वरदांते पुनर्वदेत्॥ ६८॥ सर्वलोकं मे पदांते वशमानय ठद्वयं॥ षड्विंशत्यक्षरो मंत्रो भज
तां कल्पपादपः ६९॥ गणकः स्यादृषिश्छंदो गायत्रं देवतामनोः॥ विरिविघ्नेश्वरः प्रोक्तो भजतां कल्पपादपः॥ ७०॥ अंतः
करणवेदेषु भूतपंचविलोचनैः॥ एवं विभक्तैर्मंत्रार्णैर्मायाद्यैरंगकल्पना ७१ महागणपतेः प्रोक्तोऽस्यानेमंत्री विचिंतयेत्॥ सिं
दूराभमिभाननं त्रिनयनं हस्तेषु पाशांकुशौ बिभ्राणं मधुमत्कपालमनिशं साध्वेंदुमौलिं भजे॥ पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया पद्मो
ल्लसद्धस्तया तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करम् ७२ चतुर्लक्षं जपेन्मंत्रं तद्दशांशं हुतक्रिया॥ प्राक्प्रोक्तैरष्टभिर्द्रव्यै
स्त्रिमध्वक्तैः समीरिता॥ ७४॥ पूर्वोक्ते पूजयेत्पीठे तीव्रादिनवशक्तिके॥ मूर्तिं मूलेन संकल्प्य तत्रावाह्यार्चयेद्विभुं॥ ७५॥ मिथुनावृति
राद्यास्याद्दामोदराद्यै र्दिगंबरैः॥ द्वितीयांगैस्तृतीया स्याच्चतुर्थी मातृभिः स्मृता ७६॥ पंचमी लोकपालैः स्यात्षष्ठी वज्रादिभिः स्मृ
ता॥ इति सिद्धमनुर्मंत्री प्रफुल्लैः सरसीरुहैः ७७ जुहुयाद्दशगाः सर्वे तंडुलैस्तिलमिश्रितैः॥ हुत्वाश्रियमवाप्नोति मोदकै राज्यलालि
तैः॥ ७८॥ हुत्वाश्रियमवाप्नोति पार्थिवोयुद्धभूमिषु॥ ९ ईषपंचभूतपंच॥ ईषपंच॥ विलोचनं द्वयं॥ मायासर्वत्रानुषज्यते॥ इभाननं राम॰ ५९
गजाननं भजेत् स्पष्टार्थमपरम्॥ मंत्रांतरमुद्धरति। शक्तिरुद्धामिति। शक्तिः ह्रींकारः। निजं बीजं गं। ततः ह्रीं गं ह्रीं इति भवति॥ ॥ ॥

महागणपतिंस्वरूपंडें·तंचतुर्थ्यंतं॥अग्निवधूःस्वाहाकारः॥इतिद्वादशाक्षरोमंत्रः॥अतिरोहितार्थमन्यत॥मंत्रांतरंसुद्दरति॥शक्त्यारुद्रमिति॥पूर्ववच्छक्ति
पुटितंगणपतिवीजं॥वशमानयस्वरूपं॥ठद्वयंस्वाहाकारः॥वरांगंयोनिं॥ध्वजाग्रं लिंगाग्रं॥मंत्रान्तरमाह॥संवर्तकइति॥संवर्तकः क्षकारः॥नेत्रयुतः॥

मधुरत्रयहोमेनवशंनयतिपार्थिवान॥७९॥भक्ष्यभोज्यादिकंसर्वंहुत्वाभीष्टानिसाधयेत॥शक्तिरुद्रंनिजंवीजंमहागणपतिंवदेत्
॥८०॥डेंतमग्निवधूःप्रोक्तोमंत्रोयंद्वादशाक्षरः॥गणकःस्यादृषिश्छंदोगायत्रीनिचृदादिका॥८१॥उदितादेवतातंत्रेनाम्नाशक्तिग
णाधिपः॥व्यस्तैःसमस्तैर्मंत्रस्यपदैरंगानिकल्पयेत् ८२ मुक्तागौरंमदगजमुखंचंद्रचूडंत्रिनेत्रंहस्तैःस्वीयैर्दधतमरविंदांकुशौरत्न
कुंभं॥८३॥अंकस्थायाःसरसिजरुचःस्वध्वजालंविपाणेर्व्यापोनोविनिहितकरंरत्नमौलिंभजामः॥८४॥लक्षमेकंजपेन्मंत्रमधू
कैस्तद्दशांशतः॥जुहुयादर्चितेवह्नौदिनशोदेवमर्चयेत॥८५॥प्राक्प्रोक्तेपूजयेत्पीठेप्राक्प्रोक्तेनैववर्त्मना॥इत्थंसुसंडैर्मतिमान्रा
ज्यश्रियमवाप्नुयात् ८६॥नारिकेरफलैस्तद्वद्रंभापक्वफलैस्ततः॥वशयत्यखिलंलोकंपृथुकैःशर्करान्वितैः॥८७॥वशंनयति
राजानंसक्तुभिर्ब्राह्मणान्शुभैः॥घृतहोमेनधनवान्जायतेनात्रसंशयः॥८८॥शक्त्यारुद्रंनिजंवीजंवशमानयठद्वयं॥ताराद्योयं
समाख्यातोरुद्रसंख्याक्षरोमनुः॥८९॥ऋष्याद्याःपूर्वमुक्ताःस्युरंगंमंत्रपदैर्भवेत्॥एकेनाक्षैस्त्रिभिर्द्वाभ्यांत्रिभिर्द्वाभ्यामनंतरमा
९०॥समस्तेनास्त्रमाख्यातमंगक्लृप्तिरियंमता॥हस्तैर्विभ्रतमिक्षुदंडवरदौपाशांकुशौपुष्करस्थंपुष्पप्रमदावरांगमनयाश्लिष्टंध्व
जाग्रस्पृशा॥श्यामांग्याविधृताब्जयात्रिनयनंचंद्रार्द्धचूडंजपारक्तंहस्तिमुखंस्मरामिसततंभोगातिलोलंविभुं ९१ लक्षत्रयंजपेन्मं
त्रमिक्षुखंडैर्दशांशतः॥अर्पयेद्राज्ययुक्तैर्वाजुहुयान्मंत्रसिद्धये ९२ स्वगृहंधनधान्याद्यैःप्रीणयेत्प्रीतिमानसः॥पूजापूर्ववदुद्दिष्टाततः
इकारयुतः॥पार्श्वःपकारः॥वह्न्यासनः॥रेफयुतः॥ततःक्षिप्रइतिभवति॥प्रसादनायस्वरूपं॥ हृन्नमः गणपवीजाद्यः ग्लौंवर्मसमन्वितं॥ कपाल

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हुत्वापूपैस्त्रिमध्वक्तैर्वशयेद्भुविपार्थिवान् ॥ चतुर्थ्यांनारिकेलेनमहतींश्रियमश्नुते ॥ ९४ ॥ लवणैर्मधुसंयुक्तैर्वशयेद्वनिताजनं
संवर्तोनेत्रसंयुक्तःपार्श्वोवन्ह्यासनःस्थितः ॥ ९५ ॥ प्रसादनायहृन्मंत्रःस्ववीजाद्योदशाक्षरः ॥ गणकोमुनिरस्यस्याद्विराट्छंदउदा
हृतं ॥ ९६ ॥ क्षिप्रप्रसादनोविघ्नोदेवतासमुदाहृता ॥ दीर्घयुक्तेनवीजेनषडंगानिप्रकल्पयेत् ॥ ९७ ॥ पाशांकुशौकल्पलतांविषाणंदध
त्स्वशुंडाहितवीजपूरः ॥ रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्ज्वलोहस्तिमुखोवताद्वः ॥ ९८ ॥ लक्षंजपेज्जपस्यांतेजुहुयादयुतंतिलैः ॥
मधुरत्रितयेर्द्रव्यैरथवापृथगीरितैः ॥ ९९ ॥ एकाक्षरोदितेपीठेवक्ष्यमाणेनवर्त्मना ॥ पूजयेद्गंधपुष्पाद्यैर्धूपदीपैर्गजाननं ॥ १०० ॥
अंगानिपूर्वमाराध्यविघ्नानष्टौयजेत्ततः ॥ विघ्नंविनायकंशूरंवीरंवरदसंज्ञकं ॥ १०१ ॥ इभवक्त्रंचैकरदंलंबोदरमनंतरं ॥ पत्राग्रेष्वर्च
येत्पश्चाद्ब्राह्म्याद्यास्तदनंतरं ॥ १०२ ॥ लोकपालांस्तदस्त्राणि विघ्नपूजासमीरिता ॥ आज्यान्नैर्जुहुयान्नित्यमन्नवान्वत्सराद्भवे
त् ॥ १०३ ॥ पायसान्नेनमहतींश्रियमाप्नोतिमानवः ॥ आज्यहोमेनवशयेत्प्राणिनःसकलान्सुधीः ॥ १०४ ॥ नारिकेलफलं
पक्वंलोष्टचर्मसमन्वितं ॥ जुहुयात्प्रत्यहंमंत्रीमंडलात्सिद्धिमाप्नुयात् ॥ १०५ ॥ जुहुयादष्टभिर्द्रव्यैर्मधुरत्रयसंयुतैः ॥ वशये
त्पार्थिवान्सर्वांस्तत्पत्नीर्विधिनामुना ॥ १०६ ॥ दिनादिषुचतुश्चत्वारिंशद्वारंशुभोदकैः ॥ तर्पयेद्विघ्नराजस्यमस्तकेश्रीप्रसि
द्धये ॥ १०७ ॥ पाशांकुशौकल्पलतांस्वदंतंकरैर्वहंतंकनकाद्रिकांतं ॥ सोपानपंक्त्यादिननाथविंवादायांतमंभोजगतंविचिं
त्य ॥ १०८ ॥ प्रागुक्तमंत्रसंप्रोक्तान्प्रयोगान्मनुनामुना ॥ तैरस्मिन्नथवाप्रोक्तान्कुर्यान्मंत्रीविधानवित् ॥ १०९ ॥ ॥

॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

उपरितनमाच्छादनसहितं॥ दिनादिषु प्रातरेव॥ मंत्रांतरमाह॥ पंचांतक इति॥ गकारो विंदुयुक्तः॥ वामकर्णऊकारः गूं॥ तारादिः प्रणवादिः नमोंतः वरदं वरं टंकं कु
ठारः॥ शिरोभिः ग्रथितं॥ मालं॥ त्रिशिखं त्रिशूलं॥ आसनमंत्रमुद्धरति॥ प्रणव इति॥ कवच हूं हूं॥ हुंकार हूं हूं महासिंहाय स्वरूपं गं स्वरूपं हेरंबस्वरूपम् हृदन्वितः॥

पंचांतको विंदुयुतो वामकर्णविभूषितः॥ तारादिर्हृदयांतो यं हेरंबमनुरीरितः॥ ११०॥ चतुर्वर्णात्मको न्हृणां चतुर्वर्गफलप्रदः॥
षड्दीर्घभाजा वीजेन षडंगानि प्रकल्पयेत् १११ मुक्ताकांचननीलकुंदघुसृणाच्छायैस्त्रिनेत्रान्वितै र्नागास्यै र्हरिवाहनं शशि
धरं हेरंबमर्कप्रभं॥ दृप्तं दानमभीतिमोदकरदान् टंकं शिरोक्षात्मिकां॥ मालां मुद्गरमंकुशं त्रिशिखकं दोर्भिर्दधानं भजे ११२ ल
क्षत्रयं जपेन्मंत्रं दशांशं जुहुयात्तिलैः॥ तीव्रादिपूजिते पीठे देवं हेरंबमर्चयेत्॥ ११३॥ प्रणवः कवचं हूं हूं महासिंहाय गां ततः॥ हेर
वेति पदं पश्चादासनाय हृदं ततः॥ ११४॥ अयमासनमंत्रः स्यात्प्रदद्यादमुनासनं॥ तारादिविघ्नवीजेन मूर्तिं तस्य प्रकल्पयेत॥ ११५
आवाह्य पूजयेत्तस्यामंगावरणसंयुतम् वात्येलोकेश्वराः पूज्या वज्रादीनि ततः परं॥ ११६॥ एवमभ्यर्चयेन्नित्यं साधयेत्स्वमनी
षितान्॥ मोदकैर्जुहुयात्स्वष्टयामपृम्यां कृशरैस्तथा ११७ चतुर्दशीदिने पूपैर्जुहुयाद्वांछितातये॥ एभिर्द्रव्यैः प्रजुहुयान्मंत्री पर्व
दिनेषु च ११९ साधयेत्सकलान्कामान्पतनेनैव साधकः॥ अंभोजं प्रथमं लिखेदष्टदलं मध्ये स्ववीजांतरे साध्याख्यां वहिरंगमं
त्रविलसत्किंजल्कसंशोभितं॥ पत्राणामुदरे विभज्य मुनिशो मालामनुं शोषितान्॥ षड्वर्णोश्च रमेदलेपरिवृतं शत्या शकारेण तु॥
१२० रोचनामदकाश्मीरैर्भूर्जपत्रे विलिख्य तत्॥ वेष्टितं श्वेतसूत्रेण लोहै स्त्रिभिः परिक्रमात्॥ १२१॥ नमोन्वितः॥ एवमासनमंत्रः॥ मंत्रमुद्

रति॥ अंभोजमित्यादिना॥ प्रथमं वसुदलपद्मं कृत्वा॥ तत्कर्णिकायां महागणपतिवीजमध्ये नाम विलिख्य केसरस्थाने विदिक्कोणे हृदादिदिक्षु नेत्रमित्ये
वं प्रकारेण अंगमंत्राणि विलिख्य॥ पूर्वाद्यष्टपत्रमध्ये यथाक्रमं मालामंत्रं वक्ष्यमाणं मुनीन् सप्तसप्त विभज्य लिखेत्॥ ॥ ॥

॥ ॥शिष्टवर्णैषट्कमपि भूर्जपत्रे लिखेत्॥ पश्चादुद्दिः॥ शतया भुवनेश्वरी वीजेन सकारेणाच्च वेष्टयेत्॥ सुवर्णरजतताम्रैश्च वेष्टयेत्॥ एतद्यंत्रे उक्तफलदं माला
मंत्रमुद्धरति॥ शतं कुशा इत्यादिना॥ शक्तिर्भुवनेश्वरी॥ अंकुशं॥ प्रणवांते॥ गणपतिवीजं॥ हृदयं नमः॥ सर्वविघ्नाधिपतये सर्वार्थसिद्धिदाय सर्वदुःखप्र

धारयेद्वाहुना यंत्रं सर्वकामानवाप्नुयात्। शक्त्यंकुशध्रुवांते स्यात्स्ववीजं हृदयं ततः॥१२२॥ सर्वविघ्नाधिपायांते ङेंतं सर्वार्थसिद्धिदं
प्रवदेत्सर्वदुःखप्रशमनाय परं ततः १२३ एत्येहि भगवन्सर्वान्साध्य स्तंभय द्वयं॥ भुवनेशी स्ववीजं गां नतिः पावकवल्लभा १२४।
पुनरंकुशमायांतः पंचपंचाशदक्षरः॥ मालामंत्रोऽयमनुना प्रयोगान्साधयेत्सुधीः १२५॥ तारं खड्गीश्वरः कूर्मो निःस्वरेणांतरं इतिः
भुवेनतिः सप्तवर्णः सुब्रह्मण्यात्मको मनुः १२६ वह्निवीजेन षड्दीर्घयुक्तेनांगक्रिया मता॥ सिंदूरारुणकांतिमिंदुवदनं केयूरहा
रादिभि र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदं॥ अंभोजाभयशक्तिकुक्कुटधरं रक्तांगरागांशुकं सुब्रह्मण्यमुपास्महे प्र
णमतां भीतिप्रणाशोद्यतं १२८ लक्षमेकं जपेन्मंत्रं साज्येन हविषा ततः। दशांशं जुहुयादंते ब्राह्मणानपि भोजयेत्॥१२९ धर्मा
दिकल्पिते पीठे वह्निमंडलपश्चिमे। पूजयेद्विधिना देवमुपचारैर्यथोदितैः॥१३०॥ केसरेष्वंगपूजा स्यात्पत्रमध्यगतानिमान्। ज
यं तारव्यमग्निवेश्यं कृत्तिकापुत्र संज्ञकं १३१ अनंतरं भूतपतिसेनान्यं गुहसंज्ञकं॥ हेमशूलं विशालाख्यं शक्तिशूलकरान्यजेत्।
१३२ दिग्दलाग्रेषु पूर्वादिदेवसेनापतिं पुनः॥ विद्यामेधीततो वज्रं कोणस्थौ शक्तिकुक्कुटौ १३३ मयूरं द्वयमभ्यर्च्य वात्वे लोके
श्वरान्पुनः। अस्त्राणि तेषामंते स्युः सुब्रह्मण्यार्चने रिता १३४ स्वादुभिर्भक्ष्यभोज्याद्यैः षट्कृत्वा संप्रीणयेद्द्विजान्॥ पूजयेद्देवताबुध्या
कुमारान्ब्रह्मचारिणः १३५ संतानविजयं वीर्यं रक्षामायुः श्रियं यशः॥ प्रदद्यात्साधकस्याशु सुब्रह्मण्यः सुरार्चितः १३६॥ ((शमायएत्येहि

भगवन्सर्वान्(वोदयस्तंभय२भुवनेश्वरी स्ववीजं गां नमः स्वाहा॥ पुनरंकुशमायावीजे॥ पंचपंचाशदक्षरं मंत्रांतरमाह॥ तारमिति॥ तारं प्रणवः॥ खड्गीश्वरः वकारः कूर्मः

विकारः सादरसौ केवलकं संज्ञं मनः णांतः तकारः॥
वेनतिः सेवसंपातक सिद्ध॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जपतर्पणपूजादौ विघ्नेशं सर्वसिद्धिदं ॥ प्रीणायेदनया स्तुत्या प्राप्नुयेसर्वसंपदं १३७ ॐकारमाद्यं प्रवदंति संतो वाचः श्रुतीनामपियं
गृणंति ॥ गजाननं देवगणानतांघ्रिं भजेहमर्द्धेंदुकृतावतंसं ॥ पादारविंदार्चनतत्पराणां संसारदावानलभंगदक्षं ॥ निरंतरं निर्गतदा
नतोयैस्तं नौमि विघ्नेश्वरमंबुदाभं १३८ कृतांगरागं नवकुंकुमेन मत्तालिमालां मदपंकमग्नां ॥ निवारयंतं निजकर्णतालैः को विस्मरेत्पु
त्रमनंगशत्रोः १३९ शंभोर्जटाजूटनिवासिगंगाजलं समादाय कराम्बुजेन ॥ लीलाभिराराच्छिवमर्चयंतं गजाननं भक्तियुतो भजामि ॥
१४० कुमारमुक्तौ पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः ॥ प्रक्षालयंतं करसीकरेण मौग्ध्यातुरं नागमुखं भजामि १४१ त्वया समुद्धृत्य ग
जास्यहस्तं ये सीकराः पुष्कररंध्रमुक्ताः ॥ व्योमांगणे ते विचरंति ताराः कालात्मना मौक्तिकतुल्यभासः १४२ क्रीडारते वारिनिधौ गजास्ये
वेलामतिक्रामति वारिपूरे ॥ कल्पावसानं परिचिंत्य देवाः कैलासनाथं श्रुतिभिः स्तुवंति ॥ १४३ ॥ नागाननेनागकृतोत्तरीये क्रीडा
रते देवकुमारसंघैः ॥ त्वयि क्षणं कालगतिं विचिंत्य तोप्राप्तः कंदुकतामिनेंदू ॥ १४४ ॥ मदोल्लसत्पंचमुखैरजस्रमध्यापयंतं सक
लागमार्थान् ॥ देवानृषीन्भक्तजनैकमित्रं हेरंबमर्कारुणमाश्रयामि ॥ १४५ ॥ पादांबुजाभ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धा
रित्रीं ॥ अकारणं कारणमाप्तवाचां तं नागवक्त्रं न जहाति चेतः ॥ १४६ ॥ येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या ॥
तं चंद्रमौलेस्तनयं तपोभिराप्यं समानंदघनं भजामि ॥ १४७ ॥ पदं श्रुतीनामपदं स्तुतीनां लीलावतारं परमात्ममूर्तेः ॥ नागात्मको वा पुरुषा
त्मको वेत्यभेद्यमाद्यं भज विघ्नराजं ॥ १४८ ॥ पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं कररंध्रमुक्तैः ॥ मुक्ताफलाभैः पृथुशीकरौ
घैः सिंचंतमंगं शिवयोर्भजामि ॥ १४९ ॥

॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥ॐ वचं तभुवे नमः॥सप्तार्णो मंत्रः॥शेषं निगदव्याख्यातम्॥इति गूढार्थदीपिकायां त्रयोदशः पटलः॥१३॥गणपतिमंत्रकथनानंतरं चंद्रमसं वक्तुमारभते॥
अथेतिमंत्रमुद्धरति॥खड्गी शो वकारः॥भृगुः सकारः॥विंदुस्वस्वारःमनुः औकारः॥ततः स्यौमितिभवति॥अन्ये त्वन्यथोद्धरंति॥सौमित्ययमेव।सांप्रदायिकाः

अनेकभेदं गजमेकदंतं चैतन्यरूपं जगदादिवीजं॥ब्रह्मेतियं ब्रह्मविदो वदंति तं शंभुसूनुं शरणं भजामि॥ १५०॥स्वांकस्थितायाः
निजवल्लभाया मुखांबुजालोकनलोलनेत्रं॥स्मेराननाब्जं मदवैभवेन रुद्धं भजे विश्वविमोहनं तं॥१५१॥ये पूर्वमाराध्य गजाननं त्वां
सर्वाणि शास्त्राणि पठंति तेषां॥त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदस्ति चेत्सर्वमसत्यकल्पं॥ १५२॥ हिरण्यगर्भं जगदीशितारं कविं पु
राणं रविमंडलस्थं॥गजाननं यं प्रविशंति संतस्तत्कालयोगैस्तमहं प्रपद्ये॥१५३॥वेदांतगीतं पुरुषं भजेहं आत्मानमानंदघनं हृ
दिस्थं॥गजाननं यन्महसा जनानां विघ्नांधकारो विलयं प्रयाति॥१५४॥शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण॥
स्वभग्नदंतं प्रविचिंत्य मौग्ध्यादाकृष्टुकामः श्रियमातनोतु॥१५५॥ विघ्नार्गलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाद्यैः
॥प्रतारयंतो मदवारणास्यं प्रभुं नरोभीष्टमहं भजामि॥१५६॥यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं गजराजवक्त्रं॥स्तुत्यानयाये
विधिना स्तुवंति ते सर्वलक्ष्मीनिलया भवंति॥१५७॥इति शारदातिलके त्रयोदशः पटलः॥ १३॥ अथोच्यते चंद्रमसो मनुः सर्वस
मृद्धिदः॥खड्गी शस्यो भृगुर्विंदुमनुस्वारसमन्वितः॥१॥सोमाय हृदयांतोयं मंत्रः प्रोक्तः षडक्षरः॥ऋषिरस्य भृगुश्छंदः पंक्तिः सो
मोस्य देवता॥२॥दीर्घभाजा स्ववीजेन मनोरंगक्रिया मता॥कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुविंबाननं मुक्तादाम विभूषिते
नवपुषा निर्मूलयंतं तमः॥हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं स्वस्यांकस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे ४
सौं सोमाय स्वरूपं हृदयांतो नमोंतः॥एवं षडक्षरः सोममंत्रः॥रसलक्षं वट्लक्षं॥पौर्णमास्यामित्यर्थः॥प्राक्तनो ग्रंथः स्पष्टार्थः ॥ ० ॥

रसलक्षं जपेन्मंत्रं साधको विजितेंद्रियः ॥ तत्सहस्रं प्रजुहुयात्पायसेन ससर्पिषा ॥ ५ ॥ सोमं तं पूजिते पीठे पूजयेद्रोहिणीपतिं ॥ अंगानि
केसरेषु स्युस्तद्देव्यः पत्रमध्यगाः ॥ ६ ॥ रोहिणी कृत्तिका भूयो रेवती भरणी पुनः ॥ रात्रिरार्द्रा ततो ज्योत्स्ना कला हारसमप्रभाः ॥ ७ ॥ सितमा
ल्यांबरधरा मुक्ताहारविभूषणा ॥ पयोधराभराक्रांता रचितांजलयः शुभाः ॥ ८ ॥ वल्लभासक्तमनसो मदविभ्रममंथराः ॥ समभ्यर्च्याः सरोजा
स्यश्चंद्रबिंबनिभाननाः ॥ ९ ॥ आदित्यमंगलबुधमंदवाक्पतिराहवः ॥ शुक्रकेतुयुताः पूज्या दलाग्रेषु ग्रहा अमी ॥ १० ॥ स्वस्ववर्णा वरोपे
ताः स्वनामाद्यर्णबीजकाः ॥ रक्तारुणश्वेतनीलपीतधूम्रसितासिताः ॥ ११ ॥ वामोरुन्यस्तहस्ताः दक्षिणेन धृताभयाः ॥ अंबुजाढ्यक
रो भानुर्दंष्ट्राभीममुखः शनिः ॥ १२ ॥ राहुर्विकृतवक्त्रः स्यात्केतुः स्याद्रचितांजलिः ॥ लोकपालास्ततः पूज्या वज्राद्यस्त्रैः सहक्रमात् ॥ १३ ॥
एवं सिद्धमनुर्मंत्री संपदां वसतिर्भवेत् ॥ हृत्पुंडरीकमध्यस्थं तारहारविभूषणं ॥ १४ ॥ तारापतिं स्मरन्मंत्री त्रिसहस्रं मनुं जपेत् । राज्यैश्व
र्यं दरिद्रोपि प्राप्नुयाद्वत्सरांतरे ॥ १५ ॥ पूर्वोक्तसंख्यं प्रजपेच्छशिनं मूर्ध्नि चिंतयेत् ॥ रोगापमृत्युदुःखानि जित्वा वर्षशतं वसेत् ॥ १६ ॥
ब्रह्मचर्यरतः शुद्धश्चतुर्लक्षमिदं जपन् ॥ निधानं भूगतं सद्यः प्राप्नुयाद्यत्नवर्जितं ॥ १७ ॥ जितेंद्रियो जपेन्मंत्रं पूर्णिमास्यां विशेषतः ॥
भवेत्सौभाग्यनिलयः संपदामपरो निधिः ॥ १८ ॥ घोराञ्ज्वरान् शिरोरोगानभिचाराद्युपद्रवान् ॥ विद्विषामपि संघातं नाशयेन्मनुनामुना ॥
॥ १९ ॥ पौर्णमास्यां निराहारो दद्यादर्घ्यं विधूदये ॥ प्राक्प्रत्यगायतं कुर्याद्भूतले मंडलत्रयं ॥ २० ॥ निषण्णः पश्चिमे मंत्री मंडले विहिता
सने ॥ मध्यस्थे स्थापयेत्पश्चात्पूजाद्रव्याण्यशेषतः ॥ २१ ॥ अन्यस्मिन्मंडले सोममर्चयित्वांबुजान्विते ॥ राजतं चषकं भद्रं स्थापयेत्सु
रतः सुधीः ॥ २२ ॥ गोदुग्धेन समापूर्य स्पृष्ट्वा तं प्रजपेन्मनुं ॥ अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः ॥ २३ ॥ श्री ॥ ०
॥ ॥

रा॰ ति॰ टी॰ मू॰ ६३

॥ अर्घदानप्रकारमेवाह॥ प्रागिति॥ चषकं अर्घपात्रं॥ विद्यामंत्रमेवोद्धरति॥ विद्ये विद्यामालिनि चंद्रिणि चंद्रमुखि स्वाहा॥ मंत्रः अष्टोत्तरः॥ सूर्यमंत्रमुद्धरति॥
तारः प्रणवः घृणिः स्वरूपं॥ भृगुः सकारः॥ स एव वामकर्णविभूषितः॥ उकारयुक्तः॥ वह्न्यासनो मरुत्॥ रेफसहितो यकारः॥ ततः यइति सिद्धं॥ शेषः अनंतः॥ नेत्रई
कारयुक्तो त्रिरेकारः॥ ततो दिइति भवति॥ त्यपश्चिमः त्यकारावसानिकः॥ षडंगमंत्रानुद्धरति॥ सत्यायेत्यादिना॥ ततश्च सत्याय तेजोज्वालामणे हुं फट् स्वाहा॥

दद्यादर्घं शशांकाय सर्वकामार्थसिद्धये॥ अनेन विधिना कुर्वन्प्रतिमासमतंद्रितः॥२४॥ षण्मासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते
॥ श्रियमत्यूर्जितान्पुत्रान्सौभाग्यं विपुलं यशः॥२५॥ कन्यामिष्टामवाप्नोति कन्यापि वरमीप्सितं॥ बहुना किमिहोक्तेन सर्वं दद्यान्नि
शापतिः॥२६॥ विद्ये विद्यामालिनि स्याच्चंद्रिण्यंते ततो भवेत्॥ पुनश्चंद्रमुखि स्वाहा विद्यामंत्र उदाहृतः॥२७॥ तारो घृणिर्भृगुः पश्चा
द्वामकर्णविभूषितः। वह्न्यासनो मरुच्छेषस्ततो नेत्रो त्रिरत्यपश्चिमः॥२८॥ अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतप्रदः॥ देवभागो मुनिः
प्रोक्तो गायत्री छंद ईरितं॥२९॥ आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः॥ सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितं॥३०॥ विष्णवे स्याच्छि
खा वर्म रुद्राय परिकीर्तितं॥ अग्नये नेत्रमाख्यातं शर्वायास्त्रमुदाहृतं॥३१॥ तेजोज्वालामणे हुं फट् द्विठांताः पृथगीरिताः॥ अंगमंत्राः
पुनर्न्यस्येत्पंच मूर्तीर्यथाक्रमं॥ आदित्यं विन्यसेन्मूर्ध्नि रविं मुखगतं न्यसेत्॥ हृदये भानुनामानं भास्करं गुह्यदेशतः ३३ सूर्यं चरणयोर्न्य
स्येद्ध्रस्वैः सद्यादिपंचभिः॥ प्रधानमूर्तिप्रतिमाः सर्वाभरणभूषिताः ३४ मूर्द्धास्यकंठहृदयकुक्षिनाभिध्वजांघ्रिषु॥ मंत्रवर्णान्न्यसेदष्टौ प्र
त्येकं प्रणवादिकान् ३५ एवं न्यस्तशरीरोसौ चिंतयेत्तेजसां निधिम्॥ रक्तांबुजयुग्माभयदानहस्तं केयूरहारांगदकुंडलाढ्यम्॥ माणि
क्यमौलिं दिननाथमीडे बंधूककांतिं विलसत्त्रिनेत्रं॥३७॥ ११ हृदयाय नमः ब्रह्मणे तेजोज्वालामणे हुं फट् स्वाहा शिरसे इत्यादिप्रकारेण षडंगन्यासः
॥ अंगमंत्रा ईरिताः इत्यधस्तनेन संबंधः॥ ह्रस्वैः सद्यादिपंचभिः॥ अ इ उ ऋ ऌ एभिरित्यर्थः पूजावसरेष्वेवमादि पूजा प्रागेव॥ उक्तस्थानेषु प्रभूतादि संपूज्य अधर्मा

हिरण्यलिपिचं॥ भारणानिः प्रकृष्टपेते॥

राम॰ ६३

वसुलक्षंजपेन्मंत्रंसमिद्भिःक्षीरशाखिनां॥ तत्सहस्रंप्रजुहुयात्सीराक्ताभिर्जितेंद्रियः॥३८॥ पीठस्यक्लृप्तेःप्रथमंदिक्षुमध्येचसंयजेत्
प्रभूतंविमलंसारंसमाराध्यमनंतरं॥३९॥ परमादिसुखंपीठंस्वबिंबांतंप्रकल्पयेत्॥ दीप्तासूक्ष्माजयाभद्राविभूतिर्विमलापुनः॥४०॥ अमो
घाविद्युतासर्वतोमुखीपीठशक्तयः॥ दीप्तदीपशिखाकाराबीजान्यासांविदुःक्रमात्॥४१॥ अक्षौघह्रस्वत्रितयस्वरान्बिंदुविसंयुतान्॥ वदेत्पदं
चतुर्थ्यंतंब्रह्मविष्णुशिवात्मकं॥४२॥ सौराययोगपीठायनमःपदमनंतरं॥ पीठमंत्रोयमाख्यातोदिनेशस्यजगत्पतेः॥४३॥ तारादिखखगो
ल्कायनमसामूर्तिकल्पना॥ साक्षिणांसर्वलोकानांतस्यामावात्यपूजयेत्॥४४॥ अंगानिपूजयेदादौदिक्पत्रेष्वर्कमूर्तयः॥ आदित्याद्याश्च
तस्रोर्च्याःशक्तयःकोणपत्रगाः॥४५॥ स्वस्वनामादिवर्णाःस्युस्तासांबीजान्यनुक्रमात्॥ उषाप्रज्ञाप्रभासंध्याशक्तयःपरिकीर्तिताः॥४६॥
पत्राग्रसंस्थाब्राह्म्याद्याःउरतोरुणामर्चयेत्॥ चंद्रादीन्पूजयेत्पश्चाद्ग्रहानष्टौततोबहिः॥४७॥ इंद्रादयस्तदस्त्राणियथापूर्वंसमर्चयेत्। ए
वंसंपूज्यविधिवद्भास्करंभक्तवत्सलं॥४८॥ दद्यादर्घंप्रतिदिनंवारेवातस्यचोदिते॥ प्रभातेमंडलंकृत्वापूर्ववत्पीठमर्चयेत्॥४९॥ पात्रंताम्र
मयंप्रस्थतोयग्राहिमनोरमं॥ विधायतत्रमनुनापूरयेतत्शुभोदकैः ५० कुंकुमंरोचनंराजीरक्तचंदनवेणवान्॥ करवीरजपाशालीकुशश्या
माकतंडुलान् ५१ निक्षिपेत्सलिलेतस्मिन्नेकंसंकल्प्यभानुना॥ सांगमभ्यर्चयेत्तस्मिन्भास्करंप्रोक्तलक्षणं॥ गंधपुष्पादिनैवेद्यैर्यथावि
धिविधानवित्॥ तद्विधायजपेन्मंत्रंसम्यगष्टोत्तरंशतं॥५२॥ पुनःसंपूज्यगंधाद्यैर्जानुभ्यामवनींगतः आमस्तकंतदुद्धृत्यव्योम्निसावरणे
रवौ॥५४॥ दृष्टिंविधायसैकत्येनमूलमंत्रंधियाजपन्॥ दद्यादर्घंदिनेशायप्रसन्नेनांतरात्मना॥५५॥ कृत्वापुष्पांजलिंभूयोजपेदष्टोत्तरं
शतं॥ यावदर्घामृतंभानुःसमादत्तेनिजैःकरैः॥५६॥ तेनतृप्तोदिनमणिर्दद्यात्सर्वमनोरथान्॥ अर्घदानमिदंपुंसामायुरारोग्यवर्द्धनं ५७
धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदं॥ तेजोवीर्ययशःकांतिविद्याविभवभाग्यदं॥५८॥ आकाशंवह्निदीर्घेन्दुसंयुतंभुवनेश्वरी॥ सर्गान्वि

॥दीर्घेत्यादिना॥ अक्लीवहीननपुंसकचतुष्टयं॥ अं इं उं ऋं एतद्व्यतिरिक्तस्वरान्॥ आं ईं ऊं ॠं एं ऐं ओं औं अं अः। इत्येतान्स्वरान्॥ अग्निः रेफस्तत्तान्। रां रीं इत्यादि॥ भासां
शक्तीनां वीजत्वेन विदुः॥ जानंति देशिकाः॥ पीठमंत्रमुद्धरति पदेत्यादिना॥ चतुर्थ्यंतः ब्रह्मविष्णुशिवात्मकाय योगपीठाय नमः स्वरूपं॥ अर्घ्यदानप्रकारमाह
प्रभातमिति॥ मंत्रांतरमाह॥ आकाशमित्यादिना॥ आकाशं हकारः। अग्निः रेफः। दीर्घः आकारः इंदुः विंदुः॥ एतैः सपिंडितं। प्रथमाक्षरं ह्रामिति भवति॥ भुवनेश्व
रीवीजं द्वितीयं सर्गान्वितो भृगुः॥ इति तृतीयाक्षरात्मको मंत्रः। स्पष्टार्थमपरं॥ मंत्रांतरमाह॥ आकाशमग्नीति॥ आकाशः हकारः। अग्निः रेफः। पवनो यकारः। संघाता

आधारादिपदाग्रांतं कंठादाधारकावधि॥ मूर्द्धादिकंठपर्यंतं क्रमाद्बीजत्रयं न्यसेत् ६० षड्दीर्घस्वरयुक्तेन मध्येनांगानि कल्पये
त् रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि ६१ पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणां
गरुचिं त्रिनेत्रं॥ भानुलक्षं जपेन्मंत्रमन्नाज्येन दशांशतः॥ तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेंद्रियः ६३ पूर्वोक्ते प्रयजेत्पीठे विधा
नेनामुना रविं॥ प्रथमावृत्तिरंगैः स्यात्परा चंद्रादिभिर्ग्रहैः ६४ तृतीया लोकपालैः स्याच्चतुर्थी स्यात्तदायुधैः॥ इति संपूज्य निर्माल्यं
तेजश्चंडाय दीयतां ६५ अर्घ्यं प्रागीरितं दद्याज्ज्ञानवेसंयतेंद्रियः॥ सोपि रत्नं धनं धान्यं पुत्रपौत्रान्पशून्पशून् ६६ वस्त्राणि भूषणादी
नि दद्यात्स्मेन संशयः॥ आकाशमग्निपवनसद्यांतादीशविंदुमत् ६७ मार्तंडभैरवं नाम वीजमेतदुदाहृतं॥ उटितं विंववीजेन सर्व
कामफलप्रदं ६८ दांतं दहननेत्रेंदुसहितं तदुदीरितं॥ पंचह्रस्वाढ्यवीजेन पंचमूर्तीः प्रविन्यसेत् ६९ मध्यमादिकनिष्ठांतमंगु
लीषुक्रमादिमाः॥ सूर्यो खो भास्करो भानुस्तातो रविर्दिवाकरो ॥७०॥ शिरोवदनहृद्गुह्यपाददेशेषु ताः पुनः॥ दीर्घयुक्तेन वीजेन नेत्रां
तागानि विन्यसेत् ॥ ७१ ॥ ६८ ओंकारः अर्घीशः उकारः विंदुरनुस्वारः। एतैः सपिंडितो मार्तंडभैरवो नाम एकाक्षरो मंत्रः॥ ततश्च ह्रौं इति सिद्धं भवति। एतदे

नवीजं विंववीजपुटितं सर्वकामार्थदमित्याह॥ उटितमिति॥ वीजमंत्रमुद्धरति दांतो ठकारः दहनो रेफः नेत्रं इकारः इंदुः खंडः॥ एतैः सपिंडितं वीजं ह्रीमिति भवति।
पंचह्रस्वेति॥ अ इ उ ए ओ॥ एभिः प्रत्येकं संपुटितं उटितमूलवीजेन वक्ष्यमाणस्थानेन्यसेत्॥ मूर्तीर्दर्शयति। सूर्येत्यादिना॥ अंगन्यासमाह। दीर्घयुक्तेन मूलवीजेनेति।

ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। इत्यादिना प्रकारेणाबीजेन मूर्तिविन्यासः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ध्यानमाह॥हेमांभोजेति॥खट्वांगं॥ एष भागेषु प्रसिद्धः॥खट्वांगमेवेत्यपरो घृणि अंकुश खेटवक्रं चतुर्वक्रं अन्यंशेषं।दिवाकरमंत्रांतरमाह॥वियदिति॥वियद्धकारः।
अर्धेंदुरनुस्वारः।ततोहमिति सिद्धं॥तदादिः सकारः॥विसर्गसहितः।ततः हंसः इति सिद्धं॥हसाहकारयुक्तसकारेणातादृशेन षडंगानि कुर्यादित्यर्थः॥अष्टदलपद्मं लिखित्वा
दिग्दलेषु क्रमेणाक्षरांतत्त्वेनमः॥नरायनमः॥परायनमः॥ इति पूजयेत्॥मंत्राद्यामातृकापद्मे पूर्वोक्तमातृकापद्मे विलिख्य तत्कर्णिकायां हंसमंत्रान्लिखेत्॥०॥तं कु

व्यापकं मूलबीजेन कुर्वीत तदनंतरं॥हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्वांगपद्मौ चक्रं शंखं सपाशं सृणिमतिरुचिरामस्र
मालां कपालं॥हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्तंडं वल्लभार्धं मणिमयमुकुटं हारयुक्तं भजामः ७२ लक्षत्रयं
जपेन्मंत्री बीजं बिंबपुटीकृतं॥दशांशकमलैः फुल्लैर्जुहुयान्मधुरोक्षितैः ७० पीठे दीप्तादिभिर्युक्ते कर्णिकायां उपादिकाः॥पूर्वादिदि
क्षु संपूज्य मूर्तिं मूलेन कल्पयेत् ७५ आवाह्य पूजयेद्देवं वक्ष्यमाणविधानतः॥सूर्यादींश्चतुरो दिक्षु विदिक्ष्वन्यान्समर्चयेत् ७६ अंग
पूजां यथापूर्वं निरृतीशानदिग्गतं॥ग्रहानष्टौ ततो बाह्ये लोकपालास्ततः परं ७७।अर्घ्यप्रदानं च यजेन्मंत्री मार्तंडमेरवं॥ इति सिद्ध
मनुर्मंत्री साधयेदिष्टमात्मनः ७८॥शाल्याज्यतिलबिल्वानां लक्षहोमान्निधिर्भवेत्॥राजवृक्षसमुद्भूतैः पुष्पैर्होमो रमाकरः॥७९
जपाकुसुमहोमेन वशयत्यचिरान्नृपान्॥मातुलुंगफलैर्हुत्वा धनमिष्टं लभेत सः ८० इमं मंत्रं जपन्मर्त्यः कांतिं पुत्रानलं द्युतिं।
वाक्सिद्धिममितां लक्ष्मीं सौभाग्यमपि साधयेत् ८१ वियदर्धेंदुललितं तदादिः सर्गसंयुतः॥अजपाख्यो मनुः प्रोक्तो द्व्यक्षरः सुरपाद
पः ८२ ऋषिर्ब्रह्मास्मृतो देवीगायत्री छंद ईरितं॥देवता जगतामादिः संप्रोक्तो गिरिजापतिः ८३ हसाषड्दीर्घयुक्तेन कुर्यादंगक्रियामनोः

भं बिंदुभ्यां इति प्रयोगप्रकारं स्फलेनिरूपं भवति॥हंसइत्यत्र बिंदुभ्यां विगलत्॥स्ववत्सुधापरिवीतं॥परिस्रुतं॥मंत्रांत्यबीजं॥ सइत्यक्षरस्वं वित्यततस्तस्मात्स प्र
कारात्प्रद्योतत्परमामृतशशिनाप्रसूतामृतपरिस्रुतबिंदुनासंसिक्तमाद्यं हकाराक्षरं॥ एवं विलोमेन संस्मरन् ॥ ० ॥ श्री ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जपांतः फलमाह॥ मंत्रीति॥ इदानीमग्निमंत्रमुद्धरति॥ व्याहृतीति उद्धारः स्पष्टः॥ ताराद्यः पंचविंशत्यक्षरोग्निमंत्रः॥ ध्यानमाह॥ अंसासक्तेति॥ भानुसहस्रा रि॥ मध
उद्यद्भानुस्फुरिततडिदाकारमर्द्धांबिकेशं॥ पाशाभीती वरदपरशुं संदधानं कराब्जैः॥ दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलम्
सौम्याग्नेयं वपुरवतु वश्चंद्रचूडं त्रिनेत्रम् ८५ भानुलक्षं जपेन्मंत्रं पायसेन ससर्पिषा दशांशं जुहुयात्सम्यक् ततः सिद्धो भवेन्मनुः।
८६॥ दीप्तादिपूजिते पीठे प्रागुक्ते पूजयेद्विभुं॥ मूलेन मूर्तिं संकल्प्य यजेदंगादिभिः सह॥ ८७॥ केंद्रे वसुं नरवरौ दिग्दलेषु विदिक्ष्वथ अ
र्चयेदृतुं॥ गोजामज्जाख्याः मद्विजापुनः ८८ लोकेश्वरास्तदस्त्राणि पूजयेदेवमन्वहं॥ अर्घं च विधिवद्दद्यात्प्रागुक्तेनैव वर्त्मना॥
८९॥ मंत्राढ्यमातृकांभोजे पूर्णकुंभं निधाय तं॥ पिधाय वामहस्तेन न्यस्तमंत्रेण संयुतः ९०। अष्टोत्तरशतं मंत्रं जपेत्तोयं सुधामयम्। स्मृ
त्वा तेनाभिषिंचेद्यं स भवेद्विगतामयः॥ ९१॥ आयुरारोग्यविभवानमितान्लभते नरः। अनेनैव विधानेन विषार्तो निर्विषो भवेत् ९२
विंदुभ्यां विगलत्सुधापरिवृतं मंत्रांत्यवीजं ततः॥ प्राच्यां तत्परमामृतेन शशिना संसिक्तमाद्यं स्मरन् ९३॥ मंत्री मंत्रमिदं जपेद्विषग
दोन्मादापमृत्युज्वरान्जित्वा वर्षशतं विशिष्टविभवो जीवेत्सुखं बंधुभिः ९४॥ व्याहृतित्रयमग्ने स्याज्जातवेद इहावह॥ सर्वकर्माणि सं
साध्यसाधयपाग्निप्रियांततः।९५। ताराद्योयं मनुः प्रोक्तः पंचविंशतिवर्णवान्॥ ऋषिर्भृगुर्भवेच्छंदो गायत्रं देवतानलः।९६। विभक्तैः
पंचभिः षड्भिश्चतुर्भिः पंचभिस्त्रिभिः॥ द्वाभ्यामंगक्रिया प्रोक्ता वर्णैर्मूलमनोः क्रमात्॥ ९७॥ अंसासक्तसुवर्णमाल्यमरुणस्रक्चंदना
लंकृतं ज्वालाउंजजटाकलापविलसन्मौलिं स्फुरत्कांबरं॥ शक्तिं स्वस्तिकदर्भमुष्टिकजपस्रक्स्रुक्स्रुवाभीवरान्दोर्भिर्बिभ्रतमर्चि
तं त्रिनयनं रक्ताभमग्निं भजे॥ ९८॥ ग्रहोल्लब्धमनुं मंत्री चतुर्दश्यामुपोषितः। जपेद्ज्ञानसहस्राणि शुद्धाचारो जितेंद्रियः ९९। अमावा
स्यादिने विप्रान्भोजयेन्मधुरोत्तरैः। भक्ष्यैर्भोज्यैर्यथाशक्ति दद्यात्तेभ्योपि दक्षिणाम् १०० ॥९९ रदिनं प्रतिपदं॥ उत्तरोग्रंथः स्पष्टार्थः॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वमंडलांते। अग्निमंडलांते स्वबीजेन रेफेण निगद्व्याख्यातमपरम्। मंत्रांतरमाह॥ उतिसृत्या दिना निगद्व्याख्यातेन ग्रंथेन। भूतैः पंचभिः॥ स्वधार्थमपरम्।
भुक्त्वा स्वयं समानीय होमद्रव्याणि शोधयेत्। अपरं दिनमारभ्य होमं कुर्याद्दतंद्रितः १०१ क्रमाद्द्दसमिद्व्रीहितिलराजीहविर्घृतैः।
प्रत्येकमष्टोत्तरशतं जुहुयाद्दिनशः सुधीः १०२॥ दशाहमेवं निर्वर्त्य विधानेन विधानवित्॥ दत्वा पूर्णाहुतिं सम्यगेकादश्यां द्विजोत्त
मान्॥१०३॥ संपूज्य तर्पयेद्विद्वैर्यथाविभवमादरात्॥ गुरवे दक्षिणां दद्यादरुणां गां पयस्विनीं॥ १०४॥ वासांसि धनधान्यादि दत्वा सं
प्रीणयेद्गुरुं॥ स्वमंडलांते प्रयजेत्पीठं सनवशक्तिकं १०५॥ पीताश्वेतारुणाकृष्णाधूम्रातीव्रास्फुलिंगिनी। रुचिराज्वालिनी प्रोक्ताः
कृशानोर्नवशक्तयः १०६ स्वबीजेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत्॥ अत्र संपूजयेद्वह्निं विधिना प्रोक्तलक्षणं १०७ अंगपूजा पु
राप्रोक्ता मूर्तीरष्टौ दले ष्विमाः॥ जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः १०८ अश्वोदरजसंज्ञोन्यः पुनर्वैश्वानराह्वयः॥ कौमारते
जाः स्याद्विश्वमुखो देवमुखः परः १०९ अर्च्याः स्वस्तिकशक्तिभ्यां विराजितकरांबुजाः। लोकेशानर्चयेद्बाह्ये वज्राद्यायुधसंयुतान्
११० इति संपूजयेन्नित्यं जपेत्साग्रं सहस्रकं। जायते वत्सरादर्वाग्धनधान्यसमृद्धिमान् १११ साज्यमन्नं प्रजुहुयाद्वत्सरात्तु भवेच्छ्रियं
॥ कुंसुमैर्ब्रह्मवृक्षस्य दधिसौद्रघृतप्लुतैः ११२॥ करवीरप्रसूनैर्वा मंडलात्स्यात्समृद्धिमान्। षण्मासं कपिलाज्येन जुहुयाद्वत्सरांत
रे॥११३॥ तस्य संजायते लक्ष्मीः कीर्तिस्त्रैलोक्यवंदिताः॥ शालिभिर्जुहुयान्नित्यं विधिनाष्टोत्तरं शतं १४ व्रीहिगोमहिषान्नाद्यैर्भव
नं तस्य पूर्यते। तिलहोमेन महतीं श्रियमाप्नोति मानवः ११५॥ पलाशबिल्वखदिरशमीदुग्धमहीरुहां॥ विकंकतारग्वधयोः समि
द्भिः करवीरजैः ११६ प्रसूनैः कुमुदैः पद्मैः कह्लारैररुणोत्पलैः। जातीप्रसूनैर्दूर्वाभिर्नित्यमष्टोत्तरं शतं ११७ एकेन जुहुयान्मंत्री प्रति
पत्त्वयवासुधीः साधयेदखिलान्कामान् षण्मासान्नात्र संशयः ११८ उतिरूपरूपं ब्रूयाद्धरि पिंगलतत्परं। लोहिताक्ष पदं देहि मे स्वा

इति[illegible]पटलः १४॥
पत्रसं ४८ ॥

शा·ति·
तो·गू·
६६

चतुर्विंशत्यक्षरात्मा समृद्धिमतुरीरितः॥ ऋष्यादयः पुरा प्रोक्ताः षडङ्गभूतकराणि त्रिभिः १२० चतुर्भिर्युगलेनार्णैर्मूलमंत्रसमुद्भवैः॥ विदधीत
षडंगानि जातियुक्तानि मंत्रवित् १२१ स्वर्णाश्वत्थविनिर्गतं हुतवहं सिंदूरपुंजप्रभं ज्वालाभिर्निचितांगरोमनिचयं कांत्या जगन्मोहनं अम्भाका
रमनर्घ्यरत्नविलसद्भूषालसत्कंधरं रत्नैरिंद्रियनिर्गतैर्वसुमतीमाच्छादयंतं स्मरेत्॥१२२॥ लक्षं मंत्रं जपेदेनं पयोन्नेन ससर्पिषा॥ दशांशं जु
हुयाद्वह्नौ तुरगाग्निमनुस्मरन् १२३ पीठे प्रागीरितेभ्यर्च्य तदंगैर्मूर्तिभिः सह॥ आशापालैस्तदीयास्त्रैरभ्यर्चेद्धव्यवाहनं।१२४। प्रातः स्नानरतो
मंत्री सहस्रं यो जपेन्मनुं॥ जित्वा रोगान्स जीवेत्स श्रियावर्षशतं नरः॥१२५॥ हव्यमाण जले स्थित्वा भानुमालोक्य संयतः॥ चतुःसहस्रं प्रजपे
न्नित्यं संवत्सरावधि १२६ अपमृत्युभयं रोगकृत्या दारिद्र्यसंभवान्॥ क्लेशान्निर्जित्य तेजस्वी जीवेद्वर्षशतं सुधीः॥१२७ कृत्तिकायां प्रतिपदि
शालिहोमो धनप्रदः॥ दभाशमीसमिद्भिर्वा प्रतिपत्सु भवेद्धनं।१२८ इष्टा वा त्रिर्भवेद्राज्यैः पद्मैर्ग्रामं भवाप्नुयात्॥ तैलैर्ज्योतिष्मतीभूतैरिपुरा
जयेन्नृपः १२९ अश्वत्थसमिधो मेषी घृताक्ता जुहुयान्नरः। कन्यामिष्टामवाप्नोति सा पतिं प्राप्नुयाद्वरं १३० शुद्धाज्येन कृतो होमो ज्वरनाशक
रः परः॥ सप्ताहं जुहुयान्मंत्री वंधूककुसुमैः शुभैः १३१ साईसहस्रमचिरान्महतीं श्रियमश्नुते॥ मासं संक्षोरेणागव्येन स्रीराहारो जितेन्द्रियः
१३२ सहस्रं जुहुयान्मंत्री संपदामधिपो भवेत्॥ आज्याक्तदूर्वाहोमेन जीवेद्वर्षशतं नरः १३३ अष्टोत्तरशतं नित्यं हविषा मृगमुद्गपा जुहूतो
जायते लक्ष्मीर्धनधान्यसमृद्धिदा १३४ प्रतिमासं प्रतिपदि जुहुयाद्दस्यतं धृतैः॥ श्रीर्भवेन्महती तस्य षण्मासादनपायिनी १३५ अरुणैः सत्य
लैः पुल्लैर्मधुरत्रयसंयुतैः॥ जुहुयाद्वत्सरादर्वाक् स भवेदिंदिरापतिः १३६ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयाद्दन्वहं सुधीः॥ सहस्रं वत्सरार्द्धेन भवेद्भू
मिपुरंदरः १३७ वत्सरं जुहुतस्तैः स्याल्लक्ष्मीरिंद्रेणवांछिता॥ जुहुयादमृताखंडैः पयोक्तैः सप्तवासरं १३८ त्रिसहस्रं प्रतिदिनं मंत्रविद्विजितेंद्रियः
कृत्याद्रोहज्वरोन्मादरोगान्जित्वा निरंतरं।१३९ जीवेद्वर्षशतं भूत्वा तेजसा भास्करप्रभः। करवीरजपाबिल्वपलाशवपभूरुहाम् १४० प्रसूनैः कु

ल्लैः करंटैर्जातिसंभवैः। एष्यैर्हुत्वा त्रिमध्व
क्तैर्मंत्री प्रतिपदं प्रति १४१

राम·
६६

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सौम्यसौरमंत्रानभिधायेदानीं वैश्रवणमंत्रमारभते॥ अथेत्यादिना॥ मंत्रमुद्धरति॥ तारं प्रणवः। नमः स्वरूपं॥ नरौ दीर्घसमन्वितौ स्वरूपं॥ पवनो यकारः॥ णायस्वरूपं त्र
यक्षरो मंत्रः। अक्षरन्यासस्थानान्याह॥ आधारेत्यादिना॥ आधारहृदयबाहुद्वयऊरुमूलद्वयनाभिषु॥ एको न्यासः॥ कंठनाभिहृदिकुचद्वयपार्श्वपृष्ठ एकः। मूर्द्धशिरा

प्राप्नुयान्महतीं लक्ष्मीं वत्सराद्वाञ्छिताधिकां॥ आदाय तंडुलप्रस्थं निर्मलं साधु शोधितं १४२ गोदुग्धेन हविः कृत्वा कवलं तेन कल्पयेत्॥
आज्याक्तं तत्समादाय पूजिते हव्यवाहने १४३ गंधमाल्यादिभिः सम्यक् जपित्वाष्टोत्तरं शतं। जुहुयात्प्रतिपूर्त्त्वग्निं ध्यात्वा तद्गतविग्रहं।
१४४ जायते वत्सरादेव लक्ष्मीस्त्रैलोक्यमोहिनी॥ मंत्रेणानेन संजप्तां वचां खादेद्दिनागमे १४५ भारती निवसेत्तस्य मुखांभोजेतिनिश्चला
अष्टोत्तरशतं जप्तं जलं प्रातः पिबेन्नरः १४६ जठराग्निर्ज्वलेत्तस्य घृतेन वहुताशनः। कृत्वा नवपदात्मानं मंडलं प्रागुदीरितं १४७ कलशा
न्नव कल्याणान्स्थापयेत्प्रोक्तवर्त्मना। क्षीरवृक्षसमुद्भूतैः क्वाथैस्तान्पूरयेत्क्रमात् १४८ वस्त्रादिभिरलंकृत्य नव रत्नानि निःक्षिपेत्
॥ मध्ये संपूजयेदग्निं मूर्तीरष्टौ दिशां क्रमात् १४९ कुंभेषु धूपदीपाद्यैः पुष्पगंधैर्मनोहरैः। स्पृष्ट्वा जपेत्ततः कुंभं मंत्रमष्टोत्तरं शतम् १५०
अभिषिंचेत्ततः साध्यं विनीतं दत्तदक्षिणं। ज्वरग्रहमहारोगदारिद्र्यादीन्विजित्य सः १५१ जीवेद्वर्षशतं सम्यगभिषिक्तः श्रिया सह १५१
॥ इति शारदातिलके चतुर्दशः पटलः। १४॥ अथ वक्ष्ये महामंत्रान्विष्णोः सर्वार्थसाधकान्। येषां संस्मरणात्संतो भवाब्धेः पारमाश्रिताः १
तारं नमः पदं पश्चान्नरौ दीर्घसमन्वितौ। पवनो णायमंत्रोयं प्रोक्तो वस्वक्षरात्मकः २ साध्यो नारायणः प्रोक्तो मुनिश्छंदउदाहृतम्। मंत्रस्य
देवी गायत्री देवता विष्णुरव्ययः ३ क्रुद्धोल्काय हृदाख्यातं महोल्काय शिरः स्मृतं। वीरोल्काय शिखा प्रोक्ता द्युल्काय कवचं मतम् ४।
सहस्रोल्काय स्त्रमुक्तमंगक्लृप्तिरियं मता। भूयो वर्णैर्मनोः षड्भिः षडंगानि समाचरेत् ५ अथ शिरसि पुनर्वर्णान्विन्यसेत्कुक्षिहृद्योः। व
द्दिक्रुक्रमंत्रेण मंत्रवर्णांस्ततो न्यसेत् ६ आधारे हृदये वक्त्रे दोः पन्मूलेषु नाभिषु। कंठे नाभौ हृदि कुचे पार्श्वे पृष्ठेषु तत्परम्॥ ७॥ ॥

णां तेषु एकः। बाहुद्वये पादद्वये च पंचांगुलिषु एकः। त्वगादिसप्तधातुषु प्राणे चैकः सह एव कर्तव्यः। मूर्द्धादि ईक्षणाद्याह। कुक्षि सोरुजानुजंघापदद्वये च एकः। गंडयो
रंसयोरूर्वोः वक्त्रस्थाने शंखस्थाने अंभोजस्थाने क्षित्यर्थः। द्वादशस्थानेषु द्वादशाक्षरमंत्रन्यासं च कुर्यात् द्वादशाक्षरमंत्रस्येति। अष्टार्णेत्यादिना। अयमर्थः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्वादशाक्षरमंत्रवर्णन्यासस्समये श्रीमदष्टाक्षरमंत्रमष्टप्रकृत्यात्मना संचिंत्य एतस्माच्चतुरात्मकं च वासुदेवसंकर्षणप्रद्युम्नानिरुद्धात्मनां ॥ आत्मांतरात्मपरम
त्मविज्ञानात्मनां वा संयोगाद्द्वा द्वादशाक्षरमंत्रस्योत्पत्तिरिति संचिंत्य ॥ द्वादशवर्णा द्वादशस्वरद्वादशादित्यसहिताः ॥ केशवादिद्वादशमूर्तीर्देहे वक्ष्यमाणस्थाने
षु वक्ष्यमाणक्रमेण विन्यसेदिति ॥ स्थानानि च तत्त्वकारः स्वदर्शयति ॥ ललाटेत्यादिना ॥ अथ मंत्रनिगूढः ललाटे ॐ अं धातासहिताय केशवाय नमः ॥ कुक्षौ नं अं

मूर्द्धास्यनेत्रश्रवणघ्राणेषु तदनंतरम् ॥ दोःपादसंध्यंगुलिषु धातुप्राणेषु हृज्जले ॥ ८ ॥ मूर्द्धं क्षराणास्य हृत्कुक्षिशिरोरुजंघापदद्वये ॥
एकैकशो न्यसेद्वर्णान् गंडांसोरुपदेषु च ॥ ९ ॥ चक्रशंखगदांभोजं पदेष्ववहितो न्यसेत् ॥ अष्टार्णोष्टप्रकृत्यात्मा ज्ञेयो सौ चतुरात्मनां ॥
१० संयोगात्सूरिभिः प्रोक्तो विशिष्टो द्वादशाक्षरः ॥ अतस्तन्मंत्रवर्णाद्या द्वादशस्वरसंयुताः ११ द्वादशादित्यसहिता मूर्तीर्द्वादश
विन्यसेत् ॥ केशवाद्याः क्रमाद्देहे वक्ष्यमाणविधानतः ॥ १२ ॥ ललाटे केशवं धात्रा कुक्षौ नारायणं पुनः ॥ अर्यम्णा हृदि मित्रेण माध
वं कंठदेशतः ॥ १३ ॥ वारुणेन च गोविंदं पुनर्दक्षिणपार्श्वके ॥ अंशुना विष्णुमंसस्थं भगेन मधुसूदनं १४ गले विवस्वता युक्तं त्रिविक्र
ममनंतरं ॥ वामपार्श्वस्थमिंद्रेण वामनाख्यमथांसके १५ ॥ पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतं ॥ हृषीकेशाह्वयं पृष्ठे पद्मनाभं ततः
परं ॥ १६ ॥ त्वष्ट्रा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत् ॥ द्वादशार्णं महामंत्रं ततो मूर्द्ध्नि प्रविन्यसेत् ॥ १७ ॥ पुनः किरीटमंत्रेण व्याप
कं विन्यसेत्ततः ॥ ब्रूयात्किरीटकेयूरहारमकरकुंडलं १८ शंखचक्रगदांभोजहस्तं पीतांबरं धरं ॥ श्रीवत्सांकितवक्षोंतेस्थलशब्दमुदी
रयेत् १९ श्रीभूमिसहितं स्वात्मज्योतिर्द्वयमुदीरयेत् ॥ पश्चाद्दीप्तिकरायेति सहस्रादित्यतेजसे ॥ २० ॥

यं अर्यमासहिताय नारायणाय ॥ हृदि
मों इं मित्रसहिताय माधवाय ॥ कंठे भं ईं वरुणसहिताय गोविंदाय दक्षिणपार्श्वे गं उं अंशुसहिताय विष्णवे दक्षिणांसे वं ऊं भगसहिताय मधुसूदनाय ॥ इत्य
न्यत्रापि ऊहनीयं ॥ ककुदि अपरगले ॥ ततः समस्तद्वादशाक्षरमंत्रं मूर्द्ध्नि विन्यसेत् किरीटमंत्रोद्धारः स्पष्टः ॥ विकारलक्षणो दृष्टालसे ॥ ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

पीठमंत्रोद्धारोपि सुगमः॥ वासुदेवादीनां शक्तीर्दर्शयति॥ शांतिरित्यादिना॥ विष्णोः सायुज्यमाप्नुयादित्यंतोयं ग्रंथः स्पष्टार्थः॥ यंत्रमुद्धरति॥ अष्टदलं कर्णिकायां
षट्कोणांतर्दंतः प्रणवं तन्मध्ये साध्यनामगर्भितं षट्कोणे सुदर्शनं षडक्षरं॥ अष्टदले अष्टाक्षराणि॥ मूलमंत्रस्य दलाग्रेषु श्रीकराष्टाक्षराणि बहिर्द्वादशदले द्वादश

नमोंतः प्रणवाद्योयं किरीटमनुरीरितः॥ एवं न्यासं ततो कृत्वा ध्यायेन्नारायणं परम् २१ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पंकजं च
क्रं बिभ्रतमिंदिरावसुमतीसंशोभिपार्श्वद्वयं॥ कोटीरांगदहारकुंडलधरं पीतांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्स
चिह्नं भजे॥२२॥ त्रिकारलक्षं प्रजपेन्मनुमेनं समाहितः॥ तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः २३ पीठे संपूजयेद्देवं विमलादिस
मन्विते॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा ततः परं २४ प्रह्वी सत्या तथेशानानुग्रहा नवमी तथा॥ नमो भगवते ब्रूयाद्विष्णवे च पदं
वदेत् २५ सर्वभूतात्मने वासुदेवायेति वदेत्ततः॥ सर्वात्मपदसंयोगाद्योगपद्मपदं पुनः २६ पीठात्मने हृदंतो यं मंत्रस्तारादिरीरितः॥
दत्वानेनासनं मंत्री मूर्तिं मूलेन कल्पयेत्॥२७॥ आवाह्य पूजयेद्देवं सुगंधिकुसुमादिभिः॥ अंगान्यभ्यर्च्य मंत्राणां केसरेषु समर्चये
त् २८ दलेषु वासुदेवाद्या मूर्तीः शक्तिसमन्विताः॥ वासुदेवं संकर्षणं प्रद्युम्नमनिरुद्धकं॥२९॥ हेमपीततमालेन्द्रनीलाभान्पीतवा
ससः॥ शंखचक्रगदांभोजधरानेतांश्चतुर्भुजान् ३० शांतिं श्रियं सरस्वत्या रतिं कोणदलेष्विमाः॥ श्वेतकांचनगोदुग्धदूर्वावर्णाः
सुभूषिताः ३१ एतानर्चेद्दलाग्रेषु शंखं चक्रं गदां वजे॥ कौस्तुभं मुसलं खड्गं वनमालां यथाक्रमं॥ ३२ रक्ताब्जपीतकनकश्या
मकृष्णासिपांडुरान्॥ बहिस्थे समभ्यर्चेद्गरुडं कुंकुमप्रभं ३३ मुक्तामाणिक्यसंकाशौ दक्षिणोत्तरतो निधी॥ ध्वजं वरुणदिग्भा
गे श्यामलं पूजयेत्ततः ३४ ॥ ९९ स्वरवर्णान् बहिर्द्वात्रिंशद्दलं तस्मिन् नृसिंहाद्यष्टवर्णान्विलिख्य बहिर्नृसिंहास्त्रयुक्तं। एतद्यंत्रं
जपहोमसमस्तसंपदं वैष्णवं द्वादशवर्णमेवमुद्धरति॥ प्रणवो हृदित्यादिना॥ ॥ ॥ ॥

उद्धारः स्पष्टः ॥ द्वादशाक्षरन्यासस्थानान्याह ॥ मूर्द्धीति ॥ दृशोः एकैकमक्षरं ॥ बाह्वोरेकं ॥ जानुद्वयेप्येकं ॥ पादद्वयेपि ॥ ध्यानमाह ॥ विष्णुमिति ॥ वैष्णवं चतु
र्दशाक्षरमंत्रमुद्धरति ॥ हृल्लेखेत्यादिना ॥ स्पष्टार्थेनमंत्रेण ॥ ध्यानमाह ॥ विद्युदिति ॥ कमलजालक्ष्मीः ॥ वैकुंठे वासुदेवः । विद्यापुस्तकं वासुदेवलक्ष्म्योरे

अरुणं विघ्नमाग्नेये श्यामममार्यं निशाचरे ॥ श्यामां दुर्गां वायुकोणे सेनान्यं पीतमीश्वरे ३५ इन्द्रादीन्पूजयेत्पश्चाद्वज्राद्यायुधसंयुतान्
॥ इति संपूजयेद्विष्णुं प्रीतो राव रक्षोः सह ३६ धर्मार्थकामाल्लब्ध्वा वै विष्णोः सायुज्यमाप्नुयात् ॥ प्रणवो हृद्भगवते वासुदेवाय कीर्ति
तः ३७ प्रधानो वैष्णवे तंत्रे मंत्रोयं द्वादशाक्षरः ॥ ऋषिः प्रजापतिश्छंदो गायत्री परिकीर्तिता ३८ देवता स्य मनोः प्रोक्ता वासु
देवो मनीषिभिः । तारेणा हृदयं प्रोक्तं नमसा शिर ईरितं ३९ चतुर्वर्णैः शिखा प्रोक्ता पंचार्णैः कवचं मतं ॥ समस्तेन भवेदस्त्रमंग
कल्पनमीरितं ४० मूर्द्धि भाले दृशो रास्ये गले दोर्हृदयांबुजे ॥ कुक्षौ नाभौ ध्वजे जानुद्वये पादद्वये तथा ४१ विष्णुं शारदचंद्र
कोटिसदृशं शंखं रथांगं गदामंभोजं दधतं सिताब्जनिलयं कांत्या जगन्मोहनं ॥ आबद्धांगदहारकुंडलमहामौलिं स्फुरत्कं
कणं श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतम् ४२ वर्णलक्षं जपेन्मंत्रं दीक्षितो विजितेन्द्रियः तत्सहस्रं प्रजुहुयात्तिलै
राज्यपरिप्लुतैः ४३ पीठे प्रागीरिते मूर्तिं मूलमंत्रेण कल्पयेत् ॥ पूजयेद्विधिनानेन वासुदेवं विधानवित् ॥ ४४ ॥ प्रथमावृतिरंगैः
स्याद्वासुदेवादिभिः परा ॥ शांत्यादिशक्तिसहितैः परा द्वादशमूर्तिभिः ४५ चतुर्थी सुरनाथाद्यैर्वज्राद्यैः पंचमी मता ॥ एवं संपू
जितो विष्णुः प्रदद्यादिष्टमात्मनः ४६ पायसेन घृताक्तेन मंत्रवर्णसहस्रकम् ॥ ९९ कतां प्राप्नुं वपुरमितां श्रियं वः इत्यादिना । अक्षर
न्यासमाह ॥ मूर्द्धीति ॥ ओष्ठयोर्द्वितात्वोर्द्वौ गल लक्षं लक्षत्रितयं ॥ तद्देवा ॥ गजानन्दो ऐरावतादीन् पंचमुद्धरति । स साध्यमिति ॥ अत्र पत्रं पद्मं लि
खित्वा तत्कर्णिकायां प्रणवं तन्मध्ये साध्याख्यां लिखित्वा तारेण द्वादशाक्षरैः तयं शोभितके सरं पत्र मध्ये प्रधानमंत्राक्षरद्वंद्वमवशिष्टा ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जुहुयान्मानवः सिद्ध्यै समिद्भिः क्षीरभूरुहां ४७ ततस्त्वपाप्रपोक्ताभिः सर्वपापविमुक्तये ॥ हृल्लेखाबीजयुगलं रमाबीजयुगं ततः ४८ ल
क्ष्म्यै ते वासुदेवाय हृदंतः प्रणवादिकः ॥ चतुर्दशाक्षरैः प्रोक्तो मंत्रोयं सुरपादपः ॥४९॥ हृदयं शक्तिबीजाभ्यां रमाभ्यां शिर ईरितं ॥ लक्ष्म्या
प्रोक्ता शिखा वर्म वासुदेवाय ईरितं ॥५०॥ नमसास्त्रं समादिष्टं सर्वं तारादि कल्पयेत् ॥ विद्युच्चंद्रनिभं वपुः कमलजा वैकुंठयोरेकतां प्रा
प्तं स्नेहवशेन रत्नविलसद्भूषाभरालंकृतं ॥ विद्यां पंकजदर्पणान्मणिमयं कुंभं सरोजं गदां शंखं चक्रममूनि बिभ्रदमितां दिश्यात् श्रियं
वः सदा ॥५२॥ वर्णलक्षं जपेदेनं तत्सहस्रं सरोरुहैः होमं कुर्यात् त्रिकासिते मधुरत्रयसंयुतैः ५३ पूजास्याद्वैष्णवे पीठे द्वादशाक्षरवर्त्म
ना ॥ पायसेन कृतो होमो लक्ष्मीवश्यप्रदायकः ॥५४॥ मधुराक्तैस्तिलैर्हुत्वा सर्वकार्याणि साधयेत् ॥ तारो हृद्विष्णवे पश्चात् ङेंतः सुर
पतिर्भवेत् ॥५५॥ महाबलाय ठद्वंद्वं मनुरष्टादशाक्षरः ॥ ऋषिरिंदुर्विराट् छंदो देवता दधिवामनः ॥५६॥ हृदेकेन शिरो द्वाभ्यां शिखा
त्रिभिरुदाहृता ॥ कवचं पंचभिः प्रोक्तं नेत्रं तावद्भिरक्षरैः ॥५७॥ द्वाभ्यामस्त्रमिति प्रोक्तः प्रकारोंगन्यासस्य रश्मिभिः ॥ मूर्ध्नि भाले दृशोर्युग्मे क
र्णनासोष्ठतालुषु ॥५८॥ कंठे बाहुद्वये पृष्ठे हृदयोदरनाभिषु ॥ गुह्योरुजानुयुग्मेषु जंघयोः पादयोर्न्यसेत् ॥५९॥ अष्टादश मनोर्वर्णा
न्न्यस्याद्देवं विचिंतयेत् ॥ मुक्तागौरं नवमणिलसद्भूषणं चंद्रसंस्थं ॥ भृंगाकारैरलकनिकरैः शोभिवक्त्रारविंदं ॥ हस्ताब्जाभ्यां कनक
कलशं शुद्धतोयाभिपूर्णं दध्यन्नाढ्यं कनकचषकं धारयंतं भजामः ॥६०॥ गुणलक्षं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः ॥ पायसान्नैः प्र
जुहुयाद्दध्यन्नैर्वा यथाविधि ॥६१॥ चंद्रांतकल्पिते पीठे प्रागुक्ते तं समर्चयेत् ॥ मूर्तिं मूलेन संकल्प्य वक्ष्यमाणविधानतः ॥६२॥
षडंगानि समभ्यर्च्य केसरेषु यथापुरा ॥ अभ्यर्च्य वासुदेवादीन् ध्वजादीनर्चयेत्ततः ॥ ६३ ॥ ध्वजं चैव वैनतेयं च कौस्तुभं वनमा
॥ लिकां ॥ शंखं चक्रं गदां शार्ङ्गं दलेष्वष्टसु पूजयेत् ॥ ६४ ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

क्षरद्वयमध्यपत्रे प्रधानमंत्राक्षरद्वंद्वमवशिष्टाक्षरद्वयमध्यपत्रे लिखेत्॥ पत्राद्बहिर्द्वादशवर्णैर्वेष्टयित्वा तद्बहिर्मातृकाक्षरैर्वेष्टयित्वा विदध्यादुक्तफलदं
दधिवामनपत्रं॥ हयग्रीवमंत्रमुद्धरति उद्गिरेत्यादिना॥ उद्गिर प्रणवोद्गीथ सर्ववागीश्वरेश्वर सर्ववेदमयाचिंत्य सर्वबोध पबोधयेति स्वरूपं। प्रणवादि मं

केशवाद्यान्दलाग्रेषु सुरेन्द्रादीननंतरं॥ वज्रादीनि गजानष्टौ सप्तावरणमीरितं॥ ६५॥ विधानमेतद्देवस्य कीर्तितं सुरपूजितं॥
पायसाज्येन जुहुयात्सहस्रं श्रियमाप्नुयात्॥ ६६॥ धान्यहोमेन धान्याप्तिः शतपुष्पासमुद्भवैः॥ बीजैः सहस्रसंख्यातैर्होमो भ
यविनाशनः ६७। दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतेः॥ स्मृत्वा त्रिविक्रमं रूपं जपेन्मंत्रमनन्यधीः ६८ मुक्तो वधाद्बंधनाद्वा
नात्र कार्या विचारणा॥ पदे संपाद्य देवेशं भित्तौ वा पूजयेत्सुधीः ६९ सुगंधिकुसुमैर्नित्यं महतीं श्रियमश्नुते॥ संसाध्य तारोज्व
लकर्णिकाब्जमष्टाक्षरैरुज्वलकेशराढ्यं ७० मंत्राक्षरद्वंद्वयुताष्टपत्रं शिष्टार्णयुग्मोल्लसितात्यपत्रं॥ द्वादशाक्षरसंवीजं त
द्बहिर्मातृकाक्षरैः ७१ विदध्याद्देवमेवं यंत्रं सर्वसंपत्प्रदायकं॥ उद्गीथपदमाभाष्य प्रणवोद्गीथशब्दतः ७२ सर्ववागीश्वरेत्यंते
प्रवदेदीश्वरेत्यथ॥ सर्वदेवमयाचिंत्यपदांते सर्वमुच्चरेत्॥ ७३॥ बोधयद्वितयांतोयं मंत्रस्तारादिरीरितः॥ ऋषिर्ब्रह्मास्य संदि
ष्टश्छंदोनुष्टुबुदाहृतं ७४॥ देवतास्य हयग्रीवो वागैश्वर्यप्रदो विभुः॥ तारेणा पादैर्मंत्रस्य पंचांगानि प्रकल्पयेत् ७५ शरच्छ
शांकप्रभमश्ववक्त्रं मुक्तामयैराभरणै रुचयेत्तं॥ रथांगशंखान्वितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः॥ ७६॥ वर्णलक्षं जपेन्मं
त्रं कुंदपुष्पैर्मधुप्लुतैः॥ दशांशं वै क्रमेणैव जुहुयान्मंत्रसिद्धये॥ ७७॥ अष्टाक्षरोदिते पीठे हयग्रीवं प्रपूजयेत्॥ ७८ त्रपदैः पंचांगानि

कल्पयेत् कथं ॐ उद्गीर हृदयं ॐ उद्गीथ शिरः। ॐ सर्ववागीश्वरेति शिखा ॐ सर्ववेदमयाचिंत्येति कवचं॥ ॐ सर्व ------ बोधय प्रबोधयेत्यस्त्रं॥ अन्यत्सुगमं॥ ए
काक्षरहयग्रीवबीजमुद्धरति॥ वियदिति। वियद्धकारः। भृगुः सकारः। अर्घीश ऊकारः। बिंदुमान्सानुस्वारः एतैः सपिंडितं। हयग्रीवबीजं॥ ह्सूं इति॥ त्र्यंबुदलप

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अपूर्वदक्षिणपश्चिमोत्तरकेसरेषु चतुरो वेदान्यजेत्॥ वहिर्निरृतिवायव्येशानकेसरेषु क्रमाद्वेदांगानि स्मृतयो न्यायश्च सर्वशास्त्राणि पुराणानि च पूजयेत्॥ यत्रम
ध्ये पूजापटलोक्तविधानेनांगदेवताः पूजयेत्॥ उत्तरो ग्रंथः स्पष्टार्थः॥ श्रीराममंत्रमुद्धरति॥ अनंत इत्यादिना॥ अनंतः आकारः अग्न्यासनः रेफः स्थितः सेन्दुः विन्दुयु
तोऽनंतः रां इति भवति॥ रामाय स्वरूपं हृन्नमः॥ षडक्षरो मंत्र उद्धृतः॥ अक्षरन्यासस्थानान्याह॥ ब्रह्मरंध्र इत्यादिना॥ ध्यानमाह॥ कालांभोधरेति॥ वीरासनो दक्षिणोत्तरे

वीजेन मूर्तिं संकल्प्य वीजमुद्धियते यथा ७८ वियद्भृगुस्थमर्धीशविंदुमद्वीजमीरितं॥ केसरेषु चतुर्वेदांश्चतुर्दिक्षु समर्चयेत् ७९॥
विदिक्ष्वंगस्मृतिन्यायसर्वशास्त्राणि पूजयेत्॥ अर्चयेत्पत्रमध्येषु विधानेनांगदेवताः॥ ८०॥ वात्यैलोकेश्वरास्तेषां वज्राद्यस्त्रा
णि संयजेत्॥ एवं यो भजते देवं साक्षाद्वागीश्वरो भवेत्॥ ८१॥ वैल्वैः फलैः कृतो होमः श्रीकरः परिगीयते॥ कुंदपुष्पाणि जुहुयादि
द्वान्वाक्श्रियमव्ययां॥ ८२॥ मनुनानेन संजप्तं घृतं ब्राह्मीरसेश्रृतं॥ कवितामाहरेत्तं सामनर्गलविजृंभितां ८३ वचामनेन सं
जप्तां भक्षयेत्प्रातरन्वहं॥ सर्ववेदागमादीनां व्याख्याता जायते चिरात् ८४ मनोरस्य समो नास्ति ज्ञानैश्वर्यप्रदोपरः॥ अनंतोऽ
ग्न्यासनः सेन्दुर्वीजं रामाय हृन्मनुः॥ ८५॥ षडक्षरोयमादिष्टो भजतां काममदो मणिः॥ ब्रह्मा प्रोक्तो मुनिश्छन्दो गायत्रं देवता मनोः
॥ ८६॥ देशिकेन्द्रैः समाख्यातो रामो राक्षसमर्दनः॥ दीर्घभाजा स्ववीजेन कुर्याद्रंगानि षट्क्रमात्॥ ८७॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये हृन्नाभ्यंधु
षु पादयोः॥ षडक्षराणि विन्यस्येन्मंत्रस्य मनुवित्तमः ८८ कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधान
मपरं हस्तांबुजं जानुनि॥ सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतीं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे॥ ८९॥
वर्णलक्षं जपेन्मंत्रं तद्दशांशं सरोरुहैः॥ जुहुयादर्चिते वह्नौ ब्राह्मणान्भोजयेत्ततः॥ ९०॥ ११ उपरिवामपदं क्षिदध्यात्जानूपरि तद्धस्तं न्यसे
त्॥ मुद्रां ज्ञानमयीं॥ दक्षिणबाहुतर्जन्यंगुष्ठौ संयोज्य प्रसारितेतरांगुलीः॥ कृत्वा हृदयस्यान्दर्शयेत्॥ एषा ज्ञानमुद्रा॥ अपरं वामहस्तं तज्जानुनि॥ सीतां पार्श्वग
तां॥ राघवं पश्यंतीं पजेदिति योजना॥ उत्तरो ग्रंथः स्पष्टार्थः॥ श्री॥ श्री॥ श्री॥ श्री॥ ॥ ८ ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पूजयेद्वैष्णवे पीठे मूर्त्तिं मूलेन कल्पयेत्॥ श्रीसीतां येदिद्वांतेन सीतां पार्श्वगतां यजेत्॥९१॥ अग्रे पार्श्वद्वये शार्ङ्गशरानं मानितद्धहिः
॥हनूमंतं ससुग्रीवं भरतं सविभीषणं॥९२॥ लक्ष्मणांगदशत्रुघ्नान्जांबवंतं दलेष्विमान्॥ वाचयंतं हनूमंतमग्रतो धृतपुस्तकं॥९३॥
यजेद्भरतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ॥ धृतातपत्रं हस्ताभ्यां लक्ष्मणं पश्चिमे यजेत्॥९४॥ सृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं। अशोकं
धर्मपालांश्च सुमंत्रं च दलाग्रतः॥९५॥ सर्वाभरणसंपन्नान्लोकेशानर्चयेत्ततः॥ तदस्त्राणि ततो वाह्ये वज्रादीनि प्रपूजयेत्॥९६
एवं पूजादिभिः सिद्धे मंत्रे कर्माणि साधयेत्॥ जातीप्रसूनैर्जुहुयाच्चंदनांभःसमुक्षितैः॥९७॥ राजवश्याय कमलैर्धनधान्या
दिसंपदे॥ नीलोत्पलानां होमेन वशयेदखिलं जगत्॥९८॥ बिल्वप्रमाणैर्जुहुयादिंदिराबाप्तये नरः॥ दूर्वाहोमेन दीर्घायुर्भवेन्मं
त्री निरामयः॥९९॥ रक्तोत्पलहुतान्मंत्री धनमाप्नोति वांछितं॥ मेधाकामेन होतव्यं पालाशकुसुमैर्नवैः॥१०० तज्जप्तं भः प्रपिवेत्क
विर्भवति वत्सरात्॥ तन्मंत्रितान्नं भुंजीत महदारोग्यमाप्नुयात्॥१०१॥ तारं मध्ये विलिखतु मनुं षट्सु कोणेषु संधिष्वंगं मायां स्मरमपि लि
खेत्कोणगंडेषु पश्चात्॥१०२॥ किंजल्केषु स्वरगणमथो पत्रमध्येषु माला॥ मंत्रोत्थार्णान्गृहमुखमितानष्टमे पंचवर्णान्॥१०३॥
दशाक्षरेण संवेष्ट्य कादिवर्णैश्च भूपुरे॥ दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः॥१०४॥ नमो भगवते भूयाच्चतुर्थ्या रघु
नंदनं॥ रक्षोघ्नविषदायांते मधुरादि समीरयेत्॥१०५॥ प्रसन्नवदनायेति पश्चादमिततेजसे॥ बलाय पश्चाद्रामाय विष्णवे
तदनंतरं॥१०६॥ प्रणवादिनमोंतोयं मालामनुरुदीरितः॥ जानकीवल्लभायाय भवेत्यावकवल्लभा॥१०७॥ कुमादिरेष
कथितो राममंत्रो दशाक्षरः॥ जपादिसाधितं यंत्रं स्वर्णपट्टादिकल्पितम्॥१०८॥ बाहुना विधृतं दद्याद्विजयश्रीपराक्र
॥ मान्॥ गदितं राममंत्रस्य विधानं सुरपूजितम्॥१०९॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यन्त्रमाह। तारमध्य इति संपुटितम् अग्रे मंडलद्वयं लिखित्वा मध्ये प्रणवं षट्कोणेषु मन्त्रवर्णान्। तत्र संधिषु अंगमंत्रान्। कोणाग्रयोः प्रत्येकं हृल्लेखाबीजं कामबीजं
च लिखेत्। तदुपरि अष्टदलं पद्मं लिखित्वा तत्केसरेषु प्रत्येकं युगस्वरान् पत्रमध्येषु मालामंत्रवर्णान्। गुहमुखगणितान् षट्संख्याकान् प्रत्येकं लिखेत्॥
अष्टमे दले पंच वर्णान्। तदुपरि दशाक्षरमंत्रेण वेष्टयित्वा। तदुपरि ककारादिवर्णैः। पश्चाद्भूपुरेण तत्कोणेषु दिक्षु वराहबीजं विदिक्षु नारसिंहं॥ एतद्यन्त्रं

तारं नमो भगवते वराहपदमीरयेत्॥ रूपाय भूर्भुवः स्वः स्यात्पतये तदनंतरं ११० भूपतित्वं मे पदांते देह्यंते च ददापय वह्निजा
यावधिर्मन्त्रः स्यात्त्रयस्त्रिंशदक्षरः॥१११॥ भार्गवो मुनिराख्यातश्छंदोनुष्टुबुदाहृतं॥ देवताद्विराहोस्य मंत्रस्य कथितो बुधैः
११२ एकदंष्ट्राय हृदयं व्योमोल्काय शिरः स्मृतं॥ शिखा तेजोधिपतये विश्वरूपाय वर्म च ११३॥ महादंष्ट्राय अस्त्रं स्यात्पंचांग
मिति कल्पयेत्। आपादं जानुदेशाद्धूरकनकनिभं नाभिदेशादधस्तान्मुक्ताभं कंठदेशात्तरुणरविनिभं मस्तकान्नीलभासं॥
ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाख्यां शक्तिं दानाभये च क्षितिधरणलसद्दंष्ट्रमाद्यं वराहं॥११५॥ लक्षमेकं जपेन्मं
त्रं मधुरात्तैः सरोरुहैः॥ जुहुयात्तद्दशांशेन पीठे विष्णोः प्रपूजयेत् ११६ मूर्तिं मूलेन संकल्प्य वक्ष्यमाणविधानतः॥ पूर्वादिषु
चतुर्दिक्षु हृदाद्यंगानि पूजयेत् ११७ अस्त्रं कोणेषु धथ्रो ईंचक्राद्यस्त्राणि तद्बहिः चक्रं शंखमसिं खेटं गदां शक्तिं वराभ
ये ११८ संपूज्य वात्यैलोकेशान्वहिरस्त्राणि संयजेत्॥ ध्यानादेवो धनं दद्यादन्नपाद्याद्वसुंधराम् ११९॥ ((धारयतः श्रो

त्र फलसिद्धिः। मालामंत्रमुद्धरति। तारं नमो भगवते निसर्गतः स्पष्ट एव॥ अंगमंत्रानाह॥ दंष्ट्र इति॰ अन्यत्स्पष्टम्। मंत्रांतरमुद्धरति। तारं नम इत्यादिना। मंत्रोद्धा
रः स्पष्टः। चुल्ली पावकस्थाने आरवारेषु भौमवारेषु॥ यंत्रमुद्धरति। मध्ये बीजमित्यादिना। आदौ षट्कोणं लिखित्वा तन्मध्ये च प्रणवं तन्मध्ये च वराहबी
जं लिखित्वा षट्कोणेषु मंत्रवर्णान् तत्संधिषु षडंगानि बहिश्चतुः पत्रं पद्मं तत्केसरेषु नारायणाष्टवर्णान् द्वंद्वशः प्रविलिख्य पत्रेषु प्रत्येकं मंत्रव॥ ॥

शा॰ति॰ टी॰गू॰ ७१

र्णान् अष्टावष्टावालिख्य ॥ अवशिष्टं चतुर्थे लिखेत् ॥ तदुपरि वसुदलकमलेके सरेष्वानेषु द्वौ द्वौ स्वरौ वावेष्टय पत्रेषु प्रत्येकं मन्त्रस्य चतुरो मन्त्रवर्णान् । अन्त्यमन्त्य

प्रयच्छेज्जपपूजाद्यैर्धनधान्यमहाश्रियः । रवौ सिंहगते ऽभूम्यां शुक्लपक्षे सितां शिलां १२० पंचगव्येषु निःक्षिप्य स्पृष्ट्वा तामयुतं
जपेत् । उत्तराभिमुखो भूत्वा तां शिलां निखनेद्भुवि १२१ ॥ शत्रुचौरमहाभूतैः कृतां बाधां प्रणाशयेत् ॥ भानूदये भौमवारे साध्यक्षे
त्रात्समाहरेत् १२२ मृत्तिकां संजपन्मंत्रं तां पुनर्विभजेत्त्रिधा ॥ चूल्यामेकां शमालिप्य याकपात्रे तथापरं ॥१२३॥ गोदुग्धे परमा
लोड्य शोधितां स्तंडुलान् क्षिपेत् । संस्कृते ऽग्नौ पचेत्सम्यक् चरुं मंत्री जपन्मनुं १२४ ॥ अवतार्य चरुं पश्चादग्नौ देवं यथाविधि ।
धूपदीपादिकैरिष्ट्वा पुनराज्यप्लुतं चरुं १२५ जुहुयाद्दीपिते वह्नौ धावदष्टोत्तरं शतं ॥ एवं सप्तसु वारेषु जुहुयात्क्षेत्रसिद्धये ॥
१२६ अतः कालेभृगोर्वारे मृदं साध्यमहीतलात् । आदाय हविरापाद्य पूर्ववज्जुहुयात्सुधीः १२७ विरोधी न स्पृशति क्षेत्रे सह
चौराद्युपद्रवैः ॥ राजवृक्षसमुत्थाभिः समिद्भिर्मंत्रनामुना ॥१२८॥ निःसहस्रं प्रजुहुयात्तस्य स्युः सर्वसंपदः ॥ शालिभिर्जुहु
यान्मंत्री नित्यमष्टोत्तरं शतं १२९ समृद्धैर्धान्यसंघातैः शोभते तस्य मंदिरं ॥ तावत्सन्ध्येन जुहुयान्मंडलात्स्वर्णमाप्नुयात् १३०
लाजैः कन्यामवाप्नोति मध्वक्तैर्निजवांछितं ॥ मधुरत्रयसंयुक्तैर्जुहुयाद्गुल्मलैः शुभैः ॥१३१॥ महतीं श्रियमाप्नोति मंडलात्पूर्व
संख्यया ॥ मध्ये बीजं सतारं दहनपुरयुगे चक्रवर्णान्स्वरैः द्विष्ठालिख्यांगानि संधिष्वथ मकरसाद्दले खेषु नंद्ये सरेषु ॥ अष्टा
र्णान्यत्र मध्ये लिखतु वसुमितान्मंत्रवर्णाश्चतुर्थे शिष्टं पत्रेषु परस्ताद्वसुदलकमलेके सरस्थस्वराढ्ये ॥ मंत्रार्णान्वेदसंख्या
न्दलमनुविलिखेदन्त्यमंत्ये यथावत्त्येकिंजल्कैः कादिवर्णैर्विकसितकमले षोडशारे यथावत् ॥ ० ॥ ॥

दले ॥ वान्त्ये षोडशदले ॥ कादिसांतद्वात्रिंशद्वर्णान्लिखेत् ॥ तदुपरि प्रणवभूवराहबीजैर्वेष्टयेत् ॥ कथंभूतैः । साध्यनामारीमध्यगैः पश्चान्मंत्र ॥

राम॰ ७१

वर्णैर्वेष्टितं साध्यनामार्णैर्वहिर्वृतं। तद्बहिर्भूबिंबेन साध्यनामयुतस्मा बीजकोणेन वेष्टितं॥ बीजेन साध्यनामयुतस्मा बीजकोणेन वेष्टितं। तदुपरि अष्टदलेषु भूबी
जसहितं वाराहबीजं लिखेत्॥ वाराहबीजमुद्धरति॥ सार्घीशा इति॥ अर्घीशा ऊकारः॥ विंदुसहितं गगनं हकारः॥ ततो हूं इति सिद्धं भवति॥ एतद्यंत्रं उक्तप्रकारे

मंत्रार्णान्युग्मशस्तच्चरमदलगतं शिष्टवर्णं लिखित्वा तारस्मा कोलबीजैस्तदनुपरिवृतं साध्यनामार्णमध्ये॥ १३२॥ दर्भितैः सा
ध्यनामार्णैर्मंत्रवर्णैर्वृतं बहिः॥ भूबिंबेनास्त्रकोणेषु भूबीजं साध्यसंयुतं १३३॥ अष्टमूलेषु वाराहं भूबीजसहितं लिखेत्॥ सा
र्घीशं विंदुगगनं बीजं वाराहमीरितं॥१३४॥ रोचनागुरुकर्पूररक्ताक्षाकुंकुमचंदनैः॥ गोमयांभसि संपिष्टैर्लिखेद्यंत्रं शुभे दिने
॥१३५॥ लेखिन्या हेममय्या च सर्वकामप्रसिद्धये॥ स्वर्णपट्टे लिखेद्यंत्रं श्रीराज्यसमवाप्तये॥१३६॥ ग्रामसिद्ध्यै च रजते ताम्र
पट्टे धनाप्तये॥ भूर्यपत्रे निजेच्छाप्त्यै क्षौमे भूसिद्धये लिखेत् १३७ जपपूजादिभिः सिद्धं यंत्रं कुर्यान्निजेप्सितं। ग्रामपत्तनराष्ट्रे
षु यंत्रमेतत्सुसाधितं॥१३८॥ निखनेच्छुभवारादौ सांगं दिक्षु समर्चयेत्। क्षुद्रापमृत्युचौरादिभूतव्यालमहाभयैः॥ १३९ ॥
नशक्यते त्वरं दृष्टुं तं देशं देवताबलात्॥ हृदयं भगवत्यैस्याद्धरिण्यै तदनंतरं॥ १४०॥ धरणं पतधरे हृद्दंद्विठांतोयं प्रवादितः
॥ एकोनविंशत्यर्णाढ्यं धराहृदयमीरितं १४१॥ वराहोस्य मुनिः प्रोक्तश्छंदो निवृदुदाहृतं॥ देवता सर्वभूतानां प्रकृतिर्वसुधाप
ता १४२ हृदयं त्रिभिर्विख्यातं चतुर्भिः शिर ईरितं॥ त्रिभिः शिखा समुद्दिष्टा पंचभिः कवचं मतं॥१४३॥ द्वाभ्यां नेत्रं समाख्यातं
द्वाभ्यामस्त्रं प्रजनं भवेत्॥ मंत्रवर्णैः षडंगानि कुर्याद्देवं विधानवित् ॥१४४॥

णसाधितमुक्तफलदं। स्पष्टार्थमपरं॥ मंत्रांतरमुद्धरति॥ हृदयमित्यादिना॥ उत्तरोष्ठ्यः स्पष्टः। भूवह्निजलमारुतान् वर्णान् लकार। रकार। वकार। यकार
न्। तत्कलाः भूरादिकलाः॥ निवृत्याद्याः स्पष्टार्थमपरम्॥ इति गूढार्थदीपिकायां पञ्चदशः पटलः ॥ १५ ॥ ०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वर्णैर्वि दर्भितसाध्यनामार्णैर्वहिर्वृतं। तद्बहिर्भूविंबेन साध्यनामयुतस्मावीजकोणेन वेष्टनं॥ वीजेन साध्यनामयुतस्मावीजकोणेन वेष्टितं। तदुपरि अष्टदलेषु भूवीजसहितं वाराहवीजं लिखेत्॥ वाराहवीजमुद्धरति॥ सार्घीशा इति॥ अर्घीश ऊकारः॥ विंदुसहितं गगनं हकारः॥ ततो हूं इति सिद्धं भवति॥ एतद्यंत्रे उक्तप्रकारे

मंत्रार्णान्युग्मशस्तच्चरमदलगतं शिष्टवर्णं लिखित्वा तारक्ष्माकोलवीजैस्तदनुपरिवृतं साध्यनामार्णमध्ये॥ १३२ ॥ दर्भितैः साध्यनामार्णैर्मंत्रवर्णैर्वृतं बहिः॥ भूविंबेनास्यकोणेषु भूवीजं साध्यसंयुतं १३३॥ अष्टशूलेषु वाराहं भूवीजसहितं लिखेत्॥ सार्घीशविंदुगगनं वीजं वाराहमीरितं। १३४॥ रोचनागुरुकर्पूरलाक्षाकुंकुमचंदनैः॥ गोमयं भस्मसिंदूरैर्लिखेद्यंत्रं शुभे दिने ॥१३५॥ लेखिन्या हेममय्या च सर्वकामप्रसिद्धये॥ स्वर्णपट्टे लिखेद्यंत्रं श्रीराज्यसमवाप्तये॥१३६॥ ग्रामसिद्ध्यै च रजते ताम्रपट्टे धनाप्तये॥ भूर्यपत्रे निजेच्छया त्रैक्षौमे भूसिद्धये लिखेत् १३७ जपपूजादिभिः सिद्धं यंत्रं कुर्यान्निजेप्सितं। ग्रामपत्तनराष्ट्रेषु यंत्रमेतत्तु साधितं॥१३८॥ निखनेच्छुभवारादौ सांगं दिक्षु समर्चयेत्। क्षुद्रापमृत्युचौरादिभूतव्यालमहाभयैः॥ १३९ ॥ न शक्यते परं द्रष्टुं तं देशं देवताबलात्॥ हृदयं भगवत्यैस्याद्धरिण्यै तदनंतरं॥ १४० ॥ धरणं पतधरे ह्रं द्वं ढिंठांतो यं अभवादिकः ॥एकोनविंशत्यर्णाढ्यं धराहृदयमीरितं १४१॥ वराहोस्यमुनिः प्रोक्तश्छंदो निचृदुदाहृतं॥ देवता सर्वभूतानां प्रकृतिर्वसुधा पता १४२ हृदयं त्रिभिर्विख्यातं चतुर्भिः शिर ईरितं॥ त्रिभिः शिखा समुद्दिष्टा पंचभिः कवचं मतं॥ १४३॥ द्वाभ्यां नेत्रं समाख्यातं द्वाभ्यामस्त्रं प्रजनं भवेत्॥ मंत्रवर्णैः षडंगानि कुर्यादेवं विधानवित् ॥ १४४ ॥

णसाधितमुक्तफलदं। स्पष्टार्थमपरं॥ मंत्रांतरमुद्धरति॥ हृदयमित्यादिना ॥ उत्तरोर्द्धार्थः स्पष्टः। भूवह्निजलमारुतान् वर्णान् लकारा रकार। वकार। यकार। तत्कलाः भूरादिकलाः॥ निवृत्याद्याः स्पष्टार्थमपरम्॥ इति गूढार्थदीपिकायां पञ्चदशः पटलः ॥ १५ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वाराहमंत्रकथनानंतरं नृसिंहमंत्रं वक्तुमारभते । अथेत्यादिना मंत्रोद्धारः स्पष्टः ॥ अक्षरन्यासमाह ॥ ललाटेत्यादिना ॥ अष्टपत्रपद्मं विरच्य । तन्मध्ये नृसिं

श्यामां विचित्रांशुकरत्नभूषणां पद्मासनां तुंगपयोधरानतां । इंदीवरेक्षां नवशालिमंजरीं शुकं दधानां वसुधां भजामहे ॥१४५॥ लक्षमेनं जपेन्मंत्री धराहृदयमादरात् । ससर्पिषा पायसेन जुहुयात्तद्दशांशतः १४६ तां विष्णोः पूजयेत्पीठे वक्ष्यमाण विधानतः । अंगानि पूजयेदादौ भूवह्निजलमारुतान् । १४७ दिक्पत्रेषु समभ्यर्च्य कोणपत्रेषु तत्कलाः ॥ आशापालाः पुनः पूज्या वज्राद्यस्त्रसमन्विताः १४८ एवं सिद्धमनुर्मंत्री साधयेत्स्वमनोरथान् ॥ मधुत्रितयसंसिक्तैर्जुहुयादरुणोत्पलैः ॥ सहस्रं भूसमृद्धिः स्यात्तथा नीलोत्पलैर्भवेत् ॥ प्रियंगुपुष्पैर्मध्वक्तैर्धनधान्यमहाश्रियः ।१५०। मंजरीं शालिसंभूतां मधुरत्रयप्लोलितां ॥ जुहुयात्साधिते वह्नौ मंडलात्स्याद्धरापतिः ।१५१। शुक्रवारे दिनमुखे गृहीत्वा साध्यभूमृदं ॥ तामंमसि विनिःक्षिप्य शोधिते न चरुं पचेत् ।।१५२।। पयोघृताभ्यां सहितं जुहुयात्तं हुताशने ॥ षण्मासं शुक्रवारेषु हुत्वैवं प्राप्नुयाद्धराम् ॥ ॥१५३॥ धरामेवं जपेन्मंत्री पशुरत्नधनादिभिः ॥ धरायावल्लभः स स्यान्नात्र कार्या विचारणा ॥ १५४॥ इति श्री शारदातिलके पंचदशः पटलः १५ ॥ अथाभिधास्ये विधिवन्नारसिंहं महामनुं ॥ उग्रं वीरं वदेत्पूर्वं महाविष्णुमनंतरं ॥१॥ ज्वलंतं पदमाभाष्य सर्वतोमुखमीरयेत् ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः ॥ २॥ नमाम्यहमयं प्रोक्तो मंत्रराजः सुरद्रुमः ॥ ऋषिर्ब्रह्मा समुद्दिष्टश्छंदोऽनुष्टुबुदाहृतं ॥३॥ देवता नरसिंहोऽस्य सुरासुरनमस्कृतः ॥ चतुर्भिर्हृदयं पंचवर्णैः शिरस्तावद्भिरक्षरैः ॥४॥

१ हवीजं तन्मध्ये साध्यनाम । पत्रेषु षट्सु मंत्राक्षराणि विभज्य प्रत्येकं चत्वारि चत्वारि लिखेत् ॥ वहिः पंचाशदक्षरैः वेष्टयेत् ॥ तद्वाह्ये नृसिंहबीजविलसत्कोणभूपुरद्वयं एतदुक्तं फलदम् । अस्मिन्नर्थे बीजमित्यादिग्रंथो योजनीयः ॥ ० ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिखाष्टभिः समाख्याताषड्भिः कवचमीरितं ॥ तावद्भिर्नयनं प्रोक्तमस्त्रं स्यात्करणाक्षरैः ५ शिरोललाटनेत्रेषुमुखबाहूंघ्रिसंधिषु
साग्रेषु कुक्षौ हृदये गले पार्श्वद्वये पुनः ॥ ६ ॥ अपरांगे ककुदि च न्यसेद्वर्णान्यथाक्रमं ॥ माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षो
गणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणं ॥ बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं
वंदे नृसिंहं विभुं ८ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयाद्विधिवत्पूजितेनले ९ एवं कृते भवेन्मंत्री सिद्धमंत्रः
प्रतापवान् ॥ पूजा प्रागीरिते पीठे मूर्तिं मूलेन कल्पयेत् ॥ १० ॥ पूजयेद्विधिवत्तस्यां दैत्यशत्रुमनन्यधीः ॥ अंगान्यादौ समाराध्य दिदि
गदलेषु पजेदथ ११ ॥ पक्षींद्रं शंकरं शेषमब्जयोनिं यथाक्रमं ॥ श्रियं ह्रियं धृतिं पुष्टिंअग्न्यादिषु पजेत्पुनः ॥१२॥ लोकपालाः सम
भ्यर्च्यास्तदस्त्राणि ततः परं ॥ इत्थं जपादिभिः सिद्धमनौ काम्यानि साधयेत् १३ उद्यत्कोटिरविप्रभं नरहरिं कोटीरहारोज्ज्वलं दं
ष्ट्राभीममुखेल्लसन्नखमुखैर्दीर्घैरनेकैर्भुजैः ॥ निर्भिन्नासुरनाथमग्निशशभृत्सूर्यात्मनेत्रत्रयं विद्युत्तुंजजटाकलापभयदं वह्निं
त्वमंतं भजे १४ सौम्ये सौम्यं स्मरेत्कार्ये क्रूरे क्रूरमिमं भजेत् ॥ श्रीपुष्पैर्जुहुयान्मंत्री विल्वकाष्ठेधिते नले १५ सहस्रं श्रियमाप्नोति पत्रैर्वा
विल्वसंभवैः ॥ प्रसूनैर्वा फलैस्तद्वद्दूर्वाहोमाद्रोगतां १६ मंत्रजप्तां वचां श्वेतां भक्षयेत्प्रातरन्वहं ॥ वाक्सिद्धिं लभते मंत्री वाचस्पति
रिवापरः १७ सलिले देवमभ्यर्च्य गंधपुष्पादिभिः शुभैः ॥ दूर्वाभिस्तच्च जुहुयान्नित्यमष्टोत्तरशतं १८ उपसर्गा विनश्यंति क्षुद्रभूतज्वरा
दिभिः ॥ दुःस्वप्ने निशि संजाते स्नात्वा मंत्रमिमं जपेत् ॥ १९ ॥ अनिद्रो मंत्रवित्पश्चात्सुस्वप्नस्तस्य जायते ॥ व्याघ्रचौरमृगादिभ्यो
महारण्ये भयाकुलं ॥ २० ॥ रक्षेन्नरं पंजरोऽयं भयेष्वन्येषु मंत्रिणं ॥ अनेन मंत्रितं भस्म विषग्रहमहाभयान् ॥ २१ ॥ ॥
॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा·ति·
टी·शू·
७३

कृत्वानवपदानित्यादिस्पष्टार्थः॥यंत्रांतरमाह॥वीजांगमित्यादिना॥अयमर्थः॥प्राक्प्रत्यक्नवरेखालिखित्वा॥कृतेनांतरतः पंचलिखेत्॥एवंकृतेद्वात्रिं

नाशयेदचिराद्देवंमंत्रस्यास्यप्रभावतः घोराभिचारेसोन्मादेमहोत्पातेमहाभये२२ जपेन्मंत्रंस्मरन्देवंदुःस्वान्मुक्तोभवेन्नरः॥

सिंहरूपंमहाभीमंमहादंष्ट्रादिभीषणं॥२३॥स्मृत्वात्मानरिपुंपश्चाद्ध्यायेन्मृगशिशुंरिपुं॥गृहीत्वागलदेशेतंपुनर्दंष्ट्रास्सि

पेद्रुतं॥२४॥पुत्रमित्रकलत्राद्यैरुच्चाटोजायतेरिपोः॥पूर्वंमृत्युपदेसाध्यनामकृत्वास्वयंहरिः॥२५॥निशितैर्नखदंष्ट्राद्यैःखं

ड्यमानंरिपुंस्मरन्॥नित्यमष्टोत्तरशतंजपन्मंत्रमतंद्रितः॥२६॥जायतेमंडलाद्र्वाक्शत्रुर्वैवस्वतप्रियः॥यंत्रंकुर्वीतविधि

वच्छत्रुसेनानिवारणे २७ विभीतकाष्ठैर्ज्वलितेपावकेरिपुमर्द्दनं॥विचिंत्यदेवंनृहरिंसंपूज्यकुसुमादिभिः॥ २८ ॥ समूलचू

लैर्जुहुयाच्छरैर्दशशतंपृथक्॥रिपुंस्वादन्निवजयेन्निर्भिंदन्निवतान्क्षिपेत्॥२९॥हुत्वासप्तदिनंसेनामिष्टांमंत्रीमहीपतेः॥प्र

स्थापयेच्छुभेलग्नेपरराष्ट्रजयेच्छया ३० तस्याःपुरस्तान्नृहरिंनिघ्नंतंरिपुमंडलं॥ध्यात्वाप्रयोगंकुर्वीतयावदायातिसापुनः३१

विजित्यनिखिलान्शत्रून्सेहवीरश्रियासुखं॥आगत्यविजयीराजाग्र्यामक्षेत्रधनादिभिः ३२ प्रीणयेन्मंत्रिणंसम्यक्विभवैः

प्रीतमानसः मंत्रीयदिनसंतुष्येदनर्थःस्यान्महीपतेः ३३ वीजंसाध्यसमन्वितंप्रविलिखेन्मध्येषट्पत्रेष्वथोमंत्रार्णान्स्तुति

शोविभज्यविलिखेत्त्रिष्पावहिर्वेष्टयेत् ३४॥वास्येकोणगवीजवद्भवसुधागेहद्वयेनावृतं॥यंत्रंक्षुद्रविषग्रहामयरिपुप्रध्वंसनं

श्रीप्रदं ३४ कृत्वानवपदात्मानंमंडलंयंत्रसंयुतं॥अस्मिन्संस्थापयेन्मंत्रीकलशान्नवशोभनान् ३५ कषायतोयसंपूर्णान्

वस्त्ररत्नादिसंयुतान्॥मध्येसंपूजयेद्देवंनृसिंहंशांतविग्रहं॥३६॥तार्क्ष्यादीन्पूजयेन्मंत्रीपूर्वादिषुयथाक्रमं॥इतिसंसाधितै

स्तोयैरभिषिंचेत्त्रिपंनरम॥३७॥

शान्त्यदानिजायंते॥तत्ररेखाग्राणिप्राक्पंचफणाकारिणिकारयेत्॥तस्यशेषस्यउदरगतद्वात्रिंशत्पदेषुऐशान्यादिपथ। नृसिंहस्याकालिकावलिवत्

राम:
७३

पंचफरोषुनृसिंहवीजं॥तत्रपश्चिमरेखाग्राणिपञ्चाकारेणादीर्घंकृत्वातत्रसाध्यनामलिखेत्॥एतद्यंत्रं साधितशेषाज्येनसिक्तंप्रोक्ताफलदंभ्राग्रस्मिन्नर्थेवीजं॥
कमित्यादिग्रंथोयोजनीयः॥नृसिंहवीजमुद्धरति॥क्षकारेति॥मनुस्वरःऔकारः॥ग्रधरश्चरेफसहितः॥क्ष्रौं इतिभवति॥मंत्रांतरमाह॥वीजेनामइत्यादिनामंत्र
अभिचारग्रहोन्मादाविनश्यंत्यरिभिःसह॥अभिषिक्तस्तदाविप्रान्भोजयेद्देवताधिया॥३८॥पयावन्तूजपेत्पश्चात्शतत्यागरु
मवंचपन्॥राजाविजयमाप्नोतिप्रद्धेषुविधिनामुना ३९ वीजांकंफणापंचकंप्रविलिखेत्शेषस्यभोगेपुनर्द्वात्रिंशत्पदसंयु
तेपरिलिखेन्मंत्राक्षराणिक्रमात॥पुष्कैनामजपादिसाधितमिदंहोमेनसंपातितंभूतापस्मृतिदुःखरोगशमनंयंत्रंरिपुध्वंस
नम् ४० क्षकारोवह्निमारूढोमनुस्वरसमन्वितः॥विंदुनादलसन्मूर्द्धावीजंनरहरेर्मतं॥४१॥वीजंनमोभगवतेनरसिंहाय
तत्परं स्याज्ज्वालामालिनेपश्चाद्दीप्तदंष्ट्रापतत्परं॥४२॥अग्निनेत्रायसर्वादिरक्षोघ्नायपदंवदेत्॥सर्वभूतविनाशांतेनका
रोदीर्घवान्मरुत्॥४३॥सर्वज्वरविनाशांतेनायपाणौदहयुग्मकं॥पंचहृद्यंरक्षयुगंहुंफट्स्वाहाध्रुवादिकः॥४४॥सप्तषष्ट्यास
रैःप्रोक्तोज्वालामालीमहामनुः॥ब्रह्माऋषिरतिच्छन्दोज्वालामालीचदेवता ४५॥हृच्चयोदशभिःप्रोक्तंशिरोदशभिरीरितं॥
शिखैकादशभिःप्रोक्तावर्माष्टादशभिर्मतं ४६ वर्णैर्द्दादशभिर्नेत्रमस्त्रंस्यात्करणाक्षरैः॥एवमंगानिविन्यस्यचिंतयेन्मंत्रदेवतां
४७ उज्ज्वलत्प्रलयानलाभमयुग्मनेत्रमनारतंभासुरंशिखिनःशिखाभिरुदग्रदंष्ट्रमुखांबुजे॥रक्षसांभयदंविकीर्णजटाकला
पविभीषणं शंखचक्रकृपाणखेटकधारिणंनृहरिंभजे॥४८॥लक्षमेकंजपेन्मंत्रंतद्दशांशंसमाहितः॥कपिलाज्येनजुहुयात्समि
द्धेहव्यवाहने ४९ प्रागुक्ते पूजयेत्पीठे देवंप्रागुक्तवर्त्मना कुर्वीतमंत्रराजोक्तान्प्रयोगान्मनुनामुना ५० विशेषान्क्षुद्रभूतानांनाश
नोयमनुःस्मृतः॥पाशःशक्तिर्नरहरिरंकुशोवर्मफट्मनुः॥५१॥ ९९ लुस्सपुः॥एतत्स्यपंक्षमंत्रांतरमाह॥पाशशक्तीति॥पाशशक्तिनृसिंहांकुशयाजानिमो

मोंहूंफट्स्वाहा॥आंह्रींक्ष्रौंक्रौंहूंफट्स्वाहाइतिमन्त्रः

शा॰ ति॰ टी॰ यू॰ ७४।

॥ध्यानमाह॥ कोपादिति। दारणं विदारणं। तद्यथा। सव्येतरपाण्योरंगुलिचतुष्टयं किंचिन्नामिकाग्रं कृत्वा अंगुष्ठद्वयमूर्द्धं कृत्वा निजनाभेरधोदेशे दर्शयेत्।
षडक्षरो नरहरेः कथितः सर्वकामदः॥ ऋषिर्ब्रह्मास्य संदिष्टः पंक्तिश्छंद उदाहृतं ५२ देवता नरसिंहोस्य षड्भिर्जैरंगकल्पना ॥
कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येंद्रगात्रं॥ शंखं चक्रासिपाशांकु
शकुलिशगदादारणान्युद्वहंतं भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहं ॥५४॥ ऋतुलक्षं जपेदेनं घृतेन जुहुयात्त
तः॥ तत्सहस्रं समिद्धेऽग्नौ तोषयेद्द्विजपुंगवान्॥५५॥ यजेत्प्रागीरिते पीठे मूर्तिं मूलेन कल्पयेत्॥ अंगावृतेर्बहिश्चक्रं शंखं पाशांकुशौ
पुनः ५६ वज्रं कौमोदकीं खड्गं खेटं पत्रेषु पूजयेत्॥ इंद्राद्यांस्तत्तदस्त्राणि पूजयेद्बाह्यतः सुधीः ५७ एवं कृत्वा पुरश्चर्यां मंत्रेणानेन
न मंत्रवित्॥ प्रयोगान्कल्पनिर्दिष्टान्कुर्यात्स्वस्य परस्य वा ५८ रक्तोत्पलैस्त्रिमध्वक्तैः सहस्रं जुहुयान्नवैः नित्यं मासाद्भवेदिष्टं
वत्सराद्धनधान्यवान्॥५९॥ रक्तैस्त्रिमधुरोपेतैः पद्मैर्भानुसहस्रकं॥ जुहुयान्महतीं लक्ष्मीमायुर्वश्यमवाप्नुयात्। ६०। लाजांस्त्रि
मधुरोपेतान्प्रातःकालेषु जुह्वतः। कन्यासिद्धिर्भवेत्पक्षात्कन्यायाः सद्वरो भवेत्॥ ६१॥ दूर्वाः पयोघृताभ्यक्ताश्चाष्टोत्तरशतं सुधीः
अन्वहं जुहुयात्सम्यक् दीर्घमायुरवाप्नुयात्॥ ६२॥ तस्य रोगाः प्रणश्यंति कृत्याद्रोहादिभिः सह॥ सपंचगव्यां जुहुयादपामार्गस्य मं
जरीं ६३॥ नित्यं सहस्रमानेन सप्ताहं विजितेंद्रियः॥ होमोऽयं सर्वथा भूतकृत्यारोगान्प्रणाशयेत्। ६४। सतिलैराज्यपामार्गहविरा
ज्यैर्यथाक्रमं। द्विसहस्रं प्रजुहुयात्क्षुद्ररोगग्रहाजपेत् ६५ पयोऽन्नैरमृताखंडैस्त्रिसहस्रं चतुर्दिनं। अनेन विहितो होमो भ्रमज्व
रविनाशनः ६६ नृसिंहशक्तिबीजे द्वे शूले तारान्ते लिखेत्। तत्र ग्रहार्थं संस्थाप्य जपेन्मंत्रं षडक्षरं ६७ ॥९ एषा दारणमुद्रा॥ नृसिंहेति।
त्रिशूलं लिखित्वा भूमौ प्रणवेन वेष्टयेत्॥ तत्र शूलकोष्ठद्वये एकस्मिन्नृसिंहबीजं॥ अपरस्मिन्शक्तिबीजं लिखेत्। अंगस्तत्रोपविश्य जपेत्। उत फलसिद्धिः ६७

रामः ७४

॥ आलिख्येति ॥ अष्टच्छदं पद्मं लिखित्वा तत्कर्णिकायां षट्कोणं विलिख्य तन्मध्ये शक्तिबीजं ससाध्यं । षट्कोणेषु नृसिंहषडक्षरमंत्रबीजानि आलिख्य किंजल्केषु ।
स्वरान् दलेषु मंत्रराजद्वात्रिंशद्वर्णान् चतुश्चतुरः क्रमाल्लिखेत् ॥ वाह्ये व्यंजनैर्वेष्टयेत् ॥ पश्चाच्चिंतामणिनृसिंहकोणलसिते अवलागारेण वेष्टयेत् ॥ एतद्यंत्रमुक्तफल
दं रक्षायां सुदर्शनमंत्रमुद्धरति ॥ तारः प्रणवः भृगुः सकारः वियद्धकारः ॥ तदाद्यं सकारः स एव वह्निदीर्घयुक्तः तत्स्वाहा इति भवति ॥ पावकः रेफः ॥ कवचं हुंकारः अस्त्रं फट्

आविश्य सद्यस्तं मुंचेद्ग्रहः क्रंदन् भयाकुलः ॥ आलिख्याग्निपुरद्वयं तदुदरे शक्तिं ससाध्यां लिखेत् ॥ षट्कोणेषु षडक्षराण्य
थ मनोः किंजल्कसंस्थान् स्वरान् ॥ पत्रेष्वष्टसु मंत्रराजविहितान् वर्णान् क्रमाद्द्वेदशः काद्यर्णैः पुनरावृतं क्षितिपुरे कोणेषु
चिंतामणिं ॥ ६९ ॥ नारसिंहमिदं यंत्रं लिखितं भूर्यपत्रके ॥ विधृतं शिरसा शीर्षरोगभूतज्वरान् हरेत् ॥ ७० ॥ बहुना किमिहोक्ते
न मंत्रैरेतैरुदीरितैः समो नास्ति मनुः कश्चिच्छान्त्युग्रहसाधनः ७१ तारो भृगुर्वियद्रूपस्तदाद्यं वह्निदीर्घयुक् ॥ पावकः कव
चास्त्रांतो मनुः सप्ताक्षरः स्मृतः ॥ ७२ ॥ अहिर्बुध्न्यो मुनिः प्रोक्तश्छंदोनुष्टुबुदाहृतं ॥ देवता मुनिभिः प्रोक्ता चक्ररूपी हरिः स्वयं ॥
। ७३ ॥ आचक्राय पदं हृदाख्यातं विचक्राय शिरः स्मृतं ॥ सुचक्राय शिखा प्रोक्ता धीचक्राय तनुच्छदं । ७४ ॥ संचक्राय स्मृतं नेत्रं ज्वालाच
क्राय तत्परं ॥ षडंगमंत्राः प्रत्येकं हृदि गंता जातिसंयुताः । ७५ ॥ ऐं ह्रीं चक्रेण वध्नामि नमश्चक्राय ठद्वयं ॥ मंत्रेणानेन कुर्वीत दिशां
प्रागादिवंधनं ७६ त्रैलोक्यं तेरक्षयुगं हुं फट् स्वाहा ह्यथवादिकः ॥ अग्निप्राकारमंत्रोयं रक्षायै पुनरात्मनः ७७ प्राकारं तेन कुर्वीत म
त्रेणामनुवितमः ॥ सितरक्तांजनप्रख्यं तारं मूर्द्धनि विन्यसेत् ७८ अन्यानग्निनिभान्वर्णान् भ्रुवोर्मध्ये मुखे हृदि ॥ गुह्ये जान्वपदद्वंद्वसंधि
षु क्रमशो न्यसेत् ॥

तेन ॥ ॐ सहस्रारहुं फट् ॥ सप्ताक्षरो मंत्रः ॥ षडंगमंत्रमुद्धरति ॥ आचक्रायेत्यादिना ॥ अयमर्थः ॥ आचक्राय स्वाहा ॥ हृदयाय नमः ॥ इ
त्यादिप्रकारेणान्यासः कर्तव्यः ॥ दिग्वंधनमंत्रमाह ॥ ऐं ह्रीमिति ॥ ठद्वयं स्वाहा ॥ अक्षरन्यासमाह ॥ सितरक्तानि पुरुनिर्मिताः ॥ गुग्गुलगव्येनेत्यादयः ॥ सर्वतोमुखि

शा·ति· ॥७९॥कल्पांतार्कप्रकाशंत्रिभुवनमखिलंतेजसापूरयंतंरक्ताक्षंपिंगकेशंरिपुकुलभयदंभीमदंष्ट्राट्टहासं॥चक्रंशंखंगदाब्जेपृ
टी·पू· थुतरमुशलंचापपाशांकुशान्स्वैर्बिभ्राणंदोर्भिराद्यंमनसिमुररिपुंभावयेच्चक्रसंज्ञम् ८०॥अर्कलक्षंजपेन्मंत्रंजुहुयात्तत्सहस्रकं
७५ तिलैःससर्षपैःपद्मैर्बिल्वैर्दुग्धोदनैःक्रमात्॥८१॥विष्णोःसंपूजयेत्पीठेमूर्तिमूलेनकल्पयेत्॥अंगानिपूर्ववमभ्यर्च्यचक्राद्यस्त्राणि
तद्बहिः॥८२॥शंखचक्रगदापद्ममुसलंसशरंधनुः॥पाशांकुशौदलाग्रेषुलक्ष्म्याद्याःपूजयेत्ततः॥लक्ष्मींसरस्वतींपश्चाद्रतिंप्रीतिंत
तःपरं॥कीर्तिंकांतिंतुष्टिपुष्टीसर्वाएताःस्मृताद्विशः॥८४॥पीतरक्तसितश्यामाइंद्राद्यस्त्राणितद्बहिः॥इतिसिद्धमनोमंत्रीप्रयोगान्क
र्तुमर्हति॥८५॥आत्मनोवापरार्थेवादृष्टादृष्टफलप्रदान्॥दूर्वाहोमोविधातव्योदीर्घमायुरभीप्सता॥८६॥श्रीकामोजुहुयात्पद्मैःपु
ष्पैराज्यपरिप्लुतैः॥मेधाकामेनहोतव्यंप्रसूनैर्ब्रह्मवृक्षजैः॥८७॥दिनत्रयंपयोजुहुतेगुलिकाःपुरुनिर्मिताः॥अष्टोत्तरसहस्रेणस
जपेन्निखिलापदः॥८८॥गव्येनाज्येनगोसिद्ध्यैजुहुयाद्दिवसत्रयं॥उदुंबरसमिद्धोमःपुत्रदायीभवेन्नृणां॥८९॥जलपात्रेसमं
चक्रंपश्यमूर्द्धनिचिंतयेत्॥समाहाज्ज्वरमूर्च्छार्तोमंडलान्मेतिमेतिसः॥९०॥अकारादिस्वरावीतंयांहियांहिपदावृतं॥सकारंचिं
तयेच्छत्रोर्मूर्द्धनुच्चाटनमावहेत्॥९१॥अनेनविधिनाशत्रुंमंडलान्मृत्युभाग्भवेत्॥शरच्चंद्रनिभंसार्णंसुधाधाराभिवर्षिणं॥९२॥
स्मरेन्मूर्द्धनियस्यासौसजीवेद्विगतामयः॥आत्मानंचक्रनाभिस्थंध्यात्वामंत्रममुंजपन्॥९३॥एकोपिरणभूमिस्थोजयेत्प्रत्यर्थि
नोबहून्॥अपामार्गस्यसमिधोजुहुयाद्युतावधि॥९४॥ज्वरभूतपिशाचारिपीडातस्यनजायते॥निर्गुंडीसर्जकनकाम्लेतकिं राम
शुकसंभवैः ॥९५॥ समिद्वरैःकृतोहोमःक्षुद्ररोगग्रहापहः॥अपामार्गस्यसमिधःसर्पिर्मध्वेश्वृतस्त्ववरुः ॥ ९६ ॥ ७५
॥

॥दक्षिणोत्तरमिति॥ अस्यायमर्थः॥ वक्ष्यमाणक्रमेण दक्षिणोत्तरतश्चक्रद्वयमालिखेत्। कथं षट्कोणं लिखित्वा॥ तन्मध्ये पीतवर्णेन पूरयेत्॥ कोणषट्कं रक्तव
र्णेन॥ कोणान्तरालं श्यामचूर्णेन पूरयेत्॥ उपरिस्थितवर्णेन नेमिं कुर्यात्॥ वह्निज्वालाभिरुपशोभितं कुहरं वात्ये कुर्यात्॥ एवं दक्षिणोत्तरतश्चक्रद्वयं कृत्वा रक्त
तोयेन संपूर्णकुंभं सौम्ये चक्रे उत्तरे चक्रे॥ तस्मिन्मंत्रदेवतामावाह्य यथावत्पूज्य च॥ दक्षिचक्रे वक्ष्यमाणाद्रव्यैर्वक्ष्यमाणक्रमेण जुहुयात्॥ हुतातिशेषं कुंभस्थे

आज्यमेतानि जुहुयाद्दशोत्तरशतं पृथक्॥ साधकाय पुनर्दद्याच्चरुं संपातसाधितं॥ ९७॥ अभिचारकृता दोहास्तस्य नश्यंति स
र्वथा॥ अपामार्गस्य समिधः पंचगव्यपरिप्लुताः॥ ९८॥ जुहुयादयुतं मंत्री निशासु बलिमाहरेत्। दध्योदनेन मधुना क्षुद्ररोगादि
शांतये॥ ९९॥ क्षीरवृक्षसमित्क्षीरहविराज्यैः पृथक्पृथक्॥ चतुःसहस्रं होतव्यं शांतिः स्यात्सर्वतोमुखी॥ १००॥ दक्षिणोत्तरगं
मंत्री चक्रयुग्मं समालिखेत्॥ षडरादि विलिखेन्मध्ये मंत्रवर्णान्षडास्त्रषु॥ १०१॥ मध्यं पीतं कोणषट्कं रक्तं श्याममनंतरं। नेमिं श्वे
तां लसद्वह्निशिखाभिरुपशोभितां १०२॥ पार्थिवं मंडलं वात्ये कुर्यादेवं यथाविधि॥ रक्ततोयेन संपूर्णं कुंभं सौम्ये प्रविन्यसेत्
॥ १०३॥ आवाह्य पूजयेत्तस्मिन्चक्रात्मानं जनार्दनं॥ दक्षिणे मंडले कुर्याद्धोमकर्मविधानवित् १०४ — क्रमात्सर्पिरपामा
र्गैस्तंडुलैः सर्षपैस्तिलैः॥ पायसैर्गव्यसर्पिर्भ्यां षड्विंशत्याधिकं शतं १०५॥ जुहुयादेधिते वह्नौ प्रतिद्रव्यं विधानवित् संपातयेत्कुं
भतोये पूजिते सौम्यमंडले १०६॥ ॥ पातयेत्॥ प्रक्षिपेत्॥ अस्याद्यपरिमिततंडुलैश्चरुं निष्पाद्य तद्द्वैनैकं पिंडं कृत्वा कुंभे निक्षिपेत्॥ तावन्मात्रमव
शेषयेत्॥ ततः स्नातं विशुद्धवस्त्राभरणाढ्यं साध्यमानीय दक्षिणे चक्रे संस्थाप्य मंत्री कुंभाग्निभ्यां तन्नीराज्य वमिति कुंभोयामाद्बहिः॥ राशिमंडलं कृत्वा साध्यस्याष्टम
राशिस्थाने कुंभं दक्षिणभागे वह्निं दापयेत्॥ तत्रांगो यथापूर्वं॥ पूर्वोक्तसंख्यया जुहुयात्॥ ततः पूर्वावशिष्टेन पात्रेण दशदिक्षु वक्ष्यमाणमंत्रेण बलिं हरेत्॥ बलिमं
॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सहदित्यादिना। हन्त्रभः। २त रत्स्यघ्नो एषवलिमंत्रः॥ ततो ब्राह्मणान्भोजयेत् गुरवे दक्षिणां दद्यात्॥ ततः फलं भवति॥ एवं होमविधिः॥ विधाय पंजरमितिश्च
यमत्र गूढः॥ ऊर्ध्वभूम्यां वर्णकैः कमलमष्टपत्रं लिखित्वा तदुपरि दुग्धवृक्षमयैः। फलकैः पंजरं मनुष्यावारेण कृत्वा संस्थाप्य तत्र त्येन गव्येन संपूर्य तस्मि
न् शीघ्ररोगिणं शुद्धवस्त्रादि संयुतं संस्थाप्य तं स्पृष्ट्वा अष्टोत्तरसहस्रं तदुत्तरशतं वा कार्यानुगुणतया चक्रमंत्रं जपेत्॥ तत्पूर्वादिदिक्षु वह्निं संस्थाप्य द्विजो
त्तमैः॥ पूर्वोक्तद्रव्यैः कारयेद्धोमविधानवित्॥ सोपि सम्भ्योय यथावद्दक्षिणां दद्यात्॥ गुरुं धनधान्यादिभिः प्रीणयेत्। ततः उक्तफलसिद्धिः॥ अस्मिन्नर्थे वि

॥ अस्याद्धं चरुणा पिंडं कृत्वा तस्मिन्विनिक्षिपेत्॥ वात्येवलिप्रधानार्थं तदर्द्धमवशेषयेत्॥ १०७ स्नातं विशुद्धं वस्त्राढ्यं सा
ध्यमानीय तं पुनः॥ दक्षिणे स्थापयेन्मंत्री कुंभाग्निभ्यामनंतरं॥ १०८॥ नीराज्य तौ नपेद्धात्वे आमादष्टमराशिके॥ स्थापयेतौ
यथापूर्वं सपरिस्तरणो क्रमात्॥ १०९ हुत्वा वह्नौ यथापूर्वं शिष्टान्नेन वलिं हरेत्॥ मनुना वश्यमाणेन दशदिक्षु यथाविधि ११०
सहदिक्षु गणेभ्योंते सर्वे शांतिकरे पुनः॥ भ्यो वलिं प्रतिगृह्णंतु शांतये हृदयं ततः॥ ब्राह्मणान्भोजयेत्सम्यक् मधुरोतरमादरात्॥
१११ गुरवे दक्षिणां दद्याद्वस्त्रभूषणसंयुतां। हन्यादयं विधिः पुंसां कृत्यारोगाज्वरस्य हान्। ११२॥ रक्षः पिशाचमापीदितं शान्
शीघ्रं न संशयः। विधाय पंजरं मंत्री फलकैः क्षीरशाखिनां॥ ११३॥ पंचगव्येन संपूर्य तस्मिन्साध्यं निवेशयेत्। धौतवस्त्रं विशुद्धां
गं स्पृष्ट्वा सम्यक् जपेन्मनुं॥ ११४॥ पूर्वादिदिक्षु संस्थाप्य वह्निं ब्राह्मणसत्तमैः॥ कारयेत्पूर्वसंदिष्टैर्द्रव्यैर्होमविधानवित् ११५

धापयं जरमिति। ग्रंथोपोजनीयः॥ अभिषेकविधानमाह॥ पंचगव्यैरित्यादिना स्पष्टार्थेन ग्रंथेन॥ उच्चस्थानगते त्वशुभस्थानगते॥ त्रिलोहिमुद्रिका सुवर्णरज
तता अमयीत द्वर्णसंख्यया ता सां च षोडश द्वादश त्रिंशत्कारयेत्॥ धारयन्। प्रयोगांतरमाह॥ पंचगव्येति॥ अथ मनुसप्तः प्रयोगांतरमाह॥ पद्मोशेति॥ मलयजं चं
दनं। पुरं गुग्गुलुं। यामिनी हरिद्रा। देवी सहदेवी॥ एतत्सर्वं पंचगव्यपूर्णे निक्षिपेत्॥ पश्चात्संस्कृतेन तेन निवेश्य स्नापयेत् ॥ ० ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ग्रंथोक्तप्रमाणेन प्राशतो दशलक्षद्रव्यं वा तद्भस्मोक्तफलदं ॥ पंचगव्यघृतपाकप्रकारमाह ॥ मुस्तेत्यादिना ॥ निशा हरिद्रा वह्निः चित्रकमूलं पथ्या मधुयष्टिः ॥ रोहिणी
नूटः । पलत्रयं हरीतक्यादि । प्रस्थपरिमितं घृतं सम्यक् पाचितं ॥ मंत्रसाधितमुक्तफलदं ॥ यंत्राणीति ॥ षट्कोणं विलिख्य तन्मध्ये ठकारं संप्रधाय विलिख्य षट्
कोणेषु वर्णान् ॥ एतच्चं त्रमुक्तफलदं ॥ पंत्रांतरमाह । षट्कोणमध्ये ससाध्यं तारं विलिख्य कोणेषु शिष्टवर्णान् तत्संधिषु गानेतदुक्तफलदं ॥ अपरं यंत्रान्तो

तोषयेद्दक्षिणाभिस्तान्यजमानः स्वशक्तितः ॥ गुरुं च धनधान्याद्यैर्नत्वा संप्रीणयेत्तदा ११६ सर्वरोगप्रशमनः कृत्याद्रोहविनाशनः
॥ अपमृत्युहरः पुंसां विधिरेष प्रकीर्तितः ११७ ॥ पंचगव्यैः कषायैर्वा क्षीरभूरुहसंभवैः ॥ पूरिते कलशे जप्तैः कृतसंपातसंयु
तैः ॥ अभिषिंचेद्ग्रहाविष्टमभिचारातुरं नरं ॥ सुस्थो भवति शीघ्रेण विधानेनामुना नरः ११९ ॥ भानुवारेऽभिषेकस्य विधानेन
सुसाधितैः ॥ सलिलैः स्नापयेन्नारीं सुखप्रसवकांक्षिणीं १२० सप्तवाराभिषेकेण सर्वेनश्यंत्युपद्रवाः ॥ पंचगव्यसृतं सर्पिर्मंत्रितं
मनुनामुना १२१ गर्भिणीनां ग्रहार्तानां सेवितं तत्सुखावहं ॥ उच्चस्थानगते शुक्रे मनुना साधुसाधिता ॥ १२२ ॥ त्रैलोही मुद्रिका ह
न्यात्क्षुद्रभूतज्वरग्रहान् ॥ तच्चूर्णं संख्यया सूत्रे ग्रंथीन्कृत्वा जपादिभिः १२३ साधितं कलयेद्धस्ते कंठे वाद्गुः खशांतये ॥ पंचग
व्यं जपेत्स्पृष्ट्वा मंत्रं दशशतावधि १२४ न्यस्य तत्पद्मपत्रादौ पत्रे वा ब्रह्मवृक्षजे ॥ फले बिल्वस्य वा मंत्री गृहे स्वस्य परस्य वा १२५
निखनेत्सर्वरक्षा स्याद्धृद्धिस्ते संपदः सदा ॥ पलाशक्षीरवृक्षाणां त्वचो मलयजं पुरं १२६ कुंकुमं यामिनीं कुष्ठं बिल्वापामार्गसर्षपान् ॥
तिलदूर्वायवान्देवीं तुलसीपुगलं कुशं १२७ लक्ष्मीं गोरोचनां पद्मं वचां गोमयसंयुतां । विष्णुक्रांतामर्कयुतां जपन्मंत्रं विनिक्षिपे
त् ॥ १२८

रमाह ॥ षट्कोणं लिखित्वा ॥ तन्मध्ये प्रणवगर्भं ठकारं कोणेषु शिष्टवर्णान् ॥ तत्संधिषु गमंत्रान् ॥ उपरि षोडशपत्रं तत्र षोडशाक्षरं च मंत्रं भूपुरवेष्टितं प्रो
क्तफलदं ॥ यंत्रांतरमाह ॥ मध्ये तारमिति ॥ पूर्ववत् षट्कोणं विलिख्य मध्ये ससाध्यं ॐकारं कोणेषु शिष्टवर्णान्संधिषु गमंत्रान्वहिरष्टपत्रं पत्रेषु स्वरके सरात्र पूर्णो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ ति॰ उक्तम्। अष्टाक्षरपत्रं तदुपरि षोडशार्णमंत्राक्षरषोडशपत्रं कमलकादिवर्णलसत्किंजल्कं साध्यनामयुक्ताभ्यां तदुपरिवीतं वहिस्तदुपरिप्रणवेनवीतं वहिः पा
टी॰ गू॰ पंचगव्येन संपूर्णे पात्रे तत्संस्कृतेनले॥ संस्थाप्य ध्यायेत्तस्य कृपावड्गस्मभविष्यति १२९ तदाद्यायजपेद्रूपअयुतं देवताधि
७७ पा॥ लिंपेत्सर्वांगमेतेन किंचिच्छिरसि निःक्षिपेत् १३० कृत्याद्रोहग्रहोन्मादव्याधिदुःखनिवारणं। सर्वशत्रुप्रशमनं सर्वपाप
हरं परं १३१ शुभदं वश्यदं पुंसां समस्तापन्निवारणं॥ गर्भिणीबालस्त्रणानां विशेषेण प्रशस्यते १३२ अस्मात्परतरा रक्षा नास्ति लो
के च कीर्तिता॥ मुस्ताशुंठीनिशावह्निरेलायष्टिर्वचावृषा १३३ पाठाविडंगमंजिष्ठाद्राक्षा दार्वीसरोहिणी। पलत्रयं पचेत्तैः कल्कैः
पंचगव्येषु सर्पिषां १३४ अस्य पचेद्यथान्यायं मंत्रेणानेन साधितं। कांतिदं शुभदं स्त्रीणां भूतप्रेतामयापहं १३५ गर्भरक्षाकरं श्रु
द्धं पंचगव्यघृतं विदुः। यंतान्स्व प्रलिखेन्मध्ये षट्सु कोणेषु तेष्वथ॥ १३६॥ मंत्रवर्णान्लिखेदेतच्चक्रमापन्निवारणं। षट्कोण
मध्ये विलिखेत्ससाध्यं तारं षडस्रिष्वथ शिष्टवर्णान्। अंगानि तत्संधिषु पंचमेतत्करोति रक्षां विधिवत्प्रजप्तं १३८ तारं लिखेद्वृत्त
गतं ससाध्यं कोणेषु शिष्टं मनुवर्णषट्कं। अंगानि संधिष्वथ षोडशारं सषोडशार्णं वसुधापुरस्थं १३९ जपित्वा कृतसंपातं गर्भि
णीनां हितं परम्। अभिचारग्रहोन्मादान्यंत्रमेतद्विनाशयेत् १४० मध्ये तारं ससाध्यं मनुमय विलिखेत् षट्सु कोणेषु संधिष्वंगान्यं
ते कलानां युगयुगविलसत्केसराष्टार्णपत्रं। किंजल्कान्कादिवर्णैर्द्विवसुदललसत्षोडशार्णं स्वनाम्ना लक्षाभ्यां त्रिः प्रवीतं लिख
तुपरि च ततस्तारपाशांकुशाभ्याम् १४१ तारं नमो भगवते महासुदर्शनाय च। वर्मास्त्रांतश्चक्रमनुः षोडशाक्षर ईरितः १४२ च ग॰ ७७
क्रयंत्रमिदं प्रोक्तं सर्वभीतिनिवारणं। क्षुद्रापमृत्युशमनं राज्ञां विजयवर्द्धनं १४३॥ ॥ शांकुशाभ्यां वेष्टितं उक्तफलदं। यंत्रांतरमाह॥ ॥

रिखाविलिख्येति। अस्यार्थः॥ प्राक् प्रत्यक् रेखाविलिख्य तासामग्राणि हरितक्याकारेणान्योन्यं बंधयित्वा उपरितनकोष्ठचतुष्टये स्थाने हृषीकेशमंत्रपदान्
। अष्टाक्षरमंत्रवर्णउटितान्लिखेत्॥ मध्यकोष्ठे सुदर्शनमंत्रविदर्भितसाध्यनाम अवशिष्टकोष्ठद्वये चक्रमंत्रे षोडशाक्षरं लिखेत्॥ एतद्यंत्रप्रोक्तफलदां हृषी
केशमंत्रमुद्धरति॥ स्थान इति स्पष्टार्थमपरम्॥ इतिगूढार्थदीपिकायां षोडशः पटलः॥ अधुना पुरुषोत्तममंत्रं वक्तुमारभते॥ अथवक्ष्येत्यादिना। इदानीमं
लेखाविलिख्याष्टशिरांसितासामाबध्यवात्ये श्रुतिशः क्रमेण। स्थाने हृषीकेशमनुं विभज्यपादांल्लिखेत्कोष्ठचतुष्टयस्थान् १४४ अष्टा
क्षरार्णैः परिदर्भितार्णान्कोष्ठद्वये चक्रमनुं यथावत्॥ मध्यस्थकोष्ठे विलिखेत्स साध्यं स्यात्सप्तकोष्ठाह्वयंत्रमेतत्। १४५। स्थाने हृषी
केशतवप्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च॥ रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः १४६ धारितं सप्तकोष्ठं त्राय
ते महतो भयात्। दुःस्वप्न दुर्निमित्तानां शमनं कीर्तितं बुधैः १४७॥ इतिशारदातिलके षोडशः पटलः। १६॥ अथ वक्ष्ये जगन्मूलं मंत्रं श्री
पुरुषोत्तमं॥ गोपितं वैष्णवैर्तंत्रे भुक्तिमुक्तिफलप्रदं १ तारमाररमाबीजं नत्यंते पुरुषोत्तम॥ पुनरप्रतिरूपांते ततो लक्ष्मीनिवासच २
सकलांते जगत्पूर्वं क्षोभणेतिपदंपुनः। सर्वस्त्रीहृदयोपेत विदारणपदंपुनः ३ ततः परं त्रिभुवनमदोन्मादकरंपुनः। सुरासुरांतेम
नुजसुंदरीजनवर्णतः ४ मनांसितापयपदं द्वंद्वं दीपयपद्वितयं पुनः। शोषयपद्वितयं भूयो मारयद्वितयं पुनः ५ स्तंभयद्वितयं पश्चान्मोह
यद्वितयं परं। द्रावयद्वितयं पश्चादाकर्षयपुगं ततः ६ समस्तपरमोपेत सुखेतिपदसंयुतं॥ सर्वसौभाग्यशब्दांते करेतिपदसंयुतं। ७।
सर्वकामप्रदपदममुकं हनयुग्मकं॥ चक्रेणागदयापश्चात्खड्गेन तदनंतरम्॥ ८॥ ,, त्वमुद्धरतितारमित्यादिना। अस्यार्थः। तारः प्रणवः मारः
कामबीजं। रमाश्रीबीजं। नतिः नमः। पुरुषोत्तमअप्रतिरूपलक्ष्मीनिवाससकलजगत्क्षोभणसर्वस्त्रीहृदयविदारणत्रिभुवनमदोन्मादकरसुरासुरमनुजसुंद
रीजनमनांसि तापयर दीपयर शोषयर मारयर स्तंभयर मोहयर द्रावयर आकर्षयर समस्तपरमसुखसर्वसौभाग्यकरसर्वकामप्रद अमुकं हनर चक्रेणागदया
खड्गेन सर्ववाणैर्भिंदिर उग्रपाशेनघट्टयर अंकुशेनताडयर कुरुर किंतिष्ठसि तावद्यावत्समीहितं मे सिद्धं भवति एतत्सर्वं स्वरूपं वर्म हुंफट्नमः स्वरूपम्॥ एवंदि

॥ शा॰टी॰ १६३ ॥

षडंगमंत्रानाह॥ पुरुषोत्तमेत्यादिना॥ एतदुक्तं भवति॥ पुरुषोत्तम त्रिभुवनमदोन्मादकर हुं फट् हृदयाय नमः॥ सकलजगत्क्षोभण लक्ष्मीदयित हुं शिरः॥ म
न्मथोत्तमांगदे कामदापिनि हुं शिखा॥ परमसुभग सर्वसौभाग्यकर हुं कवचं॥ सुरासुरमनुजसुंदरीहृदयविदारण सर्वप्रहरणधर सर्वकामिक हन २ हृदयं वश

सर्ववाणैर्भिंदिद्युगं पाशेनेति परं ततः॥ करद्वयांतं कुशेन ताडयद्वितयं पुनः ९ कुरुशब्दद्वयमथो किंतिश्वसिपदं पुनः॥ तावद्यावत्य
दस्यांते समीहितमनंतरं १० ततो मे सिद्धमाभाष्य भवत्यंते सर्वमं फट् नमोंतोयं मनुः प्रोक्तो द्विशताक्षरसंयुतः॥११॥ जैमिनिर्मुनिराख्या
तश्छंदोस्यामीतमीरितं॥ समस्तजगतामादिर्देवता पुरुषोत्तमः॥१२॥ पुरुषोत्तमशब्दांते वदेत्त्रिभुवनं पुनः॥ मदोन्मादकरांते हूं हृ
दयं सकलं ततः॥१३॥ जगत्क्षोभणशब्दांते लक्ष्मीदयित हुं शिरः॥ मन्मथोत्तमसंयुक्तमंगजे कामदापिनि॥१४॥ हुं शिखापर
मापेतसुभगाक्षरसंयुतं॥ सर्वसौभाग्यकर हूं कवचं परिकीर्तितं॥१५॥ उक्त्वा सुरासुरोपेतमनुजान्वितसुंदरी॥ ततः पुरस्ताद्धृदय
विदारणपदं भवेत्॥१६॥ सर्वप्रहरणाधरसर्वकामिकतत्परं॥ हनद्वयं च हृदयबंधनानि ततः परं॥१७॥ आकर्षयपदद्वंद्वं महा
बलहुमस्त्रकं॥ त्रिभुवनेश्वरपदं ततः सर्वजनं ततः १८॥ मनांसि हनयुग्मांते दारयद्वितयं च मे॥ वशमानयहूं नेत्रं तारराद्याः फट्
नमोंतकाः॥१९॥ षडंगमंत्राः संदिष्टा नेत्रांतास्तत्ववेदिभिः॥ त्रैलोक्यमोहनार्णांते हृषीकेशपदं पुनः॥२०॥ पश्चादप्रतिरूपादि
मन्मथानंतरं वदेत्॥ सर्वादिस्त्रीपदं पश्चाद्धृदयाकर्षणं ततः॥२१॥ आगच्छागच्छ मंत्रोयं ताराद्यो नमसान्वितः॥ अनेन मनुना
कृत्वा व्यापकं न्यस्य बाहुषु॥ २२ ॥ अष्टायुधानि मुद्राभिर्मंत्रैः सार्द्धं विचिंतयेत्॥ ० ॥ श्री ॥ श्री॥ ॥

मानय २ हुं नेत्रं॥ ताराद्याहुं फट् नमोंताः षडंगमंत्राः समुद्दिष्टाः॥ अथ मंत्रविशेषः॥ अन्यत्रप्रयोगे वैष्णवानां नेत्रलोपः॥ इह तु नेत्रमस्ति॥ तदंत
इति॥ त्रैलोक्यमोहन हृषीकेशाप्रतिरूपमन्मथसर्वस्त्रीहृदयाकर्षण आगच्छ २ तारादिनमोंतः आवाहनमंत्रः ॥ श्री ॥ श्री॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्षीरांभोधीत्यारभ्य उद्यानपरो ग्रंथः स्पष्टः ॥ ध्यानमाह ॥ आसनमंत्रमाह ॥ पक्षिराजायेतिव्यापकेन पूर्वोक्तव्यापकमंत्रेणेत्यर्थः ॥ भृगुः सकारः ॥ लांतो वकारः ॥ विं
दुरनुस्वारः ॥ एतैर्युतं स्वमिति देवीबीजा ह्रस्वत्रयं ॥ अइउ ॥ क्लीबे नपुंसकचतुष्टयं ऋॠऌॡ सर्गो विसर्गः ॥ एतद्व्यतिरिक्तस्वरयुक्तं ॥ आसां लक्ष्म्यादीनां बीजपथा

क्षीरांभोनिधिमध्यस्थं निरंतरसुरद्रुमं ॥ उद्यदर्केंदुकिरणाद्दूरीकृततमोभरं ॥ कालेमेघसमालोकनृत्यद्बर्हिवृंदवत्कं ॥ २५ ॥ उत्फु
ल्लकुसुमामोदप्रहृष्यद्भृंगसंकुलं ॥ कूजत्कोकिलसंघेन वाचालितदिगंतरं ॥ २६ ॥ नानाकुसुमसौरभ्यवाहिगंधवहांचितं ॥ कल्प
वल्लीनिकुंजेषु क्रीडत्सिद्धकदंबकं ॥ २७ ॥ देवगंधर्वनारीभिर्गायंतीभिरलंकृतं ॥ अनेकदीर्घिकायुक्तमुद्यानं महदद्भुतं २८
तस्मिन्मध्ये मणिमये मंडपे तोरणांचिते ॥ ऋतुभिः षड्भिरनिशं सेवितस्य महीयसः ॥ २९ ॥ सुरद्रुमस्य मूलस्थे महासिंहासने शु
भे ॥ रक्तारविंदमध्यस्थगरुडोपरि संस्थितं ॥ ३० ॥ ध्यायेद्धृत्पद्मयासार्द्धं जगन्नाथं जगन्मयं ३१ देवं श्रीपुरुषोत्तमं कमलयास्वांकस्थ
यापंकजं — बिभ्रत्या परिरब्धमंबुजरुचा तस्या निबद्धेक्षणं ॥ ध्यायेच्चेतसि शंखपाशमुसलांश्चापारिखड्गं गदां ॥ हस्तैरंकुशमु
द्वहंतमरुणं स्मेरारविंदाननं ३२ एवं ध्यात्वा श्रियः कांतमनुलक्षचतुष्टयं ॥ जपेद्दशांशं विधायाथ कुंडमर्द्धेंदुसन्निभं ३३ जुहुया
द्बिल्ववैव ह्लौपद्मैर्जातिसमुद्भवैः ॥ पुष्पैर्यथैवैः क्रमात्पश्चाद्ब्राह्मणानपि भोजयेत् ॥ ३४ ॥ अर्चयिष्यन् जगन्नाथं गायत्र्या परिशोध
येत् ॥ आत्मानं यागवस्तूनि यागभूमिं च देशिकः ३५ त्रैलोक्यमोहनायेति विद्महे पदमीरयेत् ॥ स्मराय धीमही पश्चात्तन्नो विष्णुः
प्रचोदयात् ३६ गायत्र्येषा समाख्याता वैष्णवी सर्वसिद्धिदा ॥ प्राक्प्रोक्ते वैष्णवे पीठे कल्पयेदासनं ततः ३७ पक्षिराजाय ठद्वंद्व
मस्य मंत्रैः प्रकीर्तितः ॥ संकल्पितायां मूलेन मूर्तौ देवमनन्यधीः ३८ ॥ ९ ख्यांलक्ष्म्यै नमः ख्वींसरस्वत्यै नमः ॥ ख्वूंरत्यै नमः ॥ खेंप्रीत्यै नमः ॥
खैंकतिकायै नमः ॥ खोंशान्त्यै नमः खौंपुष्ट्यै नमः खंतुष्ट्यै नमः ॥ इत्यादिप्रकारेण ॥ सायुधमंत्रोद्धारः स्पष्टः ॥ ० ॥ ० ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शशिप्रसूनैः कुमुदैः॥ तामेवत्र्यग्रमेवा निगद्याख्यातमपरं॥ मंत्रांतरमाह॥ स्पष्टार्थेन ग्रंथेन॥ यंत्रमुद्धरति॥ पिंडमिति॥ षट्कोणं लिखित्वा तन्मध्ये पिंडबीजं लिखित्वा॥ तन्मूलमंत्रेणावेष्टयित्वा॥ तद्बहिः पद्मं दशपत्रं षट्कोणेषु वक्ष्यमाणगोपालषडक्षरं लिखेत्॥ पत्रेषु वक्ष्यमाणदशाक्षरं लिखेत्॥ तत्पद्मं कामबीजेन

आवात्यमनुना विद्वान्व्यापकेन समर्चयेत्॥ भृगुर्लांत पुनः सेन्दुबीजं देव्याः प्रकीर्तितं॥ ३९॥ कर्णिकायां पूजयेदादौ विधानेन नागदेवताः॥ दलेषु पूजयेत्पश्चाद्रुक्मिण्याद्याः शृतचामराः ४०॥ मुक्ताहारलसच्चारुपयोधरभरानताः॥ जपाकुसुमसंकाशा मदविभ्रममंथराः॥ ह्रस्वत्रयमक्षी वसर्गरहितस्वरशोभितं॥ देवीबीजं क्रमादासां मंत्रमाहुर्मनीषिणः॥ ४२॥ दलाग्रेषु यजेच्छंखशार्ङ्गचक्रमसिं गदां॥ अंकुशं मुसलं पाशमेतान्यस्त्राणि शार्ङ्गिणः ४३ स्वमुद्राभिः स्वमनुभिः कल्प्यं तेमनवः क्रमात्॥ आद्योजलचरायांते हृद्यमनुरीरितः ४४ शार्ङ्गाय सशरायांते स्वाहांते नंतरो मनुः॥ सुदर्शनमहाचक्रराजांते स्याद्दहद्वयं॥ ४५॥ सर्वदुष्टभयं पश्चात्कुरुछिंदियुगं पृथक्॥ विदारयपदद्वंद्वं परमंत्रान्ग्रसयस॥ ४६। भक्षयत्रासयद्वंद्वं प्रत्येकं वर्मफट् द्वयं चक्रायनमस्त्येषतृतीयो मंत्रईरितः ४७ खड्गतीक्ष्णपदांते स्याच्छिंदिखड्गयुगं पृथक्॥ चतुर्थोयं मनुः प्रोक्तः कौमोदकिमहाबले॥ ४८॥ सर्वासुरांतकिपदं प्रसीदयुगवर्मफट्॥ स्वाहांतोयं मनुः प्रोक्तः सद्भिः कौमोदकीपरः॥ ४९॥ अंकुशांते कटयुगं पञ्चमोयं मनुरीरितः॥ संवर्तकांतेमुसलपोथयद्वितयं पुनः॥ ५०॥

वेष्टयेत्॥ तद्बहिः षोडशपत्रकेसरेषु स्वरान् पत्रेषु वक्ष्यमाणषोडशवर्णमंत्रं। तद्बहिर्द्वात्रिंशद्दलं व्यंजनके सरं वक्ष्यमाणानुष्टुप् मंत्रं पत्रेषु बहिः पाशांकुशवीतं। तद्बहिर्भूपुरद्वयं॥ गोपालाष्टाक्षरमंत्रवर्णान्लिखेत् एतद्यंत्रं उक्तफलदम्॥ ॥ ॥

हुंफट् द्विठांतो मंत्रोयं सप्तमः परिकीर्तितः ॥ पाशं वंध द्वयं पश्चादाकर्षय पदद्वयं ॥ ५१ ॥ वह्निजायावधिः सद्भिरष्टमो मंत्र ईरितः ॥ लोके
शान्नृ जपेत्पश्चाद्वज्राद्यैरायुधैः सह ॥ ५२ ॥ इत्थमभ्यर्चयेन्नित्यं यद्यावत्पुरुषोत्तमः ॥ आप्नोति महतीं लक्ष्मीं सौभाग्यमतुलं यशः ॥
॥ ५३ ॥ आयुरारोग्यमन्यानि मनोभीष्टानि विंदति ॥ हयारिकुसुमैर्देवमर्चयित्वा यथाविधि ॥ ५४ ॥ शशिप्रसूनैर्जुहुयाद्दशोत्तरसहस्र
कम् ॥ मासमात्रेण वशगास्तस्य स्युः सकला नृपाः ॥ ५५ ॥ हुत्वा विल्वफलैः पद्मैः श्रियं विंदेदनिंदितां ॥ प्रफुल्लैररुणांभोजैस्तामेव
लभते पुनः ॥ ५६ ॥ हुत्वा ज्योतिष्मतीतैलं सहस्रं वसुसंख्यकं ॥ सुभगो जायते सम्यक् सर्वेषां नात्र संशयः ॥ ५७ ॥ विधानेनामुना मं
त्री महारोगात्प्रमुच्यते ॥ अश्वत्थसमिधो होमः परा हतधनावहः ॥ ५८ ॥ आज्याक्तदूर्वाहोमेन मुच्यते महतो भयात् ॥ यस्य ना
मयुतं मंत्रं जपेदयुतसंख्यया ॥ ५९ ॥ स भवेद्दासवत्तस्य नात्र कार्या विचारणा ॥ बहुना किमिहोक्तेन मनुना साधकोत्तमः ॥ ६० ॥
साधयेदखिलान्कामान्साक्षाद्विष्णुरिवापरः ॥ उत्तिष्ठवर्णमाभाष्य श्रीक्रोधीशाहुताशनौ ॥ ६१ ॥ वह्निजायावधिर्मंत्रो वसुस्वर
समन्वितः ॥ ऋषिरस्य भवेद्ब्रह्मा मः पंक्तिश्छंद उदाहृतम् ॥ ६२ ॥ श्रीकराख्यो हरिः प्रोक्तो देवतास्य मनीषिभिः ॥ हृदयं भीष
यद्वंद्वं त्रासय द्वितयं शिरः ॥ ६३ ॥ शिखा प्रमर्दय युगं वर्म प्रध्वंसय द्वयं ॥ अस्त्रं रक्ष युगं सर्वे हुमंताः समुदाहृताः ॥ ६४ ॥
मूर्ध्नि नेत्र हृदये कंठे हृदयोदरयोः पुनः ॥ ऊरुजंघापदद्वंद्वे मंत्रवर्णान्प्रविन्यसेत् ॥ ६५ ॥ मुखे न्यसेद्ब्राह्मणोस्य मुखमासीदिदं
मनुं ॥ बाहू राजन्यः कृतो यं न्यस्तव्यौ बाहुयुग्मके ॥ ६६ ॥ ऊरू तदस्य यद्वैश्य इममूरुद्वये न्यसेत् ॥ पादद्वये न्यसेन्मंत्रं पद्भ्यां शू
द्रो अजायत ॥ ६७ ॥ चक्रं शंखं गदां पद्मं हस्ताग्रेषु प्रविन्यसेत् ॥ इत्थं न्यासं ततो कृत्वा देवं पूर्वोक्तमंडपे ॥ ६८ ॥ श्री ॥
॥ ॥

शा॰ति॰ रक्तपद्मासनस्थस्यगरुडस्योपरिस्थितं॥कांचनाद्रिसमप्रभंकमलाननंकमलेक्षणंशंखचक्रगदासरोजधरंमनोहरदर्शनं॥कौस्तुभा
टी॰गू॰ ङ्कितवक्षसंमुकुटांगदादिविभूषणं तार्क्ष्यवाहनमच्युतंहृदिभावयामिजगत्पतिं॥७०॥अष्टलक्षंजपेन्मंत्रीमंत्रमेतद्दशांशतः विल्वैः
८० क्षीरद्रुमोत्थाभिःसमिद्भिर्दरुणांबुजैः ७१॥पयोन्नैःसर्पिषाहुत्वागुरूंसंतोषयेद्धनैः॥मूर्तौमूलेनक्लृप्तायांपूजयेद्देवमन्वहं॥७२॥
अंगान्यादौसमाराध्यदिक्पत्रेषुसमर्चयेत्॥श्रियंरतिंधृतिंकांतिंलीलापंकजधारिणीः ७३॥पीतारुण श्यामनीलान्विदिक्पत्रेषुपू
जयेत्॥वासुदेवादिकामूर्तीःपार्श्वयोर्निधियुग्मकं॥७४॥विष्वक्सेनंयजेदीशेलोकपालाननंतरं॥ एवंसंपूजयेद्देवंसाधयेदिष्ट
मात्मनः॥७५॥दूर्वाचरुभ्यांसाज्याभ्यांजुहुयादयुतंबुधः॥संपातितंचरुंपश्चात्साध्योभुंजीतसाधितं॥७६॥ ब्राह्मणान्भोजयेत्स
म्यक्मधुरैर्भौमवासरे॥तोषयेद्गुरुमर्थेनवस्त्रैर्धान्यैर्विभूषणैः॥७७॥जित्वापमृत्युरोगादीन्दीर्घमायुःसविंदति॥आज्यसिक्तैः
सरसिजैर्जुहुयादयुतत्रयं॥७८॥निवसेत्कमलातस्मिन्नत्यजेत्तत्सुतानपि॥विल्ववृक्षसमिद्धोमात्साक्षाद्धनपतिर्भवेत्॥७९॥
पूगवृक्षसमाप्तैस्तंडुलैर्मधुरोक्षितैः॥जुहुयादचिरादेवसंपदांजायतेनिधिः॥८०॥आज्येनलक्षंजुहुयात्परान्नपतिपार्थिवान्॥
अन्नसूत्रंभुजेवद्धंमनुनानेनसाधितं॥८१॥रोगापमृत्युदुःखानिनाशयेन्नात्रसंशयः॥ जलांजलिभिरात्मानमभिषिंचेद्दिनेदिने॥
॥८२॥स्नानकालेषुसभवेत्सौभाग्यश्रीसमृद्धिमान्॥ऊर्ध्ववाहुर्हृद्योमंत्रीपश्यन्नादित्यमंडलं॥सहस्रमानंप्रजपेन्नित्यंनिशित राम॰
धीर्मनुं॥सर्वेमनोरथास्तस्यसिद्ध्येयुर्नात्रसंशयः॥८४॥कृष्णायपरमाभाष्यगोविंदायततःपरम्॥गोपीजनपदस्यांतेवल्लभायद्व ८०
ढावधिः॥ ८५॥ कामवीजादिराख्यातोमनुरष्टादशाक्षरः॥ नारदोस्यमुनिः प्रोक्तोगायत्रंछंदउच्यते ॥ ८६ ॥ श्री०
॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

देवताकथितः कृष्णः सर्वकामफलप्रदः॥ चतुष्करसावेदाब्धिनेत्रसंख्याक्षरैः क्रमात्॥ ८७॥ पंचांगानि मनोः कुर्यान्मंत्रविज्ञा
तिसंयुतैः। स्मरेद्वृंदावने रम्ये मोहयंतमनारतं ८८ गोविंदं पुंडरीकाक्षं गोपकन्याः सहस्रशः॥ आत्मनो वदनांभोजप्रेषिताक्षि
मधुव्रताः ८९ पीडिताः कामबाणेन विरमाश्लेषणोत्सुकाः॥ मुक्ताहाररलसत्पीनतुंगस्तनभरानताः ९० स्रस्तधम्मिल्लवसनामद
स्खलितभाषणाः॥ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः ९१ विलोमयंती विविधैर्विभ्रमैर्भावगर्भितैः। फुल्लेंदीवरकांतिमिंदु
वदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुन्दरं। गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणु
वादनपरं दिव्यांगभूषं भजे। ९३। मंत्रमेनं यथान्यायमयुतद्वितयं जपेत्॥ जुहुयादरुणांभोजैर्दशांशाः सुसमाहितः ९४ वैष्णवे पूज
येत्पीठे यथावद्देवकीसुतं अंगावरणमाराध्य पत्रेषु पूजयेत्प्रियाः ९५ कालिंदीनग्नजित्याख्या मित्रविंदा ततः परा चारुहासिन्ययप
रा रोहिणी जांबवत्यथा रुक्मिणी सत्यभामेति कथिता स्वाकभूषणाः। पीतांबरधराः सौम्याः करांबुजधृतांबुजाः ९७ ऐरावतादीनभ्य
र्च्येंद्रज्ञानष्टौ ततो वहिः॥ लोकपालान्यजेन्मंत्री वज्राद्यस्त्राणि तद्वहिः ९८ इति संपूजयेद्देवं गोविंदं जगतांपतिं। कुर्वीत कल्प
निर्दिष्टान्प्रयोगान्निजवांछितान् ९९ लक्ष्मीप्रसूनैर्जुहुयाच्छ्रियमिच्छन्ननिंदितां॥ साज्येनान्नेन जुहुयाद्राज्यान्नस्य समृद्ध
ये १०० अरुणैः कुसुमैर्विप्रान्जातीभिः पृथिवीपतीन्। प्रसूनैरसितैर्वैश्यान् शूद्रान्नीलोत्पलैर्नवैः १०१ वशयेत्पल्लवरौः स १०८
र्वान्पंकजैर्वनिताजनं गोशालासु कृतो होमः पायसेन ससर्पिषा १०२ गवां शांतिं करोत्याशु गोविंदो गोकुलप्रियः। शिशु
वेषधरं देवं किंकिणीदामशोभितं १०३ स्मृत्वा प्रतर्पयेन्मंत्री दुग्धबुध्याशुभैर्जलैः। धनधान्यांशुकादीनि प्रीतस्तस्मै ददाति सः॥
॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

पिंडवीजमुद्धरति। पंचांतकोमकारः। इरः यकारः। धरालकारः। मनुरौकारः। विंदुरनुस्वारः। एतैः पिंडितं गोपालवीजं॥ ग्लौं॥ गोपालषडक्षरमाह॥ स्मर इति॥ द्व शाक्षरमाह॥ गोपीजनेति। षोडशाक्षरमाह॥ प्रणव इति। अनुष्टुप्मंत्रमाह॥ पिंडं रतिपते इत्यादि। अष्टाक्षरमंत्रमुद्धरति॥ अनंग इत्यादिना यंत्रांतरमाह। प्रागि

पिंडं मूलेन वीतं दहनपुरयुगे कोणराजद्दृसार्णैः कुर्यात्पद्मं दशार्णस्फुरितदशदलं कामवीजेन वीतं॥ पद्मं किंजल्कसंस्थं स्वर विकृतिदलप्रोल्लसत्षोडशार्णं किंजल्कं व्यंजनाढ्यं विकृतदलयुगे षर्पितानष्टवर्णं १०५ पाशांकुशाभ्यामावीतं क्षोणीपु रयुगाश्रिषु॥ अष्टाक्षरेणालसितं यंत्रं गोविंददैवतं १०६। धर्मार्थकामफलदं सर्वरक्षाकरं परं। पंचांतको धरेरस्यो मनुर्विं॥ दुविभूषितः १०७ पिंडवीजमिदं प्रोक्तं सर्वसिद्धिकरं परं। स्मरः कृष्णाय ठद्वंद्वं षडर्णो मनुरीरितः १०८ गोपीजनांते प्रवदेद्वल्लभा याग्निसुंदरी। अयं दशाक्षरो मंत्रो दृष्टादृष्टफलप्रदः॥१०९। प्रणवं हृदयं कृष्णं ङेंतं उक्त्वा ततः परं। नादशं देवकीपुत्रं हुं फट् स्वाहासमन्वितं ११० षोडशाक्षरमंत्रोयं गोविंदस्य समीरितः॥ पिंडं रतिपते वीर्जं नमो भगवते ततः।१११ नंदसूनो पवालादि वपुषश्यामलाय च। गोपीजनपदस्यांते वल्लभाय द्विठावधिः ११२ अनुष्टुप्मंत्र आख्यातो गोपालस्य जगत्पतेः। अनंगं कृ ष्णगोविंदौ ङेंतान्वष्टाक्षरो मनुः ११३ प्राक्प्रत्यग्दक्षिणोदग्विधिवदभिलिखेत्स्यष्टरेखाचतुष्कं कोणेषु चाष्टशूलं पृथग्वलय युगपत्तमध्यपूर्वं तदंत्यं। श्लोकस्यार्णान्यरस्ताद्दशपदविवरेष्वष्टवर्णांल्लिखित्वा तद्बाह्ये द्वादशार्णैस्तदनु परिवृतं देवकीपुत्र यंत्रं ११५ तंसुकी देवदेवे ततं वं देवरतोरतं। तं रतोरूढतोख्यातं तं ख्यातो देवकीसुतं ११६ लिखितं भूर्यपत्रादौ यंत्रमेतद्यथावि धि। विधृतं बाहुना नित्यं सर्वकामफलप्रदं ११७ ॥

ति। प्राक्प्रत्यक्‌रेखाचतुष्कं तथैव तिर्यगपि विलिखित्वा कोणेषु तत् शूलचतुष्कं मध्यकोष्ठे वलययुगपुत्तं वर्तुलद्वयं लिखित्वा तन्नवक्ष्यमाणश्लोकाद्यक्षराणि वक्ष्यमाणप्रकारेण लिखेत्। तद्यथा। प्रथमवलये पूर्वादि प्रतिलोमतो विलिख्य द्विती यवलये द्वितीयार्द्धं तथैव लिखेत्। इति अवशिष्टाष्टकोष्ठे॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षु पूर्वोक्तगोपालाष्टवर्णं पूर्वादियथाक्रमं लिखेत्॥ वात्येद्वादशवर्णमंत्रेणावेष्टयेत् एतद्यंत्रमुक्तफलप्रापकं। एतदेव यंत्रं पलाशवृक्षफलके लिखित्वा गोस्था
ने निखनेत्। उक्तफलदं॥ भूर्यैचतुः षष्टिपदानि लिखित्वा तत्र वक्ष्यमाणप्रोक्तं वक्ष्यमाणक्रमेण लिखित्वा धारयेत्॥ उक्तफलसिद्धिः॥ एतदेव यंत्रं खादिरपत्रे
फलके लिखित्वा गोष्ठे निखनेत्। उक्तफलसिद्धिः॥ श्लोकमुद्धरति। क्षीरगोपये इत्यादिना स्पष्टार्थेन कामबीजमाह॥ ब्रह्मेति॥ अपमत्र निगूढं। ब्रह्मा ककारः

पलाशवृक्षफलके लिखितं साधुसाधितं॥ गोस्थाने निखनेदेतद्गवां वृद्धिर्भवेत्सदा ११८ श्लोकं चतुःषष्टिपदेषु भूयः शिवादि
दैत्यादि लिखेत्क्रमेण। तत्सर्वतोभद्रमिति प्रसिद्धं यंत्रं यशःश्री विजयप्रदायि ११९ फलके खादिरे क्लृप्तं गवां गोष्ठे निवेशितं॥ र
क्षात्क चौरमारिघ्नं सवत्सानां गवां हितं १२० क्षीरगोपयगोरक्षीरक्षमासक्षमाक्षर। गोमानोगगनोमागोपक्षगसक्षगसप १२१
ब्रह्मा भूम्यासनासीनः शांतिबिंदुविभूषितः। बीजं मनोभुवः प्रोक्तं जगत्त्रितयमोहनं। १२२ ऋषिः संमोहनः प्रोक्तो गायत्रं छंद ईरितं।
सर्वसंमोहनः साक्षाद्देवता मकरध्वजः १२३ बीजेन दीर्घयुक्तेन षडंगविधिरीरितः। जपारुणं रक्तविभूषणाढ्यं मीनध्वजं चारु
कृतांगरागं १२४ कराब्जैरंकुशमिक्षुचापं पुष्पास्त्रपाशौ दधतं भजामि। लक्षत्रयं जपेन्मंत्रं मधुरत्रयसंयुतैः १२५ पुष्पैः किं
शुकजैः फुल्लैर्जुहुयात् दशांशतः॥ वक्ष्यमाणे यजेत्पीठे विधिना मकरध्वजं १२६ मोहिनी क्षोभणी त्रासी स्तंभिन्याकर्षणी पुनः।
द्राविण्याह्लादिनी क्लिन्ना क्लेदिन्यः पीठशक्तयः १२७ बीजाढ्यमासनं दत्वा मूर्तिं मूलेन कल्पयेत्। तस्यां सम्यग्यजेद्देवं वक्ष्य
माणेन वर्त्मना १२८ ॥

भूम्यासनः लकारः शांतिः ईकारः बिंदुः अनुस्वारः। एतेषां संदोहः। कामबीजः। बाणपूजाप्रकारमाह। हृदयद्
त्यादिना॥ सर्गीतभृगुणा विसर्गांतसकारेण। बाणप्रभवमाह॥ स्नानाः दक्षिणहस्तेन शिरसि प्रणामः ।अन्ये
बाणश्चतहस्तपद्याः बाणदेवता ध्येया इत्यर्थः ॥ ० ॥ ० ॥ ० ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ति॰ इष्टुं गावरणं पूर्वे मध्ये दिक्ष्वर्चयेच्छरान्॥ द्रामाद्यं शोषणं पूर्वे द्रीं ङीं चं मोहनं ततः॥१२९॥ संदीपनाख्यं क्लीं ऊाद्यं ब्लूं ऊाद्यं ताप
टी॰गू॰ नं पुनः॥ सर्गांतभृगरा भूयो मादनं पंचमं यजेत्॥१३०॥ प्रणामवाणहस्ताश्च ध्येयास्ता वारदेवताः॥ संपूज्याः पत्रमध्येषु शक्तयो
८२ ष्टौ यथाक्रमं १३१ अनंगरूपान्यानंगमदनानंगमन्मथा॥ अनंगकुसुमा पश्चादनंगकुसुमातुरा॥१३२॥ अनंगशिशिरानंगमेख
लानंगदीपिका॥ लीलाकमलधारिण्यः स्मेरवक्त्राः सुभूषिताः॥१३३॥ बहिः षोडशपत्रेषु पूज्याः षोडशशक्तयः॥ प्रवतिर्विप्रलंभा
स्याज्ज्योत्स्ना सुभूर्मदद्रवा १३४ सुरता वारुणी लीला कांतिः सौदामिनी पुनः॥ कामकृच्चा चंद्रलेखा शुक्ली स्यान्मदना पुनः॥१३५॥
योनिर्मायावतीताः स्युः कल्हारविलसत्कराः॥ स्मेरवक्त्रा युवतयो प्रदविभ्रममंथराः १३६॥ दलाग्रेषु पुनः पूज्याः स्मरस्य परिचा
रिकाः शोको मोहो विलासोऽन्यो विभ्रमो मदनातुरः १३७ अपत्रवीपवाकामो चूतपुष्पो रतिप्रियः॥ ग्रीष्मस्तपांत ऊर्ज्जोऽन्यो हे
मंतः शिशिरो मदः १३८ इक्षुकार्मुकपुष्पेषुधरारक्ताः सुभूषिताः॥ अपरांगनिषंगाढ्या वनितासक्तमानसाः १३९ रतिप्रियानष्ट
दिक्षु यजेदृष्टौ विशिष्टधीः। परभृत्सारसोपश्चाच्छुकमेधाहूयौ पुनः १४० अपांगभ्रूविलासौ द्वौ हावभावौ प्रकीर्तितौ चतुर
स्तस्य कोणेषु पूज्यास्तत्परिचारिकाः १४१ माधवीमालतीपश्चाद्धरिणाख्या मदोत्कटा॥ सितचामरधारिण्यः सर्वाभरणभू
षिताः १४२॥ वात्स्येलोके स्वरान्पश्चादस्त्राण्यभ्यर्चयेत्तु नः॥ इत्थं यो भजते देवं सुगंधिकुसुमादिभिः १४३ स भवेल्लब्धसौभा राम॰
ग्यो लक्ष्म्याजितधनेश्वरः॥ अशोकपुष्पैर्दध्यक्तैर्जुहुयाद्दिवसत्रयं १४४ अयोनरसहस्रं यः स भवेज्जगतां प्रियः। गव्येना ८२
ज्येन जुहुयान्मंत्रैरष्टोत्तरं शतं। १४५ साधकेंद्रः ससंपातमर्चिते हव्यवाहने। संपाताज्येन वनिताभोजपेदात्मनः पतिं १४६।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षोडश शक्तीर्दर्शयति। रतिपरिचारिका एव प्रदर्श्यते॥ ओं कामोहमिति॥ अपरांगनिषंगात्त्वाः पृष्ठगतत्तूणीरकाः॥ इति प्रियानेव दर्शयति। परभृत इत्यादिना
वहिश्चत्तुरस्त्रं तत्कोणेषु माधवी प्रभृति रतिपरिचारिकाः॥ यंत्रमाह कामाध्यासितेति॥ षट्कोणं विलिख्य तन्मध्ये कामबीजं तन्मध्ये साध्यनाम वहिरष्टपत्रं प्रति

अनपायघ्नुरादिषं तत्तत्स कुरुते सदा॥ कन्यार्थी जुहुयाल्लाजैर्दृश्यते मंडलांतरे। ४७। कन्यामिष्टामवाप्नोति सापि तत्पतिमाप्नु
यात्॥ कामोल्लासितमध्यमंगविलसत्षट्कोणमेतद्बहिर्गायत्र्योग्रणवर्णवद्भुदलं मालामनोरक्षरैः॥ षट्संख्यैः सहिताष्टपत्र
लसितं सोणीपुरेणावृतं कोणान्यस्तमनोभवेन कथितं यंत्रं जगन्मोहनं। ४९ कामदेवाय शब्दांते विद्महे उ न्तु मीरयेत्॥ पुष्प
वाणाय धीमहि स्यात्तन्नोनंगः प्रचोदयात् ५०॥ नमोंते कामदेवाय वदेत्सर्वजनं ततः। प्रियाय सर्ववर्णांते जनसंमोहनाय च ५१।
ज्वलद्यप्रज्वलार्णान्वदेत्सर्वजनस्य च॥ हृदयं मम शब्दांते वशं कुरुयुगं शिरः॥५२॥ मालामनुरयं साष्टचत्वारिंशद्भिरक्षरैः
साध्याख्यायुदितैः स्मरैः परिवृतं कामं लिखेन्मध्यतः पश्चात्तारविकारपक्षकपरान्न्यासार्घि कि री शाघान्। भूलाढ्याष्टदलेषु सा
धुविलिखेत्तां वृलपत्रोदरे यंत्रं पानिशि खादयेत्तत जपं वश्या भवेत्स्वसा ५४ कथितं पुष्पवाणस्य सांगोपांगसमर्चनं॥ सौभाग्य
कांतिविभवदारपुत्रसमृद्धिदं।५५॥ आदाय वेदान्सकलान्समुद्रान्निहत्य शंखासुरमत्युदग्रं। दत्ताःपुरा येन पितामहाय विष्णुं
तमाद्यं भज मत्स्यरूपम्।५६ दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमंदराभ्यां। भूमेर्महामेघविघूर्णिताया यस्तं कूर्ममाधार
गतं स्मरामि।५७ समुद्रकांचीसरिदुत्तरीया वसुंधरा मेरुकिरीटभारा॥ दंष्ट्राग्रतो येन समुद्धृता भूस्तमादिकोलं शरणं प्रपद्ये ५८

दलं प्रविलिख्य तं गायत्रीं गृत्नावर्णान्वितयं अष्टसु पत्रेषु मालामंत्रं षट्कलसितं अष्टपत्रांतरं कोणं न्यसेत्। कामबीजं लसितं भूरहवेष्टितं मुक्तफलदा का
मगायत्रीमुद्धरति। कामदेवायेति। मालामंत्रमुद्धरति। नमोंतेति। सितः स्वाहाकारः। यंत्रांतरमाह साध्य युदितेति। अष्टपत्रं पत्रं तां वृलपत्रोदरे लि० ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शा॰ति॰ टी॰गू॰ ८३ लिख्वातत्कर्णिकायांकामवीजंतत्साध्यनामाक्षरपुटितंकामवीजैर्वेष्टयेत्॥ पश्चादष्टपत्रेषुप्रत्येकंवक्ष्यमाणातारादीनिलिखेत्॥ कथंतारंॐकारःविका

भक्तार्त्तिभंगक्षमयाधियायस्तंभांतरालादुदितोनृसिंहः॥ रिपुंसुराणांनिशितैर्नखाग्रैर्विदारयंतंनचविस्मरामि ॥५९॥ चतुः
समुद्राभरणाधरित्रीन्यासायनालंचरणास्यपस्य एकस्यनान्यस्यपदंसुराणांत्रिविक्रमंसर्वगतंनमामि ६० त्रिःसप्तवारंन्नृप
तीन्विहायपस्तर्पणंरक्तमयंपितृभ्यः॥ चकारकोदंडबलेनसम्यक्तमादिशूरंप्रणमामिविष्णुं ६१ कुलेरघूणांसमवाप्यज
न्मविधायसेतुंजलधेर्जलांतः। लंकेश्वरंयःशमयांचकारसीतापतिंतंप्रणमामिभक्त्या ६२ हलेनसर्वानसुरान्विकृष्यचकारचू
र्णानमुशलप्रहारैः॥ यःकृष्णमासाद्यवलंवलीयान्भक्तयाभजेतंवलभद्रशर्म ६३ पुराऽसुराणामसुरान्विजेतुंसंभावयन्चीवरचि
ह्नवेषं॥ चकारयःशास्त्रमयोघकल्पंतंमूलभूतंप्रणतोस्मिबुद्धं। ६४ कल्यावसानेनिखिलैःखुरैःस्वैःसंघट्टयामासनिमेषमा
त्रात्॥ यस्तेजसानिर्दहतातिभीमोविश्वात्मकंतंतुरगंभजामः ६५ यस्यप्रभावेनशिवोनवेधाःसमर्थतामेतिविवक्तुमुच्चैःतंदा
नवेन्द्रक्षयहेतुभूतंनमामिसोहंपुरुषंपुराणं ६६ शंखंसुचक्रंसुगदंसरोजंदोर्भिर्दधानंगरुडाधिरूढं॥ श्रीवत्सचिह्नंजगदादिमू
लंतमालनीलंहृदिविष्णुमीडे ६७ क्षीरांबुधौशेषविशेषतल्पेशयानमंतःस्मितशोभिवक्त्रं॥ उत्फुल्लनेत्रांबुजमंबुदाभमाद्यं
श्रुतीनामसकृत्स्मरामि ६८ प्रीणयेदनयास्तुत्याजगन्नाथंजगन्मयंधर्मार्थकाममोक्षाणांप्राप्तयेपुरुषोत्तमं ६९॥ इतिशारदा राम॰ ८३
तिलकेसप्तदशः पटलः॥ १७ ॥ ९९

रःषोडशस्वरः॥ पक्षःद्वितीयस्वरः। अःआकपरःखकारः॥ नासाऋकारः। अर्घीशःऊकारः। झिंटीशःएकारः
घकारः॥ अष्टदलाग्रेषुमूलंलिखेत्॥ एतद्यंत्रमुक्तफलम्॥ इतिगूढार्थदीपिकायांसप्तदशः पटलः॥ १७ ॥ ० ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वैष्णवमंत्रकथनानंतरं शैवमंत्रान्वक्तुमारभते॥ अथवक्ष्येत्यादिना॥ प्रथमं पंचाक्षरमुद्धरति॥ हृदयेत्यादिना॥ हृदयं नमः॥ वपरं शकारः। साक्षी ईकारः ततः शिरः तिसिद्धं लांतो वकारः॥ अनंतश्चाकारः ततश्च वा इति भवति॥ मरुत्यकारः ताराद्यः पंचाक्षर उद्धृतः॥ अंगुलिन्यासमाह॥ मंत्रस्येति॥ अयमर्थः॥

अथ वक्ष्ये महेशस्य मंत्रान्सर्वार्थसिद्धिदान्॥ यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमंजसा १ हृदयं वपरं साक्षिलांतोऽनंतान्वितो मरुत्॥ पंचाक्षरो मनुः प्रोक्तस्ताराद्यो यं षडक्षरः २ वामदेवो मुनिश्छंदः पंक्तिरीशोऽस्य देवता। षड्भिर्वर्णैः षडंगानि कुर्यान्मंत्रस्य देशिकः ३ मंत्रवर्णादिकान्न्यस्येत्पंच मूर्तीर्यथाक्रमं। तर्जनीमध्यमोरंत्यानामिकांगुष्ठयोः पुनः ४ तान्पुरुषाघोरसद्योवामेशसंज्ञकाः॥ वक्त्रहृत्पादगुह्येषु निजमूर्द्धनि तान्पुनः ५। प्राक्प्रतीच्यवारुणोदीच्यमध्यवक्त्रेषु पंचसु॥ मंत्रांगानि न्यसेत्पश्चाज्जातियुक्तानि षट्क्रमात्॥ ६॥ कुर्वीत गोलकन्यासं रक्षायै तदनंतरं॥ हृदि वक्त्रांसयो रुर्व्वोः कंठे नाभौ हि पार्श्वयोः ७ पृष्ठे हृदि ततो मूर्ध्नि वदने नेत्रयोर्न्नसोः॥ दोःपत्संधिषु साग्रेषु विन्यसेत्तदनंतरं ८ शिरोवदनहृत्कुक्षिसोरुपादद्वये पुनः॥ हृदि वक्त्रांबुजे रंकमगाभपवरेषय ९ वक्त्रांसहृत्सपादोरुजठरेषु क्रमान्न्यसेत्॥ मूलमंत्रस्य षड्वर्णान्न्यथावद्देशिकोत्तमः १० मूर्ध्नि भालोदरांसेषु हृदये तान्पुनर्न्यसेत्। पश्चादनेन मंत्रेण कुर्वीत व्यापकं सुधीः ११ नमोऽस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने॥ चतुर्मूर्तिवपुश्छायाभासितांगाय शंभवे॥ १२॥ एवं न्यस्तशरीरोऽसौ चिंतयेत्पार्वतीपतिम्॥

ॐ नं तत्पुरुषाय नमः। इति तर्जन्यां। ॐ मं अघोराय नमः। इति मध्यमायां ॐ शिं सद्योजाताय नमः॥ इति कनिष्ठायां। ॐ वां वामदेवाय नमः इति अनामिकायां। ॐ यं ईशानाय नमः। इत्यंगुष्ठयोः॥ पुनस्तानेव वक्त्रादिस्थानेषु प्रोक्तपश्चिमादिवक्त्रेषु च तद्देवन्यस्य षडंगानि न्यसेदिति ततो वक्ष्यमाणस्थानेषु॥ ॥

षडङ्गेष्वेकैकन्यासक्रमेणादशन्यासाः कर्तव्याः॥ कथं॥ हृदि वक्त्रे अंसयोरूर्वोरेकोन्यासः॥ कटौ नाभौ द्विपार्श्वयोः॥ पृष्ठे हृदये एकः। एवमन्यत्रापि वेद

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं॥ रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं। पद्मासीनं समं
तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं॥ विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् १४ तत्वलक्षं जपेन्मंत्रं दीक्षि
तः शैववर्त्मना। तावत्संख्यासहस्राणि जुहुयात्पायसैः शुभैः १५॥ ततः सिद्धो भवेन्मंत्रः साधकाभीष्टसिद्धिदः। देवं संपूजये
त्पीठे वामादिनवशक्तिके १६ वामा ज्येष्ठा ततो रौद्री काली कलपदादिका॥ विकरण्याह्वया प्रोक्ता बलाद्या विकरिण्यपि १७
बलप्रमथिनी पश्चात्सर्वभूतदमन्यथा॥ मनोन्मनी तिसंप्रोक्ताः शैवपीठस्य शक्तयः १८ नमो भगवते पश्चात्सकलादिवदेत्सु
नः॥ गुणात्मशक्तियुक्ताय ततोनंताय तत्परं १९ योगपीठात्मने भूतो नमस्तारादिको मनुः॥ अमुना मनुना दद्यादासनं गिरिजा
पतेः॥२० मूर्तिं मूलेन संकल्प्य तत्रावाह्य यजेच्छिवम्॥ कर्णिकायां यजेन्मूर्तीरीशमीशानदिग्गतं २१ शुद्धस्फटिकसंकाशं दि
क्षु तत्पुरुषादिकाः॥ पीतांजनश्वेतरक्ताः प्रधानसदृशायुधाः २२ चतुर्वक्त्रसमायुक्ता यथावत्तं प्रपूजयेत्। कोणेषु चैव निवृ
त्याद्यास्तेजोरूपाः कलाः क्रमात् २३ अंगानि केसरस्थानि विघ्नेशान्यत्र गान्यजेत्। अनंतं सूक्ष्मनामानं शिवोत्तममनंतरं २४

व्यः॥ विघ्नेशा पात्रांगानि तासां फलम्॥ तानेव दर्शयति॥ अनंतमित्यादिना। तेषां वर्णानाह॥ रक्तेत्यादिना॥ उत्तरोग्रंथः स्पष्टार्थः। मंत्रांतरमाह।

एकंनेत्रमेकरुद्रंत्रिमूर्तिंतदनंतरं॥पश्चाच्छ्रीकंठनामानंशिखंडिनमितिक्रमात्॥२५॥रक्तपीतासितारक्तकृष्णरक्तांजनासितान्॥किरी
टार्पितबालेंदून्पद्मस्थान्भूषणान्वितान् २६ त्रिनेत्रान्शूलवज्रास्त्रचापहस्तान्मनोरमान्॥उत्तरादिपजेत्पश्चादुमांचंडेश्वरंपुनः २७
ततोनन्दिमहाकालौगणेशंवृषभौपुनः॥अथभृंगिरिटिंस्कंदमेतान्पद्मासनस्थितान्॥ २८ ॥स्वर्णतोयारुणश्यामशुक्लेंदुसितपा
टलान्॥इन्द्रादयस्ततःपूज्यावज्राद्यायुधसंयुताः २९ इत्थंसंपूजयेद्देवंसहस्रंनित्यशोजपेत्।सर्वपापविनिर्मुक्तःप्राप्नुयाद्वांछितां
श्रियं ३० द्विसहस्रंजपेद्रोगान्मुच्यतेनात्रसंशयः।त्रिसहस्रंजपेन्मंत्रंदीर्घमायुरवाप्नुयात् ३१ सहस्रवृद्ध्याप्रजपेत्सर्वान्कामानवाप्नु
यात्।आज्यान्वितैस्तिलैःशुद्धैर्जुहुयाल्लक्षमादरात् ३२।उत्पातजनितान्क्लेशान्नाशयेन्नात्रसंशयः॥शतलक्षंजपेत्साक्षाच्छिवो
भवतिमानवः।षडक्षरःशक्तिरुद्रःकथितोशास्ररोमनुः॥ऋषिस्कंदःपुराप्रोक्तोदेवतास्यादुमापतिः ३४ अंगानिपूर्वमुक्तानिसो
ममीशंविचिंतयेत्।वधूकामंत्रिनेत्रंशशिशकलधरंस्मेरवक्त्रंवहंतं हस्तैःशूलंकपालंवरदमभयदंचारुहारंनमामि॥वामोरुस्थं
भगायाःकरतलविलसच्चारुरक्तोत्पलायाहस्तेनाश्लिष्टदेहंमणिमयविलसद्भूषणायाःप्रियायाः ३६ मनुलक्षंजपेन्मंत्रंतत्सहस्रंयथा
विधि॥जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः॥ ३७॥प्राक्प्रोक्तेपूजयेत्पीठेगंधपुष्पैरुमापतिं ॥अंगावृत्तेर्वहिःपूज्याहृल्लेखाद्याय
थापुरा॥३८॥मध्यप्राग्दक्षिणोदीच्यपश्चिमेषुविधानतः॥हृल्लेखागगनारक्ताचतुर्थीतुकरालिका॥३९॥महोच्छुष्माःक्रमादेताः
पंचभूतसमप्रभाः॥पाशांकुशवराभीतिधारिण्योमितभूषणाः॥४०॥यजेत्पूर्वादिपत्रेषुवृषभाद्याननुक्रमात्॥हिमालयाभंवृषभं
तीक्ष्णशृंगंत्रिलोचनम्॥ ४१ ॥सर्वाभरणसंदीप्तंसाक्षाच्छंदस्वरूपिणं॥कपालशूलविलसत्करवालघनप्रभं ॥ ४२ ॥

षडस्र इति॥ मन्त्रलक्ष्मं चतुर्दशाक्षरं। पंचभूत पृथिव्यादि समानवर्णाः। एताः म्गः दरं स्वरं। स्पष्टार्थमपरं॥ प्रासादमंत्रमुद्धरति सांतमिति सांतो हकारः॥
सद्यांतः। औकारः। विंदुरनुस्वारः। एतैर्मिलितं प्रासादमंत्रः। हौं इति। ईशानादि सद्यांतमूर्तिं रंगुल्यादिक निष्ठांगुलीषु क्रमान्न्यसेत्। ता एव मूर्तीर्दर्शयति।

क्षेत्रपालं त्रिनयनं दिगंवरमथार्चयेत्। शूलं टंकाक्षवलयकमंडलुलसत्करं ४३ रक्ताकारं त्रिनयनं चंडेशमथ पूजयेत्॥ शंख
चक्राभयाभीष्टकरं मरकतप्रभं॥ ४४॥ दुर्गां प्रपूजयेत्सौम्यां त्रिनेत्रां चारुभूषणां। कल्पशाखां रत्नघटं दधानां द्वादशेक्ष
णां ४५॥ वालार्काभं शिशुं कांतं षण्मुखं पूजयेत्ततः। नंदिनं पूजयेत्सौम्यं त्रिनेत्रं रत्नभूषणं ४६ परश्वेणवराभीतिधारिणं
श्यामविग्रहं॥ पाशांकुशवराभीतिधारिणं कुंकुमप्रभं ४७ विघ्ननायकमभ्यर्च्य चंद्रार्द्धकृतशेखरं। श्यामं रक्तोत्पलकरं
वामांकन्यस्ततत्करं ४८ त्रिनेत्रं रक्तवस्त्राढ्यं सेनापतिमथार्चयेत्। ततोष्टमातरः पूज्या ब्राह्म्याद्याः प्रोक्तलक्षणाः ४९ इ
न्द्रादिकांल्लोकपालान्दशदिक्षु समर्चयेत्। वज्रादीनि तदस्त्राणि तद्बहिः क्रमशो यजेत् ५० एवं यो भजते मंत्री देवेशं तमु
मापतिं। स भवेत्सर्वलोकानां प्रियः सौभाग्यसंपदां ५१ सांतः सद्यांतसंयुक्तो विंदुभूषितमस्तकः॥ प्रासादाख्यो मनुः प्रोक्तो
भजतां सर्वसिद्धिदः ५२ षड्दीर्घयुक्तबीजेन षडंगविधिरीरितः॥ वामदेवो मुनिश्छंदः पंक्तिर्देवः सदाशिवः ५३ ईशानादी
न्न्यसेन्मूर्तीरंगुष्ठादिषु देशिकः॥ ईशानाख्यं तत्पुरुषमघोरं तदनंतरं ५४ वामदेवाह्वयं सद्यमासां बीजं क्रमाद्विदुः। ओकारा
द्यैः पंचह्रस्वैर्विलोमात्संयुतं वियत्। तत्तदंगुलिभिर्भूयस्तत्तद्बीजादिकान्न्यसेत्। शिरोवदनहृद्गुह्यपाददेशे यथाक्रमात् ५६।

ईशानाख्य इत्यादिना॥ आसां बीजान्याह॥ ॐकाराद्यैरित्यादिना॥ अयमर्थः। हैं ईशानाय नमः। हों तत्पुरुषाय नमः। हुं अघोराय नमः। हिं वामदेवाय नमः। हं सद्यो
जाताय नमः॥ इति बीजानि कथितानि। पुनः शिरः आद्युक्तस्थाने गुह्यस्थाने ग्रीवायां प्राग्दक्षिणोदीच्यपश्चिममुखेषु। तत ईशानाद्याः पंचकं अंगुष्ठादिषु न्यसेत्। मूर्द्धि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अनंतरं षडंगन्यासं कुर्यात् । वक्ष्यमाणक्रमेण । तत्क्रमं यथा । प्रणवपंचकमुच्चार्य हृदयाय नमः । अमृततेजोमालिनि नमः प्राय ब्रह्मशिरसे स्वाहा । ज्वलितशिखा अनादि
बोधाय शिखायै । वज्रिरो हस्ताय कवचाय ॥ सौं हौं वौं अलुप्तशक्तये नेत्रत्रयाय । फट् हुं फट् अनंतशक्तये अस्त्राय फडिति ॥ षडंगन्यासः । पंचवक्त्राय अष्टत्रिं

ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ताः ॥ ततः प्रविन्यसेद्विद्वान् षट्त्रिंशत्कलास्तनौ ५७ ईशानाद्याक्रवः संम्यगंगुलीषु य
थाक्रमात् । अंगुष्ठादिकनिष्ठांतं न्यसेद्देशिकसत्तमः ५८ मूर्द्धास्यहृदयांभोजगुह्यपादेषु ताः पुनः । वक्त्रेषूर्ध्वादि विन्यसेदूर्ध्वां
गानि प्रकल्पयेत् ॥ तारपंचकमुच्चार्य सर्वज्ञाय हृदीरितं ५८ अमृततेजोमालिनि नमः प्रायेति पदं ततः । तदंते ब्रह्मशिरसे शिरो
गं ज्वलितं ततः ५९ शिखिशिखाय परतोऽनादिबोधाय तच्छिखा । वज्रिरो वज्रहस्ताय स्वतंत्राय तनुच्छदं ६० सौं वौं हौं मि
ति संभाष्य परतोऽलुप्तशक्तये ॥ नेत्रमुक्तं स्त्रीपशुं हुं फडंतेनंतशक्तये ६१ अस्त्रमुक्तं षडंगानि कुर्यादेवं समाहितः ॥ पूर्वदक्षिण
पाश्चात्यसौम्यमध्येषु पंचसु । ६२ वक्त्रेषु पंचविन्यसेदीशानस्य कलाः क्रमात् ॥ ईशानः सर्वविद्यानां शशिनी प्रथमा कला ६३
ईश्वरः सर्वभूतानामंगदा तदनंतरं । ब्रह्माधिपतिशब्दांते ब्रह्मणोधिपतिः पुनः ६४ ब्रह्मेष्टदा तृतीया स्यात् शिवो मे सास्तु तत्परा ।
मरीचिः कथिता तंत्रे चतुर्थी च सदाशिवा ६५ अंशुमालिन्यथ परा प्रणवाद्या नमोन्विताः । पूर्वपश्चिमयाम्योदग्वक्त्रेषु तदनंतरं ६६
चतस्रो विन्यसेन्मंत्री पुरुषस्य कलाः क्रमात् । आद्या तत्पुरुषायेति विद्महे शांतिरीरिता ६७ महादेवाय शब्दांते धीमही स्यात्ततः
परं । विद्या द्वितीया कथिता तन्नो रुद्रः पदं ततः ६८ प्रतिष्ठा कथिता पश्चात्तृतीया स्यात्प्रचोदयात् । निवृत्तिस्तत्पराः सर्वाः प्रणवाद्यान

शत्कलान्यासमाह । ईशानेति । ईशानः सर्वविद्यानां शशिन्यै नमः । इति । ऊर्ध्ववक्त्रे ईश्वरः सर्वभूतानां अंगदायै नमः पूर्वमुखे ॥ ब्रह्माधिपतिर्ब्रह्मणेष्टदायै नमः
दक्षिणवक्त्रे ॐ शिवो मे अस्तु मरीच्यै नमः उत्तरवक्त्रे सदाशिवोंऽशुमालिन्यै नमः । पश्चिमवक्त्रे प्रणवादि सर्वत्र । एवं निन्यस्यानंतरं तेष्वेव वक्त्रेषु पूर्व ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पश्चिमयाम्यउदग्वक्त्रेषु यथाक्रमं चतुर्थं तत्पुरुषकलान्यस्तव्याः। कथं। तत्पुरुषाय विद्महे शांत्यै नमो महादेवाय धीमहि विद्यायै नमः तन्नो रुद्रः प्रतिष्ठायै नमः प्रचोदयात्॥ निवृत्त्यै नमः प्रणवः सर्वत्र हृदयाद्युक्तस्थानेषु। अघोरेति कलान्यस्तव्याः॥ कथं॥ अघोरेभ्यः कीर्त्यै नमः॥ घोरेभ्यः मोहायै नमः॥ घोरघोरतरेभ्यः निद्रायै नमः॥ सर्वतेव्याप्त्यै नमः॥ सर्वसर्वेभ्यः मृत्यवे नमः॥ नमस्ते क्षुधायै नमः॥ रुद्ररूपेभ्यः तृषायै नमः॥ सर्वत्र प्रणवादि स्थिरग्रहणयुक्तस्थानेषु वामदेवकलान्यस्तव्याः॥ कथं वामदेवाय नमः रजोवलायै ज्येष्ठाय नमः॥ रक्षायै रुद्राय नमः। रत्यै कालाय नमः॥ पाल्यै कलविकरणाय। संयमिन्यै। व

हृद्ग्रीवांसहृपेनाभौ कुक्षौ पुच्छे च वक्षसि। अघोरस्य कलान्यस्येदष्टौ मंत्री यथाविधिः ७० अघोरेभ्यस्तमा पूर्वमीरिता प्रथमा कला
अथ घोरेभ्य इत्यंते मोहा स्यात्तदनंतरं ७१ घोरांते स्यात्क्षमा पश्चात्तृतीया परिकीर्तिता॥ घोरतरेभ्यो निद्रा स्यात्सर्वतः सर्वतत्प
रा ७२ व्याधिस्तु पंचमी प्रोक्ता सर्वेभ्यस्तदनंतरं॥ मृत्युमूर्तिर्निगदिता षष्ठी नमस्ते अस्तु तत्परं ७३ क्षुधा स्यात्सप्तमी रुद्ररूपेभ्यः
कथिता तृषाः अष्टमी कथिता एता अवाच्यानमसान्विताः ७४ गुह्यमुष्कोरुयुग्मेषु जानुजंघायुगे स्फिचोः॥ कट्यां पार्श्वद्वये वाम
कलान्यस्येत्त्रयोदश ७५ प्रथमा वामदेवाय नमोंते स्याद्रजा कला। स्याज्ज्येष्ठाय नमो रक्षा द्वितीया परिकीर्तिता ७६ स्याद्रु
द्राय नमः पश्चात्तृतीया रतिरीरिता॥ कालाय नम इत्यंते पालिनी परिकीर्तिता ७७ कलकामा पंचमी स्यात्ततो विकरणाय च॥ नमः
संयमनी षष्ठी कथिता तदनंतरं॥ ७८॥ बलक्रिया सप्तमी दिष्टा कला विकरणाय च। नमो वृद्धिरष्टमी स्याद्बलांते च स्थिरा कला ७९ प
श्चात्प्रमथनाया तेन मो रात्रिरुदीरिता। सर्वभूतदमनाय नमोंते भ्रामणी कला ८०॥ ॥ बलक्रियायै विकरणाय वृद्ध्यै बल स्थिरायै प्रमथना

यारात्र्यै सर्वभूतदमनाय यमिन्यै नमः। सोमो हिन्यै नमः। उन्मनायै जरायै सर्वत्र नमस्कारः संवध्यते। आदौ प्रणवश्च पदाद्युक्तस्थानेषु। सद्योजाता कलान्य
स्तव्याः सद्योजातं प्रपद्यामि सिद्ध्यै नमः सद्योजाताय वै नमो नमः। ऋद्ध्यै भवे द्युत्यै नमः। भवे लक्ष्म्यै नमः। नातिभवे मेधायै नमः। भजस्व मां प्रज्ञायै नमः भवप्र
मायै। उद्भवाय स्वधायै नम इति सर्वत्र। प्रणवादि विश्वा एवमष्टत्रिंशत्कलान्यस्तव्याः न्यासः सम्यक् निरूपितः एकः। परशुः रूपाणः खड्गः। दहनशांतमुखवह्निः। स्व

॥ शारदातिलकटीकायां ॥ राम:
८६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नमोंतेमोहिनीप्रोक्तामंत्रज्ञैर्द्वादशीकला ॥ उन्मनायनमः पश्चाज्जराप्रोक्तात्रयोदशी ८१ प्रणवाद्याश्चतुर्थ्यंतानमोंतास्ताः प्र
कीर्तिताः ॥ पादद्वोस्तलनासासुमूर्द्ध्निबाहुयुगेन्यसेत् ८२ सद्योजातोद्भवाःसम्यगष्टौमंत्रीकलाःक्रमात् ॥ सद्योजातंप्रपद्यामि
सिद्धिःस्यात्प्रथमाकला ८३ सद्योजातायवैभूयोनमःस्याद्वृद्धिरीरिता ॥ भवेद्युतिस्तृतीयास्यादभवेतदंनतरं ॥ ८४ ॥ लक्ष्मीश्च
तुर्थीकथितातततोनातिभवेपदं ॥ मेधास्यात्पंचमीप्रोक्ताकलाभूयोभवस्वमां ८५ प्रज्ञासमीरितापष्ठीभवांतेस्यात्प्रभाकलाउद्भ
वायनमः पश्चात्स्वधास्यादष्टमीकला ८६ प्रणवाद्याश्चतुर्थ्यंताःकलाःसर्वानमोन्विताः ॥ अष्टत्रिंशत्कलाःप्रोक्ताःपंचब्र
ह्मपदात्मिकाः ८७ इतिविन्यस्तदेहोसौभवेद्गंगाधरःस्वयं ॥ ततसमाहितोभूत्वाध्यायेद्देवंसदाशिवं ८८ मुक्तापीतपयोदमौक्तिक
जपावर्णैर्मुखैःपंचभिस्त्र्यक्षैरंचितमीशमिंदुमुकुटंपूर्णेन्दुकोटिप्रभं । शूलंटंककृपाणवज्रदहनान्नागेंद्रघंटांकुशान्पाशंभी
तिवरंदधानममिताकल्पोज्वलंचिंतयेत् ८९ ॥ एवंध्यात्वाजपेन्मंत्रंपंचलक्षंमयुग्धुतैः ॥ प्रसूनैःकरवीरोत्थैर्जुहुयातद्दशांशक
म् ॥ ९० ॥ पूर्वोक्तेप्रयजेत्पीठेमूर्तिंमूलेनकल्पयेत् ॥ आवाह्यपूजयेत्तस्यांमूर्त्याद्यावरणैःसह ॥ ९१ ॥ शक्तिंडमरुकाभीतिव
रान्संदधतंकरैः ॥ ईशानंत्रीक्षणंशुभ्रमैशान्यांदिशिपूजयेत् ९२ परश्वेणवराभीतीर्दधानंविद्युदुज्वलं ॥ चतुर्मुखंतत्पुरु
षंत्रिनेत्रंपूर्वतोर्चयेत् ॥ ९३ ॥ अंजनाभंचतुर्वक्त्रंभीमदंष्ट्रंभयावहं ॥ अघोरंत्रीक्षणंयाम्येपूजयेन्मंत्रवित्तमः ॥ ९४ ॥
कुंकुमाभंचतुर्वक्त्रंवामदेवंत्रिलोचनम् ॥ वराभयाक्षवलयकुठारंदधतंकरैः ॥ ९५ ॥ विलासिनंस्मेरवक्त्रंसौम्येसम्यक्सम
र्चयेत् ॥ कर्पूरेन्दुनिभंसौम्यंसद्योजातंत्रिलोचनं ॥ ९६ ॥ हरिणाक्षगुणाभीतिवरहस्तंचतुर्मुखम् ॥ ॥ श्री

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वालेंदुशेखरोल्लासिमुकुटंपश्चिमेयजेत् ९७ निवृत्याद्यास्ततःकोणेतेजोरूपाःकलाःक्रमात्॥केसरेषुषडंगानिपूर्ववत्पूजयेत्सु।
धीः॥ ९८॥ विद्येश्वराननंताद्यान्यत्रेषुपरितोयजेत्॥उमादिकांस्ततोवाह्येशक्राद्यानायुधैःसह ॥९९॥ इतिसंपूज्यदेवेशंभक्त्या
परमयायुतः॥ प्रीणयेन्नृत्यगीताद्यैःस्तोत्रैर्मंत्रैर्मनोहरैः॥ १००॥ तारोमायावियद्बिंदुमनुस्वारसमन्वितं ॥ पंचाक्षरसमायुक्तो
वसुवर्णोमनुर्मतः॥१०१॥ पंचाक्षरोक्तवत्कुर्यादंगन्यासादिकंबुधः ॥वंदेसिंदूरवर्णंमणिमुकुटलसच्चारुचंद्रावतंसंभालो
द्यन्नेत्रमीशंस्मितमुखकमलंदिव्यभूषांगरागं ॥ वामोरुन्यस्तपाणिस्वरुणाकुवलयंसंदधत्याः प्रियायावृत्तोत्तुंगस्तनाग्रेनि
शितकरतलंवेदटंकेष्टहस्तं॥ १०२ ॥ अष्टलक्षंजपेदेनंमनुंवेदविदांवरः॥तत्सहस्रंप्रजुहुयात्पायसान्नैर्घृतप्लुतैः॥१०४।
प्राक्पीठेमूलमंत्रेणमूर्तिंसंकल्प्यपूजयेत् ॥ अंगैरावरणंपूर्वमनंताद्यैरनंतरं॥१०५॥उमादिभिःसमुद्दिष्टंतृतीयंलोकनायकैः॥
चतुर्थंपंचमंतेषामायुधैःपरिकीर्तितम् १०६। एवंप्रतिदिनंदेवंपूजयेत्साधकोत्तमः॥पुत्रमित्रादिसहितांश्रियंप्राप्यप्रमोदते॥ १०७॥
तारंस्थिरासकर्णेन्दुर्भृगुःसर्गविभूषितः॥अक्षरात्मानिगदितोमनुर्मृत्युंजयादिकः॥१०८॥ऋषिःकहोलोदेव्यादिगायत्रीछंद
ईरितं॥मृत्युंजयोमहादेवोदेवतास्यसमीरितः॥१०९॥भृग्वर्णादीर्घयुक्तेनषडंगानिसमाचरेत्॥ चन्द्रार्काग्निविलोचनंस्मि
तमुखंपद्मद्वयांतःस्थितंमुद्रापाशमृगाक्षसूत्रविलसत्पाणिंहिमांशुप्रभं॥ कोटीरेन्दुगलत्सुधाप्लुततनुंहारादिभूषोज्ज्वलं
कांत्याविश्वविमोहनंपशुपतिंमृत्युंजयंभावयेत्॥ १११॥ग्रहालक्षंजपेन्मंत्रंतद्दशांशंविशालधीः ॥जुहुयादमृताखंडैः
शुद्धदुग्धाज्यलोलितैः ११२॥शैवेसंपूजयेत्पीठेमूर्तिंमूलेनकल्पयेत्॥ अंगावरणमाराध्यपश्चाल्लोकेश्वरान्यजेत् ॥११३।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तरस्त्राणितितोवात्येपूजयेत्साधकोत्तमः ॥ जपपूजादिभिः सिद्धे मंत्रेस्मिन्मनुनाक्रमात् ॥ ११४ ॥ कुर्यात्प्रयोगान्कल्पोक्तानभी
ष्टान्फलसिद्धये ॥ दुग्धप्रोक्तैः सुधाखंडैर्मंत्रीमासंसहस्रकं ॥ ११५ ॥ आराधितेयो जुहुयाद्विधिवद्विजितेन्द्रियः ॥ संजुष्टः शंकर
स्तेनसुधाप्लावितविग्रहः ॥ ११६ ॥ आयुरारोग्यसंपत्तिपशः पुत्रान्विवर्द्धयेत् ॥ सुधावरोतिलापूर्वायवः सर्पिःपयोहविः ॥ ११७
इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरं ॥ क्रमाद्दशांशतोनित्यमष्टोत्तरमतंद्रितः ॥ ११८ ॥ सप्ताधिकान्द्विजान्नित्यंभोजये
न्मधुरान्वितं ॥ विकारातु गणंमंत्रीवर्द्धयेद्धोमवासरान् ॥ ११९ ॥ होतृभ्योदक्षिणान्दत्त्यादरुणागाः पयस्विनीः ॥ गुरुंसं
प्रीणयेत्पश्चाद्धनाद्यैर्देवताधिया ॥ १२० ॥ अनेनविधिनासाध्यं कृत्याद्रोहज्वरादिभिः ॥ विमुक्तः सुचिरंजीवेच्छरदांशतमं
जसा ॥ १२१ ॥ अभिचारेज्वरेतीव्रेघोरोन्मादेशिरोगदे ॥ असाध्यरोगक्ष्वेडादौ महादाहेमहाभये ॥ १२२ ॥ होमोयंशांतिदः प्रोक्तः
सर्वसंपत्प्रदायकः ॥ द्रव्यैरेतैः प्रजुहुयात्रिजन्मसुयथाविधि ॥ १२३ ॥ भोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान्वेदपारगान् दीर्घमा
युरवाप्नोतिवांछितांविंदतिश्रियं ॥ १२४ ॥ एकादशाहुतीर्नित्यंदूर्वाभिर्जुहुयाद्बुधः ॥ अपमृत्युजिदेषः स्यादायुरारो
ग्यवर्द्धनः ॥ १२५ ॥ त्रिजन्मसुसुधावल्लीकाश्मरीवकुलोद्भवैः ॥ समिद्वरैः कृतोहोमः सर्वमृत्युगदापहः ॥ १२६ ॥ सि
द्धान्नैर्विहितोहोमोमहाज्वरविनाशनः ॥ अपामार्गसमिद्धोमः सर्वामयविषूदनः ॥ १२७ ॥ प्रणवरचितनालंमंत्रमध्या
यपत्रं भृगुविलसितमध्यंपद्मयुग्मंतदंतः ॥ कृतवसतिममेशंवर्णनिर्यत्सुधार्द्रंकलयतुहृदिनित्यंसर्वदुःखप्रशान्त्यै ॥ १२८ ॥
॥ ॥

॥यंत्राढ्येति॥ अष्टपत्रं पद्मं कृत्वा तन्मध्ये वक्ष्यमाणमंत्रं लिखित्वा तदुपरि सलक्षणं कुंभोदकं पूर्णं वरे तोपमं तं दुकूलाभ्यां वेष्टितं कलशं सुवर्णरजतताम्रमृण्मया
दीनामपि अन्यतमं यथाविभवं विन्यस्य तस्मिन्देवं संपूज्य षोडशोपचारैः अगुरुस्तेनोदकेनाभिषिंचेत्॥ प्रियं शांतं साध्यं विनीतं दत्तदक्षिणं निजपुत्रं वा गुणवंतं॥
प्राक्प्रत्यक्दक्षिणोदग्विधिवदभिलिखेत्स्यष्टरेखाचतुष्कंकोणेयच्चकुलयतंवलयपुगगतंमध्यपूर्वेतदंत्यं॥ मंत्रस्यार्णा
नपरस्तात्वसुपदविवरेषष्टवर्णानलिखित्वाश्लोद्यनद्वादशार्णंविधिवदभिहितंप्रेतराजस्ययंत्रम्॥ १८ ॥ १९॥

पद्मंविलिख्यतत्कर्णिकायांमकारंतत्कोष्ठद्वयेसाध्यनामममकारंकोणचतुष्टयेङञणजइतिलिखेत्॥ पत्रेषुधूंधूंधूमावतीस्वाहा॥ इतिलिखेत्॥ वृताद्व
दिघुघुटिकादिनावेष्टयेत्॥ तदुपरिवायुमंडलत्रयेणवेष्टयेत्॥ तत्प्रेतवस्त्रेणधत्तूररसेनकाकपक्षेणलिखितं श्मशानेप्रांतनिर्हितंशत्रूणांद्वेषकरं॥
घुर्घुटिकमंत्रमुद्दइतिपूर्वमित्यादिना॥ प्राक्प्रत्यगिति॥ नवकोष्ठानिलिख्यकोणचतुष्केशूलानि॥ मध्यकोष्ठेवलयपुगगतंमध्यपूर्वे ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदंतमिति॥ मध्यादारभ्य यमराजस्तोकं वलपद्वयं यथा भवति तथा लिखेत्॥ अवशिष्टाष्टकोष्ठेषु अग्रतः प्रदक्षिणं वक्ष्यमाणं धूमांधकारावेष्टनं स्थलस्थानेषु वक्ष्यमाणाद्द्वादशाक्षरेणावेष्टयेत्॥ धूमांधकारमंत्रमाह॥ उक्तेति॥ द्वादशाक्षरमाह॥ प्रणवमित्यादिना॥ विषवृक्षः कारस्करः॥ अथ विषहिंसलवणगृह धूमेत्यादिना ग्रंथोक्तः॥ एतद्यंत्रमुक्तफलदं॥ एकाशीतीति॥ एतावरिता पटले स्पष्टीकृतम्। चतुःषष्टीति॥ एतदपि पूर्वं गे व्याकृतम् आख्यातम् जंवुक्तीम

यमराजसदोमेयपयमेदोरुणयोदययदियोनिरयक्षेपयपक्षेपच्च निरामय उक्तो धूमांधकाराय स्वाहेत्यष्टाक्षरो मनुः॥ १९॥ प्रणवं ह्रींततो दंष्ट्रातत्परं विकृतो ततः॥ आननायव धूर्वह्रेमंत्रो यं द्वादशाक्षरः॥ २०॥ विषवृक्षस्य फलके नृचर्मणि पटे यवा॥ आलिख्याष्टविषै रेतत् श्मशाने निखनेत् निशि २१ ज्वरेणा महता विष्णोमूर्छाकुलितमानसः॥ रिपुर्गच्छति पक्षेणायमलोकं न संशयः २२ एकाशीतिपदेषु मध्यदहने साध्यं लिखेत् हूं पुनः॥ क्ष्नूं भ्रूं ब्रूमितिदिग्गतासु विलिखेत् वीजानि पंक्तिषथ २३ शिष्टेषीशनिशाच्चरादिविलिखेत् कालो मनुपंक्तिशस्तद्वात्त्येयमवीतमग्निपवनावीतं च यंत्रं लिखेत्॥ कालीमाररमालीकालीलमोस्सस्समोनली २४ मामोदेततदेमोमारस्ततत्तलतस्सरा। कालीमनुरयं प्रोक्तः कालरात्रिः स्ववैरिणां २५ यमामारटमामा यमाटमाटटमोटमा॥ वामो भूरिरिभूमोवाटटरीखखरीटट॥ २६॥ यमात्मकोयमाख्यातः श्लोको वैरिविनाशनः॥ लिखेदष्टविषांगारनिंवनिर्यासकज्जलैः॥ २७॥ निग्रहाख्यमिदं यंत्रं काकपक्षेण कल्पिते॥ विभीतवृक्षे वल्मीके श्मशाने वा चतुष्पथे॥ २८॥

ध्येति॥ अष्टदलं पद्मं लिखित्वा जंभादिकां विद्यां वक्ष्यमाणं दिक्पत्रेषु कोणपत्रेषु देवीचतुष्टयं स्वनामकं बहिः पाशांकुशाभ्यां वृतं उक्तफलदम् जंभादिविद्यां प्रदर्शयति जंभे जंभिनीत्यादिना॥ अयमेव॥ जंभे जंभिनि स्वाहा॥ मोहे मोहिनि। अंधे अंधिनि रुंधे रुंधिनि स्वाहेत्यंतेति सर्वत्र ॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवं जंभादिविद्येति हित्वा। काममिति। पूर्ववत्पद्मं लिखित्वा तदंतस्थितं तु ऊरुमध्यगतं कामबीजं विहाय तत्स्थाने शांतिं ईकारं लिखेत्। नृकपाले संध्यासुतापयेत्
॥ उक्तफलसिद्धिः॥ पूर्ववत् लिखित्वा वर्म फट्कारे ईकारं लिखेत्। वह्निवायुपुटं नाम रेफयकारौ लिखित्वा तन्मध्ये साध्यनाम विभीतकतरुफलके विषसहित
रुधिरेण काकपक्षेण लिखित्वा चत्वरे निखनेत्॥ विद्वेषणकरं॥ पूर्ववल्लिखित्वा रेफस्थाने यकारद्वयं लिखित्वा मध्ये लकारभूगृहेणावीतं रवि काष्ठे पेनिक्षि

दक्षिणास्येऽनिले मंत्री निखनेद् ईशात्रके॥ सर्वथा शत्रुरेतेन सम्राहान्मरणं व्रजेत् २९ निशृत्स्यते महारोगैः पतितो वा भवेदसौ
शिलायामिष्टिकायां वा चक्रमेतत्प्रकल्पितं॥ ३०॥ मर्कटी विषदंडीभिः समालिप्तमधोमुखं॥ यंत्रं रात्रौ खनेत्तत्र भूयो भूयोऽ
शुभं भवेत्॥ ३१॥ लिखेच्चतुःषष्टिपदेषु कालीमीशादिकन्यादिपमात्मकेन। श्लोकेन संवेष्ट्य कुशानुवायुवीजावृतं यंत्रमिदं
विदध्यात्॥ ३२॥ लिप्तं विषमयी दंडीमर्कटीभिरधोमुखं॥ लिखनेत्पत्रतत्र स्यात् नृणामुच्चाटनं सदा ३३ सस्यहानिमनावृष्टिं
वा नाशं करोति तत्॥ आख्यां तु वरुमध्यतः स्मरगतामालिख्य जंभादिकां विद्यां दिशातपत्रकेषु अथ लिखेत् देवीं दलेषु स्मरं ॥
कोणस्थेषु सनामकं बहिरतः पाशांकुशाभ्यां वृतं यंत्रं वश्यकरं ग्रहादिभयहृत् क्षुद्राभिचारापहम् ३५ जंभे जंभिनि ठद्वंद्वं मोहे मो
हिनि ठद्वयं॥ अंधे अंधिनि ठं द्वंद्वं रुधे रुंधिनि ठद्वयं ३६ हत्वा कामं लिखेत् शांतिः यंत्रेऽस्मिन्नृकपालके॥ संध्यासु तापयेदेतद्
द्वैः साध्यं वशं नयेत्॥ ३७॥ ॥ यंत्रं॥ स्तंभनकृत्। पूर्ववल्लिखित्वा लकारस्थाने यकारं लिखित्वा उक्तकर्म कुर्वन् उक्तफलसिद्धिः पूर्ववल्लि
खित्वा वायुबीजस्थाने फट्कारं यथोक्तफलसिद्धिः यथा पूर्ववल्लिखित्वा फट्कारस्थाने उकारं तत्साध्यं पर्णसंपूर्णं लोहे च यसमायुक्तं उक्तफलदं॥
पूर्ववल्लिखित्वा उकारं विहाय तत्र गकारं लिखेत्। सकारेण वृतं बहिः पाशांकुशाभ्यां वीतं॥ ठपरेणाऽङ्कारेण वृतं पुनर्भूपुरेण लकारैर्युतं। तद्बहिर्विसर्गयु
क्तमातृकाक्षरैर्वृतं॥ तत्सर्वं क्रमेण वेष्टितं कौशेयनिर्मितं रक्षिकामध्यस्थं॥ यंत्रमुक्तफलदम्॥ ० ॥ ० ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हित्वा शांतिं लिखेद्धर्मं परेवानस्त्वर्मणि ॥ वह्निवायुगृहावीतं श्मशानस्थं रिपून् हरेत् ॥ ३८ ॥ त्यक्त्वा वर्म लिखेद्दत्तं फलके ऽस्मत रुद्भवे
॥ वह्निवायुपुतेनाम विषाढ्यरुधिरेणातत ॥ ३९ ॥ चत्वरे निखनेत् जप्तं विद्वेषं कुरुते मिथः ॥ हित्वा रेफ पकारौ द्वौ लकारं मध्यतो लि
खेत् ॥ ४० धरापुरेणावीतं तत दिक्षिकांत नि वेशितं ॥ सर्वेषां स्तंभनं कुर्य्यान्नात्र कार्या विचारणा ॥ ४१ ॥ हित्वा लकारं तन्मध्ये वायु
वीजं समालिखेत् ॥ विषरक्तमशी काकपुरीषे ध्वजवाससि ॥ ४२ ॥ श्मशाने निहितं कुर्यात् कुलोच्छेदं स्ववैरिणां ॥ मुक्त्वा वायुमयं वी
जं तत्र फट्कारमालिखेत् ॥ ४३ ॥ परेतवस्त्रे काकस्य रुधिरेण यथाविधि ॥ ईप्सिते निखनेत् स्थाने विद्वेषं कुरुते नृणां ॥ ४४ अस्य वी
जमपास्यास्मिन् ल्रूंकारं सासी संपुटं ॥ विलिखेत् पत्रमेतत्स्यात् लोहत्रयसमावृतं ॥ ४५ ॥ सर्वरोगप्रशमनं कृत्याद्रोहादिशांतिदं ॥ वि
हाय वीजं ल्रूंकारं ग्लौंकारं तत्र संलिखेत् ४५ क्षकारेणावृतं वाह्ये पाशांकुशवृतं पुनः ॥ ठपरेणावृतं भूयो भूमिमंडलमध्यगं ॥ ४६ ॥ ल
कारैर्विंदुसंयुक्तैर्वेष्टितं तद्बहिः क्रमात् ॥ संगीतमातृकावीजं सर्वं वृत्तेन वेष्टितं ॥ ४७ ॥ कौशेयकर्प्पटे कुंकुमविष्ठकाद्यमध्यगं ॥ सेनाग्रे
निखनेत् पत्रं स्तंभनं कुरुते ध्रुवं ४८ मध्ये श्रीनरसिंहवीजमथ तन्वाह्ये स्वरान् केसरे चारी द्वन्द्वयमं द्रदिक्षु विलिखेत् मध्ये मजंगा
रुडं ॥ अंतस्थान् मरुदग्निनिर्ऋतिशिवेष्वालिख्य वर्णावृतं यंत्रं सर्गिभिरष्टभिः परिवृतं संवर्तकैर्गारुडं ॥ ५० ॥ संवर्तकोनेत्रयुतः
पार्श्वस्तारोग्निसुंदरी ॥ गारुडोमंत्रराख्यातो विषद्वयविनाशनः ॥ ५१ ॥ स्मरन् गरुडमात्मानं मंत्रमेनं जपेन्नरः ॥ विषमालोकनेनैव
हन्यात् नागकुलोद्भवं ५२ मध्ये वर्णान् भगस्थान् विलिखतु विधिवत् साध्यनाम्ना समेतान् किंजल्के षट्स्वराः स्युर्वसुदलविवरेष्वालि
खेन्मध्यवीजं ॥ ५३ ॥ कल्याणीन् केसरेषु द्विगुणावसुदले घर्पयेत् । मध्यवीजं यंत्रं संजीवनाख्यं सलिलपरगतं स्युद्रोगापहारि ५४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मध्येनृसिंहेति॰ वसुपत्रं यंत्रकं कृत्वा॥ तन्मध्ये नृसिंहवीजं खरकेसरं पश्चिमोत्तरपाम्य पूर्वपत्रेषु मध्ये च यथाक्रमं गरुडपंचाक्षरं लिखेत्॥ वायुवह्निराक्षसेश्व
रपत्रेषु पल्लवान्लिखेत्॥ वहिर्वर्णैर्वेष्टयेत्॥ तद्वहिरष्टाभिः संवर्तकैः क्षैः परिवृतं यंत्रमुक्तफलदं॥ गरुडमंत्रमाह॥ ॥ संवर्तकोनेत्रइति संवर्तः क्षका
रः॥ ततः क्षिः इति प्रथमाक्षरो मंत्रः॥ मध्ये वर्णानिति। अष्टदलपद्मं तत्कर्णिकायां सकारं तन्मध्ये साध्यनाम सहितं पत्रवर्णान्विलिख्य केसरेषु स्वरानाप
त्रेषु कर्णिकागतं वीजं। वहिः षोडशदलं चाककारादिवर्णकेसरे तत्पत्रे षु पिमध्य वीजं वहिरापमंडलं एतद्यंत्रमुक्तफलदं॥ मध्ये पिंडमिति॥ वसुकमलं

मध्ये पिंडमथो दलादिषु लिखेद्धारीशताराधिपप्रेताधीश्वरशत्रुदिक्षु वियते र्मध्ये च वर्णांल्लिखेत्॥ यादीन्मारुतवह्निराक्ष
साशिवेष्वर्णान् वहिर्वेष्टयेत्॥ काद्यैर्वामविलोचनेन कलितं पिंडाख्ययंत्रं परं॥ ५६॥ मत्स्वरेंद्वेन शांति संयुत स्वतुराननः
पिंडवीजमिदं प्रोक्तं उक्तं सर्वार्थसाधकं॥ ५७॥ वीजेनानेन संजप्तं यंत्रं रक्षाकरं परं॥ आयुरारोग्यजननं लक्ष्मीसौभाग्यवश्यदं
चौरसर्पमृगव्यालभूतामयनिकृंतनं॥ गर्भरक्षाकरं स्त्रीणां पुत्रदं क्षुद्रनाशनं। ५९॥ धृतं मूर्ध्नि करोत्येतत्लोकवश्यमनुत्तमं
॥ मध्ये तोयगृहे लकारविवरे सार्णाढ्यसाध्यं लिखेत्पत्रेषु ष्टसुहंसमंत्रमभितोहं सार्णसंवेष्टितं॥ यंत्रं भूमिगृहेण वेष्टितमि
दं मूर्ध्नि सदा धारितं हन्यात्क्षुद्रमहाज्वरामयरिपून्दद्यात्यशः संपदः॥ ६१॥ ॥ लिखित्वा मध्ये पिंडवीजं पश्चिमोत्तरदक्षिणा

पूर्वपत्रेषु मध्ये च यथाक्रमं गारुडाक्षराणि मरुत्वह्निनैर्ऋत्येशानपत्रेषु यथाक्रमं यादीन्। वहिर्वेष्टयेत्कादिभिः॥ यमलोचनईकारेणायुक्तः॥
पिंडयंत्रमुक्तफलदं॥ पिंडवीजमुद्धरति॥ मत्स्वरेंद्वेति॥ औकारेणाऽनेनखरेफसंयुतः॥ अजेशः ऊकारः॥ चतुराननः जकारः॥ एतैः पिंडितं
पिंडवीजं॥ ततः क्षेत्रेति भवति॥ मध्ये तोयमिति॥ अष्टदलपद्मं तन्मध्ये आपमंडलं॥ तत्र तकारं तन्मध्ये सार्णं संयुक्तम्॥ साध्यनामापत्रेष्वष्टसुहंसमंत्रं॥
अभितो वर्णवेष्टितम्॥ भूगृहेण च यंत्रं पयोक्तफलदम्॥ श्री॥ ॰ श्री॥ ॰ श्री॥ ॰ ॥ श्री॥ ॰ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥अष्टपत्रपद्ममध्ये एकारं ससाध्यं पत्रेषु पितदेव उपरिवेष्टनमपि तद्वद्रयहेणापि। वेष्टितं॥ यंत्रं वश्यदं॥ मध्येति। भूगृहमध्ये हं वैलकारमध्ये साध्यं वहिर
ष्टपत्रेषु णांतं तकारं नामवर्णवीतं लिखेत्॥ पुनर्भूर्विंवेन वेष्टयेत्॥ वात्ये वकारेण च॥ यंत्रं ज्वरघ्नं॥ टांत इति। अष्टोतिपत्रकमलमध्ये नामगर्भितं टकारे सकारवि
वरे लिखेत्॥ मृत्युंजयत्र्यक्षररुद्रम्॥ अष्टपत्रेषु साध्यनाम पूर्ववत्॥ स्वरकेसरे षोडशपत्रे पूर्ववत् नाम लिखेत्॥ तद्बाह्ये द्वात्रिंशद्दलेपि तथैव। तत्के —

एकारमध्ये विलिखेत्ससाध्यं तमष्टपत्रेषु पुनर्विलेख्य॥ संवेष्टयेत्तेन धरापुरस्थं यंत्रं भवेत् वश्यकरं नराणां ॥६२॥ ताम्र
पात्रे समालिख्य यंत्रमेतत्प्रपूजयेत्॥ वशयेत्सकलान्मर्त्यान् नात्र कार्या विचारणा॥ ६३॥ मध्ये भांतं भृगुविनिहितं नामवर्णैः
प्रवीतं टांतं लांतान्वितमथ वलिखेदष्टपत्रेषु भूयः ६४ भूविंवस्थं निगदितमिदं साधु संजीवनाख्यं शस्त्रोद्भूतं भयमपहरेत्
धार्यमाणं भुजेन ६५ वर्णावृतं साध्ययुतं सकारं टांते लिखेदष्टदलेषु हंसं॥ आवेष्टयेदं वगृहेण वात्ये लांतावृतं यंत्रमिदं ज्व
रघ्नं ६६ टांते नाम लिखेत्सकारविवरे मृत्युंजयत्र्यक्षरी॥ रुद्रं तद्बहिरष्टपत्रविवरे साध्याह्वयं पूर्ववत्॥ ६७॥ अचकिंजल्क
युते वसुद्वयदलेप्यथ तथैवाह्वयं द्वात्रिंशद्दलपङ्कजे पिच तथा काद्यार्णयुक् केसरे॥ ईकारेण समावीतं यंत्रं मृत्युंजयाह्वयं ६८
सर्वरोगाभिचारघ्नं सर्वसौभाग्यसिद्धिदं॥ ग्लौं रुद्रं प्रणवद्वयं परिलिखेत्साध्यस्य नामान्वितं॥ वात्ये भूपुरमष्टवज्रविलसत्ता
रं लिखित्वा पुनः॥ ६९॥ संकोणेषु दिशासु लं प्रविलिखेत्पाशांकुशात्र्यक्षरी वीतं स्तंभनयंत्रमावृतिलसज्जंभादिविद्याष्टकं ७०

ग्लौ =

सरेषु कादिवर्णान्। ईकारेण समावीतं। यंत्रं भक्तफलदं॥ सौं रुद्रमिति। भूपुरमध्ये प्रणवद्वयं॥ तत्पार्श्वयोः ग्लौं द्वयं साध्यनामसहितं। वहिरष्टवज्रम
ध्ये प्रणवयुक्तं॥ पुनर्भूपुरकोणेषु लकारं॥ दिक्षु लं। पाशांकुशत्र्यक्षरवीतं। वहिः। तद्बहिर्जृंभाष्टकमंत्रवीतं। स्तंभवीजवृतं॥ जंभाष्टकमुद्धरति॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जृंभेवह्नीत्यादिना॥ उक्तार्थमेव॥ पूर्ववल्लांतेनामेति॥ भूपुरं लिखित्वा मध्ये साध्यनामसहितं सकारं तद्बाह्ये षट्सु दिक्षु तथैव लिखित्वा सर्पद्वयमन्योन्यरुद्धं लि
खेत्॥ वहिस्तन्मु खयोर्मध्ये साध्यनामाक्षराणि॥ विभीतफलके लिखितं यंत्रं शिवनिर्माल्ये लिखितं द्विषां वाग्बंधनं॥ विरुद्धे साध्याख्यमिति॥ अष्टपत्र

जृंभेवह्निवधूः पूर्वं पश्चाज्जृंभिनि ठद्वयं॥ मोहे पावकजायास्यात्ततो मोहिनि ठद्वयं॥ अंधे हुतभुजो जायाततोंऽधिनि ठयुग्मकं॥ रु
द्धे कृशानुपत्नी स्यात् रुंधिनि द्विठसंयुतं॥ ७२॥ लांतेनाम विलिख्य दिक्षु विलिखेत् भूपस्तमेवाष्टसु कोणी विंवमयोनगेंद्रभुज
गावन्योन्यवद्धौ लिखेत्॥ आस्यांतन्मुखयोर्विभीतफलके यंत्रं समायादितं निर्माल्ये निहितं सदा वितनुते वाचां द्विषां स्तंभनं॥
॥७३॥ साध्याख्यांकवचं लिखेत् वहिरयो दिक्पत्रमध्येषु तत् ग्लौं मन्येषु महीपुरस्य विलिखेत्कोणे धुरांतान्वितं॥ वज्रेषष्ठ
सुवर्मतोयपुरं भूविंवमध्ये स्थितं यंत्रं रात्रिविनायकांतरगतं न्यस्येत्कुरावद्वये॥ ७४॥ रहस्यस्थाननिक्षिप्तं पूजितं प्रतिवा
सरं॥ स्तंभनं कुरुते वाचां सेनादीनां च वैरिणां ७५ कृत्वा रेखाष्टकमृजु पुनस्तिर्यगालिख्य षट्कं वात्याकृत्या लिखतु विधि
वत् विंदुयुक्तं सकारं ७६ अंतःपंक्तौ लिखतु धरणी शिष्टके षट्त्रयाणां॥ कृत्वा नामप्रथितमुदितं यंत्रमेतज्ज्वरघ्नं ७७ यंत्रमे
तत्समभ्यर्च्य दत्वा भूतवलिं ततः॥ साध्यस्य मूर्ध्नि वध्नीयात्सर्वज्वरविमुक्तये ७८ तारं लिखेद्धृदि परस्य युग्मे तत्पार्श्वयो
र्लार्णमयाग्निवीजं॥ कोणेषु पूर्वापरयोश्च यंत्रं पाशांकुशा वीजमिदं ज्वरघ्नं ७९ यंत्रमभ्यर्च्य मंत्रेण तारपाशांकुशात्मना॥
निवध्नीयाज्ज्वरार्तस्य हस्ते दोर्ज्वरशांतये॥ ८०॥ पिंडे लिखेत् नाम ससर्गदांत विदर्भितं सस्वरकेसराढ्यं॥ रान्ताष्टपत्रं नमु
धापुरस्थं कांतिप्रदं यंत्रमिदं ज्वरघ्नं॥ ८१॥ ९९ पद्मं लिखित्वा हुंकारमध्ये साध्यनाम लिखित्वा दिक्पत्रेषु तद्देवाग्लौं॥ अन्यपत्रेषु तदु
परिभूविंवकोणेषु लिलि तं रं अरिपर्यंतत्यंत्रेषु हुंकारं तदुपरि॥ अथ मंडलतद्बहिर्भूविंवं एतद्यंत्रं निशाविनायकमध्ये क्षिपेत्॥ ० ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ताराविलुप्तपञ्चलद्विठवर्णवीतायंतांतरेविलिखिताविधिनैवमाया॥साध्यावृताबहिरथोवदनाद्दवेन्द्रैर्यंत्रेशिशोरुरुदितंविनिहं
तिसद्यः॥८३॥व्योमार्णमालिख्यसविंदुमाख्याविदर्भितंस्त्रत्रपयुक्तकोणे॥वसुंधरागेहयुगेनिवद्धंयंत्रंसमस्तज्वरनाशनंस्यात्
सांधौनामविदर्भितंपरिलिखेत्वात्येष्टपत्रेभूर्जंपद्मंस्यादथकादिशांततिपिमतन्निशद्दलेवात्यतः॥वीतंतोयपुरेणयंत्रमुदितं
भूर्जोदरेकल्पितंभूतव्याधिमहाज्वरप्रशमनंकृत्यापहंश्रीप्रदं॥चक्रेचतुःषष्टिपदेषुविंदून्नंतस्यवर्णान्क्रमशोविलिख्य॥रे
खाशिरःकल्पितशूलयुक्तेयंत्रेशपीतज्वरशांतिहेतोः॥८५॥युटितभूमिपुरद्वयमध्यतःप्रविलिखेत्वनितांगिरिजापतेः॥प्रणव
वमस्यलिखेत्वसुकोणगंज्वरहरंपरमेतदुदीरितं॥८६॥वारीशंलिखेन्नामशशांकमध्येरांतंबहिर्भूमिपुरंपुरस्तात्॥वृत्तावृतंयं
त्रमिदंसमुक्तंवश्यापनंदृणांसकलार्तिशांत्यै॥८७॥सस्वस्तिकेदहनगेहयुगेससाध्यांमायांलिखेत्ललितनागलतादलांतः॥ पा
शांकुशावृत्तमिदंनिशितापयेत्योमंत्रंजपन्व्रजतितंस्वयमेवसाध्यः॥८८॥षट्कोणेनिजसाध्यनामसहितांमायांलिखेन्मध्यत
स्तत्कोणेषुविदर्भितामभिलिखेत्शक्तिंस्वसाध्याख्यया॥वात्येभूमिपुरंसकोणमदनंतांबूलपत्रेकृतंजप्तंखादयतुःप्रियांनि
शिभवेत्सातस्यवश्याचिरं॥८९॥शक्तीनामलिखेत्चतुर्भिरभितोवीजैःसमावेष्टयेत्॥वीतंशक्तिमनोभवांकुशमहेन्द्रोंवीज
कैः पिसृजे॥रूपेसाध्यनरस्यजप्तपवनेत्रिस्वादुनाभर्ज्यतत्वादेत् तस्यवशंप्रयातिनियतंसाध्यःसदादासवत्॥ ९०॥ कामं
लिखेत्साध्ययुतंसरोजेस्वरोल्लसत्केसरवर्गपत्रे ॥ उदीरितंमन्मथयंत्रमेतत्सौभाग्यलक्ष्मीविजयप्रदापि ॥ ९१॥ का
श्मीररोचनालाक्षामृगेभमदचन्दनैः॥विलिखेत्हेमलेखन्यायंत्राण्येतानिदेशिकः॥९२॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

भूमिस्पर्शं शवस्पर्शं दग्धं निर्माल्यसंगतं ॥ विशीर्णं लंघितं मंत्री यंत्रं जातु न धारयेत् ॥ ९३ ॥ अथानंदमयीं देवीं शब्दब्रह्मस्वरूपिणीं ।
॥ ईडे सकलसंपत्त्यै जगत्कारणमंबिकां ॥ ९४ ॥ आद्यामशेषजननीमरविंदयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयंतीं ॥ सृष्टिस्थि
तिक्षयकरीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाप्यहमंबिके त्वां ॥ ९५ ॥ पृथ्व्या जलेन शिखिना मरुतांबरेण होत्रेन्दुना दिनकरे
ण च मूर्तिभाजः ॥ देवस्य मन्मथरिपोरपि शक्तिमत्ताहेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ ९६ ॥ त्रिःस्रोतसः सकललोकसमर्च्चि
तायां वैशिष्ट्यकारणमवेमि तदेवमातः ॥ त्वत्पादपंकजपरागविचित्रितासु शंभोर्जटासु सततं परिवर्त्तनं यत् ॥ ९७ ॥ आनं
दयेत्कुमुदिनीमधिपः कलानां नान्यामिनः कमलिनीमथ नेतरां वा ॥ एकस्य मोदनविधौ परमेकमीष्टे त्वं तु प्रपंचमभिनं
दयसि स्वदृष्ट्या ॥ ९८ ॥ आद्याप्यशेषजगतां नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि ॥ त्रय्याः प्रसूरपि तया
न समीक्षितासि ध्येयासि गौरि मनसो न पथि स्थितासि ॥ ९९ ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवमवाप्य
निजेन्द्रियाणां ॥ नाभ्यर्च्चयंति जगतां जननि ये त्वां निःश्रेणिकाग्रमधिरुह्य पुनः पतंति ॥ १०० ॥ कर्पूरचूर्णहिमवा
रिविलोलितेन ये चन्दनेन कुसुमैश्च सुजातगंधैः ॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनाधिभुवः प्रथंते
१०१ आविश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विश्वं ॥ विद्युल्लतावलयविभ्रममुद्वहंती पद्मानि पंच वि
दलय्य समश्नुवाना १०२ त्वन्निर्गतामृतरसैरभिषिक्तगात्री मार्गेण तेन विलयं पुनरप्यवाप्ता ॥ येषां हृदि स्फुरसि जातु न ते भवेयु
र्मातर्महेश्वरकुटुंबिनि गर्भभाजः ॥ १०३ ॥ आलंबिकुंतलभरामभिरामवक्त्रामापीवरस्तनतटीं तनुवृत्तमध्याम् ॥ ॥०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चिंताक्षसूत्रकलशालिखिताढ्यहस्तामावर्तयामिमनसातवगौरिमूर्तिं॥ १०४॥ आस्थाययोगमवजित्यचवैरिषट्कमाबध्य
चेंद्रियगणंमनसिप्रसन्ने॥ पाशांकुशाभयवराढ्यकरांसुवक्त्रामालोकयंतिभुवनेश्वरियोगिनस्त्वां॥ उत्तप्तहाटकनिभाकरि
भिश्चतुर्भिरावर्जितामृतघटैरभिषिच्यमाना॥ हस्तद्वयेनरुचिरेनलिनेवहंतीपद्मापिसाभयवराभवसित्वमेव १० श्रेष्ठाभि
रूपविविधाप्रथवाहिनीभिर्दोर्वल्लरीभिरधिरूढ्यमृगाधिराजं॥ दूर्वादलद्युतिरमर्त्यविपक्षपक्षान्न्यक्कुर्वतीत्वमसिदेविभवा
निदुर्गा॥ १०७॥ आविर्निदाघजलशीकरशोभिवक्त्रांगुंजाफलेनपरिकल्पितहारयष्टिं॥ पत्रांशुकामसितकांतिमनंगतंत्रामाद्यां
पुलिंदतरुणीमसकृत्स्मरामि॥ १०॥ हंसैर्गतिक्वणितनूपुरदूरदृष्टैर्मूर्तैरिवाढ्यवचनैरनुगम्यमानौ॥ पद्माविवोर्द्ध्वमुखरू
ढसुजातनालौश्रीकंठपत्निशिरसैववदधेतवांघ्री॥ ७०८॥ द्वाभ्यांसमीक्षितुमतृप्तिमतेवदृग्भ्यामुत्पाद्यभालनयनंवृषकेतनेन
न॥ सांद्रानुरागतरलेननिरीक्षमाणोजंघेउभेअपिभवानितवानतोस्मि॥ १०९॥ ऊरूस्मरामिजितहस्तिकरावलेपौस्थौल्येन
पांडुरतयापरिभूतरंभौ॥ श्रोणीभरस्यसहनौपरिकल्पदत्तौस्तंभाविवांबवयसातवमध्यमेन॥ ११०॥ श्रोण्यौस्तनौचयु
गपत्प्रथयिष्यतोच्चैर्बाल्यात्परेणवयसापरिकृष्टसारः॥ रोमावलीविलसितेनविभाव्यमूर्तिर्मध्यस्तवस्फुरतुमेहृदयस्य
मध्ये॥ १११॥ सख्युःस्मरस्यहरनेत्रहुताशभीरोर्लावण्यवारिभरितंनवयौवनेन॥ आपाद्यदत्तमिवपल्वलमप्रधृष्यंनाभिं
कदापितवदेविनविस्मरेयं॥ ११२॥ ईशोपगूहपिशुनंभसितंदधानेकाश्मीरकर्दममनुस्तनपंकजेते॥ स्नानोत्थित
स्यकरिणःक्षणलब्धफेनौसिंदूरितौस्मरपतेःसमरस्यकुंभौ॥ ११३॥ कंठातिरिक्तगलदुज्ज्वलकांतिधाराशोभौ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

उत्फुल्लदं॥ निशाविनायको हरिद्राविनायकः। शरावद्वये संस्थाप्य रहस्यस्थाने निक्षिप्य प्रतिदिनं पूजयेत्॥ पीतपुष्पाद्यैः रिपूणां वाक्स्तंभनं कुरुते भृशं न सं
देहः॥ अतिरोहितार्थमपरम्॥ इति श्रीगूढार्थदीपिकायां चतुर्विंशतितमः पटलः॥२४॥ इदानीं मोक्षेतरपुरुषार्थकामिनां तदुपयोगभूतानन्तपहोमप्रयो
गादिकानभिधाय मुमुक्षूणां तदुपायभूतयोगं तदङ्गैः साङ्गं सविस्तरं निरूपयितुमारभते॥ अथ योगमित्यादिना॥ योगोपि मतभेदादनेकधा॥ तत्र प्रथमं प्रथा
भुजौ निजरिपोर्मकरध्वजेन॥ कंठग्रहाय रचितौ किल दीर्घपाशौ मातर्मम स्मृतिपथं न विलंघयेयाः ११४ नृत्याय तं रुचिरकं
ठविलाससौर्यैर्भूषाभरेण विविधेन विराजमानं॥ कंठं मनोहरगुणं गिरिराजकन्ये संचिंत्यतृप्तिमुपयामि कदापि नाहम्॥
११५ अत्यायताक्षमभिजाततललाटपट्टं मंदस्मितेन दरफुल्लकपोलरेखं॥ बिंबाधरं वदनमुन्नतदीर्घनासं यस्ते स्मरत्यसकृदे
व स एव जातः॥११६॥ आविस्तुषारकरलेखमनल्पगंधपुष्पोपरिभ्रमदलिव्रजनिर्विशेषं॥ यश्चेतसा कलयते तव केशपाशं त
स्य स्वयं गलति देवि पुराणपाशः॥११७॥ स्तुतिमिति चरितपाकं धीमतां स्तोत्रमेतत् पठति यदिह मर्त्यो नित्यमार्द्रीतरात्मा॥११९॥
स भवति पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय॥१२०॥ इति श्रीशारदातिलके चतुर्विंशतितमः पट
लः २४॥ अथ योगं प्रवक्ष्यामि सांगं संवित्प्रदायकं॥ ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः॥ १॥ जीवात्मनोरभेदेन प्रति
पत्तिं परे विदुः शिवशक्त्यात्मकं ज्ञानं जगुरागमवेदिनः॥२॥ पुराणपुरुषस्यान्ये ज्ञानमाहुर्विशारदाः॥ जित्वा दावात्मनः श
त्रून्कामादीन्योगमभ्यसेत्॥३॥ कामक्रोधौ लोभमोहौ तत्परं मदमत्सरौ॥ वदंति दुःखदानेतानरिषड्वर्गमात्मनः॥४॥
नभूतं वेदांतसिद्धांतसिद्धं। अपृतत्वेनाह। ऐक्यम्॥ जीवात्मनोरिति॥ आगमिकानां मतमाह॥ शिवशक्तीति॥ वैष्णवमतमाह॥ पुराणइति॥ एतेषां स्व
रूपं पृथक् पृथक्त्वेन रूपेणादर्शयिष्यते॥ इदानीं तत्साधनानि प्रथमं विरूपयति॥ जित्वेत्यादिना॥ अरिषड्वर्गं दर्शयति॥ कामक्रोधइति॥ कथमेते वै

शांतत्वमतमाहा॥ दुःखदेति॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शत्रुजयोपायमाह। योगाष्टांगैरिति॥ तान्येव विभज्य दर्शयति॥ यमनियमेत्यादिना॥ यमाः प्रदर्श्यंते॥ एवं दीक्षासु सर्वासु गुरुः॥ शिष्यं प्रबोधयेत्॰ सबो
धितो वोधितश्चेत्स्यात्तान्यथा दीक्षितो भवेदित्युक्तेः॥ योगं विना दीक्षा निर्वाहात्॥ सूर्यमंत्रे च प्रयोगविषये॥ अनेकप्रकारा उक्ताः॥ तेषां च ज्ञानोपयोगं वक्तुं
प्रतिजानीते। अथेति सांगं यमनियमादियुक्तम्॥ वेदांतपक्षमाश्रित्याह॥ ऐक्यमिति॥ तच्च तत्त्वमसीत्यादिवाक्यसिद्धं॥ शैवमतमाह। शिवेति। प्रतिपति।

योगाष्टांगैरिमान्जित्वा योगिनो योगमाप्नुयुः॥ यमन्नियममासनप्राणायामौ ततः परं॥ ५॥ प्रत्याहारं धारणाख्यं ध्यानं सार्द्धं स
माधिना। अष्टांगान्याहुरेतानि योगिनो योगसाधने ६॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं कृपार्जवं॥ क्षमा धृतिर्मिताहारः शौचं चे
तियमा दश ७ तपः संतोष आस्तिक्यं दानं देवस्य पूजनं॥ सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो हुतं ८ दशैते नियमाः प्रोक्ताः यो
गशास्त्रविशारदैः। पद्मासनं स्वस्तिकाख्यं वज्रं भद्रासनं तथा ९ वीरासनमिति प्रोक्तं क्रमादासनपंचकं॥ ऊर्वोरुपरि विन्यस्य सं
म्यक् पादतले उभे॥ १०॥ अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः॥ पद्मासनमिति प्रोक्तं योगिनां हृदयंगमं ११ जानूर्वोरंतरे सं
म्यक् कृत्वा पादतले उभे॥ ऋजुकायो निशेद्योगी स्वस्तिकं तत्प्रचक्षते १२ सीवन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलं॥ वृषणा
धः पार्श्वपादौ पाणिभ्यां परिबंधयेत्॥ १३॥ भद्रासनं समुद्दिष्टं योगिभिः पूजितं परं॥ ऊर्वोः पादौ क्रमान्न्यस्येज्जान्वोः प्रत्यङ्मुखां
गुली १४ करौ निदध्यादाख्यातं वज्रासनमनुत्तमं। एकपादमधः कृत्वा विन्यस्योरौ तथेतरं १५ ऋजुकायो विशेद्योगी वीरास
नमितीरितं इडयाकर्षयेद्वायुं बाह्यं षोडशमात्रया १६ धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया॥ सुषुम्णामध्यगं सम्यक् द्वा
त्रिंशन्मात्रया शनैः॥ १७॥ ज्ञानं। परेशे वा। उत्तराम्नायमतमाह॥ शिवेति॥ शिवशक्त्यात्मकं॥ तयोरभेदाच्चेतदित्यर्थः॥ भेदवादिमतमाहीयु ११९
राणेति। अन्ये वैष्णवाः॥ पुरुषः सांख्यमते॥ ईश्वरो न्यायमते॥ नारायणो वैष्णवमते॥ तत्र पूज्यत्वात्प्रथमोपस्थितत्वाद्राद्यमतं यथारुतं स्वमतमिति गम्यते॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कामेति। स्त्रीभोगाद्यभिलाषः कामः। सत्कृदिजिघांसा क्रोधः। धनादितृष्णा लोभः। तत्वाज्ञानं मोहः॥ अहं सुखी धनी विद्यावानिति गर्वः। अन्यशुभद्वे
षो मत्सरः॥ दुःखदानेज्ञानात्मनोरिव दुर्गमाहुरित्यन्वयः॥ आत्मनः स्वरूपचिंताव्यापारविशेषमनशत्रुत्वं एतदुपायमाह॥ योगेति तान्याह। समिति। क्रमा
देषां स्वरूपमाह। अहिंसेति। चौर्यनिवृत्तिरस्तेयः। स्त्रीभोगेच्छादिनिवृत्तिः। ब्रह्मचर्यं प्राणिषु क्रूरत्वनिवृत्तिः क्रिया। चित्तकौटिल्यनिवृत्तिरार्जवं। अभिभावकं
प्रति अक्रोधः॥ प्रणवचिंतता क्षमा॥ स्पृहवस्त्वाद्यभिलाषः चिंता। अभावो धृतिः। सर्वानुशक्ता अहिंसा। ब्रह्मचर्याभ्यासः कामस्य जयः। कृपाक्षमाभ्यां क्रोध
स्य च स्तेयसत्यार्जवेभ्यो लोभस्य मिताहारशौचाभ्यां मोहस्य क्षमार्जवाभ्यां मदस्य अहिंसाकृपार्जवक्षमाभ्यो मत्सरस्य। असदपि यथाशक्त्यं। तप इति
च्छादिव्रतकर्म। तपवल्लिषतरावभिधायः। संतोषः। अस्ति परलोक इति मतिर्यस्य स आस्तिकः। तस्य भावः आस्तिक्यं परलोकदृष्ट्या धर्माद्याचरणमिति
यावत्। यथाविभवं देवपितृमनुष्येभ्यो देशे न वितरणं दानं देवस्य पूजनं युक्तरीत्या सिद्धांतमुपनिषत्। मोक्षोपायोपदेशि परिमत्वादि शास्त्रं तस्य श्रव
णं। ह्रीर्लज्जा कुत्सिताचारात्॥ तत्र उद्देशः। मतिर्मननं। तथा च श्रुतिः। श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति॥ जप उक्तप्रकारः॥ जपतो नास्ति पा
तकमित्युक्तेः॥ चित्तशुद्ध्यावयोगाद्भुतमग्निहोत्रादिः॥ नियमा इति॥ अवश्यकर्तव्यतया नियमत्वमेषां॥ आसनपंचकमेतदुक्तं वशिष्ठसंहितायां॥ आ
सनेन रुजो हंति प्राणायामेन पातकं। विकारमानसं योगी प्रत्याहारेण सर्वदा॥ धारणाभिर्मनो धैर्यज्ञानादैश्वर्यमुत्तमं॥ समाधेर्मोक्षं प्राप्नोतीत्युक्तकर्म
शुभाशुभमिति। व्युत्क्रमादिति पृष्ठभागे हस्तमात्रं व्युत्क्रमः॥ सीमन्या इति। गुदमेढ्रांतरालरेखा सीमनी तस्याः शेषः। तत्संधी घुटिके गुल्फौ युग्मा
न्या पार्ष्णिरथस्तयो रिति कोशाः॥ पाणिभ्यां परिबंधयेत्। पूर्ववद्वंगुष्ठावितिशेषः॥ तदुक्तं प्रयोगसारे॥ सीमन्या आत्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः। स
व्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणेतरं दक्षे सव्यं करं स्वसव्येन्यस्येतरं करं। अंगुष्ठैव निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु। विदधति ऊर्वोरिति ऊर्वोः स्वस्योरुमूले
क्रमात्पदद्वंद्वं कुर्यात्॥ प्रत्यङ्मुखांगुली। स्वसंमुखांगुली॥ प्रत्यङ्मुखांगुलीकरौ। जान्वोरुपरि विदध्यादित्यन्वयः॥ एकमिति। अधः क्रत्वेति दक्षिणो
रुमूलाधः। स्फिजउपरिमं त्रिणेति। तदुक्तं। कालेन यातासीयो हस्तः स्वं जानुमंडलं। यावति मात्रा सा तुल्या स्वयैकस्यासमात्रयेति॥ श्री॥

वायवीयसंतताथांतु॥ जानुप्रदक्षिणीकृत्य त्वरितं न विलंबितः॥ अंगुलिस्फोटनं कुर्यात्सा मात्रेति प्रकीर्तिता इति॥ पूरितं धारयेदिति कुंभकः॥ सुषुम्णामध्यगामि
ति पूर्वेणासंबध्यते। रेचयेद्धि निष्क्रामयेदिति रेचकः॥ केचन रेचकादिकमाहुः॥ अन्ये कुंभकांतमन्यंते। एवं क्रमात्। भूयो भूयः पौनःपुन्येन मात्रावृद्धिं
क्रमेण। एकद्वित्रिवृद्ध्यादिक्रमेण तस्य व्यत्यासेन उत्क्रवे पर्यायेन द्वादशषोडशप्राणायामान्समाचरेदित्यन्वयः॥ तदप्यूचुः प्राणायामान् प्रणवसंहि
तान् षोडशवंशी प्रभाते सायं च प्रतिदिवसमेवं वितनुते द्विजो यस्तं भ्रूणप्रहरणकृतं॥ होमकलितं पुनंत्येते मासादपि हुतेनान्नूनैव दहनादिति॥ परम

नाड्या पिंगलया चैनं रेचयेद्योगवित्तमः॥ प्राणायाममिदं प्राहुर्योगशास्त्रविशारदाः १८ भूयो भूयः क्रमात्तस्य व्यत्यासेन समा
चरेत्॥ मात्रावृद्धिक्रमेणैव सम्यग्द्वादश षोडश॥ १९॥ प्राणायामो हि द्विविधः सगर्भोऽगर्भ एव च॥ जपध्यानादिभिर्युक्तं सगर्भं
तं विदुर्बुधाः॥ २०॥ तदपेतं विगर्भं च प्राणायामं परे विदुः॥ क्रमादभ्यस्यतः पुंसो देहे स्वेदोद्गमोऽधमः॥ २१॥ मध्यमः कंपसंयुक्तो
भूमित्यागः परो मतः। उत्तमस्य गुणावाप्तिर्यावच्छीलनमिष्यते २२ इंद्रियाणां विचरतां विषयेषु निरर्गलं॥ बलादाहरणं तेभ्यः प्र
त्याहारोऽभिधीयते॥ २२॥ अंगुष्ठगुल्फजानूरुसीवनीलिंगनाभिषु॥ हृद्ग्रीवाकंठदेशेषु लंबिकायां ततो नसि २४ भ्रूमध्ये मस्त
के मूर्ध्नि द्वादशांते यथाविधि॥ धारणं प्राणमरुतो धारणेति निगद्यते॥ २५॥ समाहितेन मनसा चैतन्यांतरवर्तिनां॥ आत्मन्य
भीष्टदेवानां ध्यानं ध्यानमिहोच्यते २६॥ समस्तभावना नित्यं जीवात्मपरमात्मनोः॥ समाधिमाहुर्मुनयः प्रोक्तमष्टांगलक्षणं २६

तमाह॥ जपेति॥ परे बुधाः विदुरित्यन्वयः॥ अयं प्राणायामः पूजाविषय इति ज्ञेयं। तदुक्तं। अयं प्राणायामः॥ सकलदुरितध्वंसनकरो निगर्भः प्रोक्तः
स्यादच्छुतगुणफलो गर्भकलितः॥ जपध्यानापेतः स तु नियममुदितो गर्भरहितः॥ सगर्भस्तद्युक्तो मुनि यदि पंवृत्ते योगनिरतो इति। शीलनमभ्यासः।
प्राणायामस्येति शेषः। इंद्रियाणामित्यादिना मनस एकाग्र एव स्थितिः॥ कायेत्युक्तं भवति। यतो मनःसहायानामेव तेषां स्वस्वविषयग्रहणशक्तिः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लंबिका॥ तालुमूले। मस्तकं ललाटकेशसंधिः। मूर्द्धेति। तदुपरिताडुः। द्वादशांते ब्रह्मरंध्रे॥ यथाविधीति। गुरुक्रमेणाभीष्टदेवतानामिति। सगर्भं ध्यान
मुक्तं॥ विगर्भमपि ध्यानमुक्तं। तत्रांतरे। पत्तले निश्चलं चित्तं तद्ध्यानं परमुच्यते॥ द्विधा भवति तद्ध्यानं सगुणं निर्गुणं तथेति॥ योगसिद्ध्यर्थं शरीरांतरे मूला
धारमारभ्य तन्नाडीस्थाने वायुसंचारं वक्तुं शरीरप्रमाणप्रमाणमाह षडिति॥ उभयात्मकं शिवशक्त्यात्मकम्॥ अग्नीषोमात्मकं॥ शुक्रशोणितात्मकं वा॥
तत्प्रथमपटलोक्तानुवादः॥ तस्मादित्युत्सेधात्॥ वंशं पृष्ठवंशं। आश्रिता अंतर्गता घटाद्यपामुंडाधारदंडाधारदंडांतरविवरगता शिफाभ्याम् मूलाभ्यां आधा

षरान्नवत्यंगुलायामं शरीरमुभयात्मकं॥ गुदध्वजांतरे कंदमुत्छेधाद्व्यंगुलं विदुः॥ २७॥ तस्य हि द्व्यंगुला विस्तारं वृत्तरूपेण शोभि
तम्। नाड्यस्तत्र समुद्भूता मुख्यास्तिस्रः प्रकीर्तिताः। २८। इडा वामे स्थिता नाडी पिंगला दक्षिणे मता। तयोर्मध्यगता नाडी सुषु
म्णा वंशमाश्रिता २९ या दांगुष्ठद्वयं प्राप्ता शिफाभ्यां शिरसा पुनः। ब्रह्मस्थानं समापन्ना सोमसूर्याग्निरूपिणी ३० तस्या मध्यग
ता नाडी चित्राख्या योगिवल्लभा॥ ब्रह्मरंध्रं विदुस्तस्याः पद्मसूत्रनिभं परं ३१ आधारांश्च विदुस्तत्र मतभेदादनेकधा॥ दिव्यमार्ग
मिदं प्राहुरमृतानंदकारणं ३२ इडायां संचरेच्चंद्रः पिंगलायां दिवाकरः॥ ज्ञातौ योगनिदानज्ञैः सुषुम्णायां तु ताउभौ ३३ आधार
कंदमध्यस्थं त्रिकोणमतिसुंदरं॥ ज्योतिषां निलयं दिव्यं प्राहुरागमवेदिनः ३४ तत्र विद्युल्लताकारा कुंडली परदेवता॥ परिस्फु
रति सर्वात्मा सुप्ता हि सदृशाकृतिः ३५ विभर्ति कुंडली शक्तिरात्मानं हंसमाश्रिता॥ हंसः प्राणाश्रयो नित्यं प्राणनाडीयथाश्रया ३६

णानिति केचन द्वादश॥ अन्ये षोडश स्वं अपरे ब्रह्मनवपदाहुः। ततस्तु ब्रह्मकाले च ध्यायेच्चक्रक्रमं सुधीः आधारचक्रं प्रथमं कुलदीपमनंतरं वज्रचक्रं ततः
प्रोक्तं स्वाधिष्ठानात्मकं परं॥ रौद्रं करालचक्रं च गह्वरात्मकमेव च। विद्याप्रदं च त्रिमुखं त्रिपदं कालदंडकं। उकारचक्रं च ततः कालोदारंकंरककं॥ दीपव
त्क्षोभकं वज्रकानंदकलिकात्मकं॥ मणिपूरकसंज्ञं च लाकुतं कालभेदनं॥ महोत्साहे च परमं मदकं पदमुच्यत इति। कुंडलीस्थानमाह। आधारेति
कुंडली शक्तिरात्मानं परमात्मानं विभर्ति तच्योगभागिनीत्यर्थः॥ किंतु जीवात्मानं आश्रित्य जीवाधिष्ठानमंतीत्यर्थः। हंसः प्राणः प्रायः प्राणवायुसमाश्रया

कथं तस्य नाडीसमाश्रयत्वाभिप्रयाणं कुरुते १२१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अतएव प्राणा इति॥ प्राणशब्दव्युत्पत्तिर्दर्शिता॥ द्वादशांगुलमानेनेति॥ वामदक्षिणयोः प्रतिज्ञेयम्। एतत्फलमुक्तम्। तंत्रान्तरे। भोजनं मैथुनं युद्धं पुण्यं फलगृ
हादिकं॥ कुर्यात्क्रूराणि कर्माणि वायौ दक्षिणमास्थिते। यात्राविवाहकर्माणि यानि वतानि सर्वाणि कुर्वीत॥ वामे वायौ तु संस्थिते इति। योगप्रकारमा
ह। रम्ये एकांत इत्यर्थः। अन्यथा चित्तयक्षेकाठिन्ये सति देहपीड्या तत्रैव मानौगमिष्यतीति मृद्वासन इत्युक्तं॥ भूतपरिचारार्थमाह। दंडकारेति॥ दृढं
वध्वेति। अन्यथा यदि द्वितीयमार्गेण हजत्द्दयन्नेगच्छेत्तदुपधावं स्यात्॥ करणानि इन्द्रियाणि। उभे इति। त्रिघन्वेति। घनो निर्विजे मेघस्त्र मद्वस्तमोय

आधारादुद्गतो वायुर्यथावत्सर्वदेहिनां। देहं व्याप्य स्वनाडीभिः प्रयाणं कुरुते वहिः॥ ३७॥ द्वादशांगुलमानेन तस्मात्माणाइ
तीरितः। रम्ये मृद्वासने शुद्धे पटाजिनकुशोत्तरे ३८ वध्वैकमासनं योगी योगमार्गपरो भवेत् ज्ञात्वा भूतोदयं देहे विधिवत्प्राण
वायुना ३९ ततद्भूतं जयेद्देहं दृढत्वाचाप्नयेत्सुधीः। दंडाकारागतिर्भूमेः पुटयोरुभयोरधः ४० तोयस्य पावकस्योर्द्धं गतिस्तिर्य
ङ्नभस्वतः। गतिर्व्योम्नो भवेन्मध्ये भूतानामुदराः स्मृतः ४१ धरणोरुदये कुर्यात्स्तंभनं वश्यमात्मवित्॥ शांतिकं पौष्टिकं कर्म
तोयस्य समये वसोः ४२ मारणादीनि मरुतो विपक्षोच्चाटनादिकं॥ स्वेडादिनाशनं शस्तमुदये च विहायसः ४३ अंगुलीभिर्दृ
ढं वध्वा करणानि समाहितः॥ अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने॥ ४४॥ नासारंध्रे मध्यमाभ्यामन्याभिर्वदनं दृढं।
वध्वात्मप्राणमनसामेकत्वं समनुस्मरन्॥ ४५॥ धारयेन्मारुतं सम्यग्योगोयं योगिवल्लभः। नादः संजायते तस्य क्रमादभ्यस
तः शनैः॥ ४६॥ ९ स्येति मध्यपदलोपी समासः हंसलक्षणं॥ शिवशक्त्यात्मकं जीवात्मकं वा। प्रणवोत्पत्तिमाह। उं प्रकृत्येति। क्रमादिति। विंदो
विसर्गात सः उं प्रकृत्यात्मकादितिनाम कात्यनिकं॥ तत्वतो विंद विसर्गमेवाहंपमानिति। अत एवात्र आदौ अकारे निपाते योजिते अहमिति लोकप्र
सिद्धं आत्मा इतिनयः॥ उपतिष्ठंति। आराधयंति। उरुषं साम्रपं मत्वा नित्यं तमेवास्थिता प्रकृतिरिति संबंधः॥ यद्वा तु प्रकृतेर्नित्यमात्मनः। इतिपाठस्तदा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

समानाधिकरणोपष्ठ्यौ प्रकृतिरविद्या सा ब्रह्म इति तत्त्वेन जीवकल्पकत्वात् इति नाश्रयं मदाश्रयं मत्वा इयं पदा तद्भावमाप्नोति इति संबंधः॥ तद्भावमिति प्रकृतिपुरुषयो रभेदात्परमात्मैवाहमिति जीवब्रह्मणो रैक्यमिति वाक्यार्थः॥ अतएवाभ्यासत्वेवमैक्यमुदेतीति व्यक्तं कृतं॥ लोपयित्वेति व्यंजनयो कल्पितावादेव लोपः। पूर्वरूपं एङः पदांतादिति॥ परानंदमयमिति॥ आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतेः॥ नित्यं वक्ष्यमाणश्रुतेश्च चैतन्यं ज्ञानं तवासावेकोगुणाश्च तदात्मकं॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः॥ संसारोत्पत्तिकर्तृकत्वात् कल्पितसत्वरजस्तमोगुणरूपं॥ आत्मा वेदस्थितं सोहं शब्दो

मत्तभृंगांगनागीतसदृशः प्रथमो ध्वनिः। वंशिकास्यानिलापूर्णवंशध्वनिनिभोपरः ४७ घंटारवः समः पश्चाद् घनमेघसमोपरः॥ एवमभ्यसतः पुंसः संसारध्वांतनाशनं॥ ४८॥ ज्ञानमुत्पद्यते पूर्वं हंसलक्षणमव्ययं॥ पुंप्रकृत्यात्मकौ प्रोक्तौ विंदुसर्गौ मनीषिभिः॥४९॥ ताभ्यां क्रमात्समुद्भूतौ विंदुसर्गावसानकौ॥ हंसो तौ पुंप्रकृत्याख्यौ हं पुमान् प्रकृतिस्तु सः॥५०॥ अजपा कथिता ताभ्यां जीवोपमुपतिष्ठते॥ पुरुषं स्वाश्रयं मत्वा प्रकृतिर्नित्यमात्मनः॥५१॥ यदा तद्भावमाप्नोति तदा सोहमयं भवेत्॥ सकारार्णहकारार्ण —— लोपयित्वा ततः परं॥ ५२॥ संधिं कुर्यात्पूर्वरूपस्तदासौ प्रणवो भवेत्॥ परानंदमयं नित्यं चैतन्यैकगुणात्मकं ५३ आ= त्माभेदस्थितं योगी प्रणवं भावयेत्सदा॥ आम्नायवाचामतिदूरमाद्यं वेद्यं स्वसंवेद्यगुणेन संतः। आत्मानमानंदरसैकसिं= धुं पश्यंति तारात्मकमात्मनिष्ठाः५५ सत्यं हेतुविवर्जितं श्रुतिगिरामाद्यं जगत्कारणं। व्याप्तस्थावरजंगमं निरुपमं चैतन्यमंतर्गतं =

च्छुतया तस्य पातस्य तदर्थकत्वात्। आम्नायेति। यतो वाचो निवर्तंत इति श्रुतेः। आद्यं शास्त्ररूपो नित्यत्वात्। स्वसंवेद्यगुणेन वेद्यं स्वप्रकाशमित्यर्थः॥ आनंदमिति॥ आनंदं ब्रह्मणो रूपमिति श्रुतेः॥ तारात्मकमुक्तरीत्या आत्मनिष्ठा आनंदैरजप्येदीर्घकालक्षासैस्तञ्चितपरायोगिनः॥ सत्यं ज्ञानमिति श्रुतेः हेतुविवर्जितं नित्यत्वादनुत्पाद्यं। श्रुतिगिरामाद्यं। श्रुतिगिरामाद्यं वेदानामुद्धारकर्तृत्वात्सवेदकर्तृत्वाद्। जगत्कारणम् आनंदाद्ध्येव खल्विमानि तत्त्वज्ञानात्तानि जायन्ते इति श्रुतेः॥ व्यापेति। तद्धि वस्तुपत्वाज्जगतः। निरुपममद्वितीयत्वेन चैतन्यं आत्मस्वरूपमसंकेतान्य मित्यर्थः॥ ॰ ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रविचंद्रवह्निवपुरिव वपुर्यस्य प्रकाशरूपमित्यर्थः। तारस्येति अकारोकारमकारशक्तिशांतात्स्यैव निरूप्यमाणां तदेवाह। मानेतिगम्यमिति॥ श्रुतिभक्तिरूपविचारणीमं॥ अच्युतंउद्दिक्षपरहितं॥ सगुणब्रह्मोपासनामाह॥ हिरण्मयमिति॥ त्रिमूर्तिमूलमित्यनेनास्यन्यस्तनीयानिधामानिसूचितानि॥ अन्यांसकृयोपास्तिमाह॥ ध्यायता आपारेदाःतनाधितत्सष्टचस्तांयस्या अन्यत्साकारध्यानमाह॥ पिंडमिति॥ अकारोकारमकारात्मकलात्मकत्वा

आत्मानं रविवह्निचन्द्रवपुषं तारात्मकं संततं नित्यानन्दगुणालयं सुकृतिनः पश्यंति रुद्धेन्द्रियाः॥५७॥ तारस्य सप्तविभवैः परिचीयमानं मानैरगम्यमनिशं श्रुतिमौलिमृग्यं॥ संवित्समस्तगमनश्वरमच्युतं ततेजः परं भजत सांद्रसुधांबुराशिं हिरण्मयं दीपमनेकवर्णं त्रिमूर्तिमूलं निगमादिबीजं॥ अंगुष्ठमात्रं पुरुषं भजंते चैतन्यमात्रं रविमंडलस्थं॥५८॥ सुखदादन्तसुभगाशंकरार्द्धशरीरिणी॥ ग्रंथपुष्पोपहारेणप्रीतानः पार्वतीसदा॥६०॥ ध्यायंति दुग्धाब्धिभुजंगभोगे शयानमाद्यं कमलासहायं॥ प्रफुल्लनेत्रांबुजमंजनाभं चतुर्मुखेनाश्रितनाभिपद्मं॥६१॥ आम्नायगं द्विवरसांघननीलमुद्यच्छ्रीवत्सकौस्तुभगदांबुजशंखचक्रं॥ हत्पुंडरीकनिलयं जगदेकमूलमालोकयंति कृतिनः पुरुषं पुराणं॥६२॥ बिंदोर्नादसमुद्भवः समुदितेनादे जगत्कारणम्। तारं तत्वमुखांबुजं परिचितं वर्णात्मके भूजजैः। आम्नायांघ्रिचतुष्टयं पुररिपोरानंदमूलं वपुः। पायाद्वो मुकुटेंदुखंडविगलद्दिव्यामृतौघप्लुतं ६४ पिंडं भवेत्कुंडलिनी शिवात्मा पदं तु हंसः सकलांतरात्मा॥ रूपं भवेद्बिंदुरमंदकांतिरतीतरूपं शिवसामरस्यम्॥६५॥ तापिंडंप्रणवः॥ कुंडलीतद्रूपा सैव शिवात्मसकलांतरात्मा हंसः। तस्याः पदं स्थानं। अनयोरवींदकांतिबिंदुरूपं परमार्थतस्तु॥ शिवयोः सामरस्य प्रतीतरूपं॥ अतीतरूपमेवः पद्महेत्वकः। रूपं सर्वजगतीकम्येवंव्यातान्छिवसामरस्यरूपं अतीतअतीतपीतगच्छतेत्यर्थः॥ कुतः अनेनसा उज्यमुक्तिर्भवतीत्यर्थः॥ पिंडादिति। सारूप्यमुक्तिर्भवतीत्याह॥ पिंडादिति। सारूप्यमुक्तिमाह॥ ॰ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥शिवेलयमिति॥ कुंडलिनी चिंतनरूपं योगमाह॥ मूलेति॥ मूलाधारात्मूलाधारात् तत्र निद्राजा य इत्यर्थः रूपा॥ कुंडलिन्याः सर्पाकारत्वात् भुजंगमहिषीत्युपदेशः॥ आसु
यांती आधारसमूहं स्वाधिष्ठानादिरूपांत्यै भोजसहस्रारे परमशिवमौलिस्थेंदुमंडलात्पति॥ स्वगृहं मूलाधारं तं जीवेन जप्यमानं हंसस्तेन गृहीत्वेति संबंधः स्वाश्र
यं मूलाधारं॥ अव्यक्तं परविंदुनात्वे तित्यवनो विशेषः स्वपुरं मूलाधारं॥ समीरणाद्द्येति॥ अपाननिरोधात्प्राणवायुनिरोधाच्च कुशाधिगतयोर्मिथः संघट्टः॥ अत्र
पिंडादियोगं शिवसामरस्यात्सवीजयोगं प्रवदंति संतः॥ शिवे लयं नित्यगुणाभियुक्ते निर्बीजयोगं फलनिर्व्यपेक्षं॥६६॥ मूलो
न्निद्रभुजंगराजसदृशीं यांतीं सुषुम्णांतरं। भित्वाधारसमूहमाशुविलसत्सौदामिनीसन्निभां॥ व्योमांभोजगतेंदुमंडलगलद्दि
व्यामृतौघप्लुतां संभाव्य स्वगृहं गतां पुनरिमां संचिंतयेत् कुंडलीं॥६७॥ हंसं नित्यमनंतमव्ययगुणं स्वाधारतो निर्गता शक्तिः कुंडलि
नी समस्तजननी हस्ते गृहीत्वा च तं॥ याता शंभुनिकेतनं परसुखं तेनानुभूय स्वयं याती स्वाश्रयमर्ककोटिरुचिरा ध्येया जगन्मोहि
नी॥६८॥ अव्यक्तं परविंदुमंचितहचिं नीत्वा शिवस्यालयं शक्तिः कुंडलिनी गुणत्रयवपुर्विद्युल्लतासन्निभा॥ आनंदामृत
तमध्यगं पुरभिदं चंद्रार्ककोटिप्रभं संवीक्ष्य स्वपुरं गता भगवती ध्येया नवच्यागुणैः॥६९॥ मध्येवर्त्म समीरणाहृयमिथः
संघट्टसंक्षोभजं शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभासुरे॥ उद्यंतीं समुपास्महे नवजपासिंदूरसंध्यारुणां सांद्रानंद
सुधामयीं परशिवं प्राप्तां परां देवतां॥७०॥ गमनागमनेषु लांघिकी सा तनुयाद्योगफलानि कुंडली॥ मुदिता कुलकामधेनुरेषा
भजतां कांक्षितकल्पवल्लरी॥७१॥ ९९ शब्दस्वरूपहदिकमणामेव विशेषः॥ जंघिकी समर्थेत्यर्थः॥ शक्तित्रिकोणं तस्यामध्यस्थानोपविंदुत
निलयं अथवा मूलाधारस्थत्रिकोणस्थ शक्तिबीजविंदुनिलयं॥ कोदंडभ्रामध्यं आज्ञाचक्रं मतं नातत्सदृशां॥ अत्र हृदयादेव पतिंप्रतिगमनं वर्णमध्यातं
चास्मविशेषः सादाख्ये सदाशिवाख्यनादाख्यमिति वा॥ एतच्च प्रतिचक्रं भिन्ना कुंडलास्तत्वरतिमते॥ भावात्यचेन योगः॥ वर्णोत्पादकत्वं च विशेषः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदुक्तं स्वयंभूलिंगनिजयोनिमध्ये रंध्रांतरं ह्रल्लसरसीरुहांतः कृणाक्रूपं चेजरमंतरालेव तिसंतो मगनां तेरेति॥ मूलस्तः परवासनादाद्यायकुंडलिनीध्या
नविशेषान्वदंति। महानिजभवनेत्यादिना॥ आपानवायुसंकोचादाधारबंधः। एवं॥ प्राणवायुनिरोधोपि प्रमुखशब्दवाच्यः॥ अनेन समतत्रम्॥ अनंतप्रधानंत
त्स्रणदीर्घत्वं तत्संकोचेन दीर्घाकंचनिनसमरुतां॥ विनम्रदेवानां कोटीराग्रैः॥ मुकुटाग्रभागैः॥ अंतर्मार्गैः॥ अंतर्मार्गक्रमेण कुंडलिनीध्यानमाह॥ वर्णैरिति॥

आधारस्थितशक्तिबिंदुनिलयां नीवारशूकोपमां नित्यानंदमयीं गलत्तरसुधावर्षैः प्रबोधप्रदैः॥ सिक्ताषट्सरसीरुहाणि वि
धिवत्कोदंडमध्योदितां ध्यायेद्भास्वरबंधुजीवरुचिरां संचिन्मयीं देवतां॥ ७२॥ हृत्पंकेरुहभानुबिंबनिलयां विद्युल्लताभत्स
रां बालार्कारुणतेजसां भगवतीं निर्भर्त्सयंतीं तमः॥ नादाख्यं पदमर्द्धचन्द्रकुटिलं संचिन्मयीं शाश्वतं यांती मध्यरूपिणीं वि
मलधीर्ध्यायेद्विभुं तेजसां ७३ भाले पूर्णनिशापतिप्रतिजरान्नीहारहारत्विषा सिंचंतीममृतेन देवमभितेनानंदयंतीं तनुं॥ व
र्णानां जननीं तदीयवपुषा संप्राप्य विश्वं स्थितां ध्यायेत्सम्यगनाकुलेन मनसा संचिन्मयीमंबिकां॥ ७४॥ मूले भाले हृदि च विलस
द्वर्णरूपा सवित्री पीनोत्तुंगस्तनभरविनमन्मध्यदेशा महेशी॥ चक्रे चक्रे गलितसुधया सिक्तगात्रा प्रकामं दद्यादाद्यां श्रियम
विकलां वाङ्मयी देवता वः ७५ निजभवननिवासादुच्चरंती विलासैः पथि पथि कमलानां चारुहासं विधाय तरुणतरणिकां
तिः कुंडली देवता सा शिवसदनसुधाभिर्दीपयेदात्मतेजः ७६ आधारबंधप्रमुखक्रियाभिः समुत्थिता कुंडलिनी सुधाभिः।
त्रिधामबीजं शिवमर्चयंती शिवांगना वः शिवमातनोतु॥ ७७॥ दिशो दशकलाः। चक्षुरस्राविति। अक्रमेणोदर्शितः॥ आद्यैरिति मूलाधा
रस्थितत्वेनाद्यं तावद्व्यासाद्यैः सकारादिभिः ककारांतैः॥ आद्यैः १६ स्वरैः हृत्वक्षुयुतैरिति॥ योजना॥ डाकिनी लाकिनी [illegible] किती हाकिनी काकिनीभिः॥
ब्रह्मादिभिर्देवताभिः परिचितान्॥ भिदानेति शेषसंबंधः॥ आधारेति॥ त्रिकोणकर्णिकाकं वृत्तम्॥ चतुर्दलमाधारम् तस्माद्वर्णवृत्तं सत्वादिरूपदिगिति देश

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

काश्यादिपदात्तत्स्वरूपस्यावस्थिते कारणपंचकस्य उपादानसमवायिनिमित्तप्रयोजकसहकारिकारणे निमित्तकारणांतर्गतत्वएवेति ॥ कारणत्रयमेवादात्म
रूपतश्च ॥ न चांतर्गतेएवेति कारणत्रयमेवाहुः ॥ तथापोषड्ढेदमाश्रित्य कारणपंचकोपन्यासः ॥ यद्वा ॥ पंचभूतानां पंचतन्मात्रारूपाणि कारणानि॰ तदु

सिंदूरपुंजनिभमिंदुकलावतंसमानंदपूर्णनयनत्रयशोभिवक्त्रं ॥ आपीनतुंगकुचनम्रमनंगतंत्रं शंभोः कलत्रममितां श्रियमा
तनोतु ७८ ॥ नयनकमलैर्दीर्घादीर्घैरलंकृतदिङ्मुखं विनतमरुतां कोटीराग्रैर्निघृष्टपदांबुजं ॥ तरुणशशकलं चांद्रं बिभ्रद्घट
स्तनमंडलं स्फुरतु हृदये वंधूकाभं कलत्रमुमापतेः ॥७९॥ वर्णैरर्णाव षट्दिशोरविकलाचत्सुर्विभक्तैः क्रमादाद्यैः शादिभि
रावृतान्क्षहयुतैः षट्चक्रमध्यानिमान् ॥ डाकिन्यादिभिराश्रितान्परिचितान्ब्रह्मादिभिर्दैवतैर्भिंदानापरदेवतां त्रिजगतां
चित्ते विधत्तां मुदः ॥८०॥ आधाराकुपावृत्तशोभिततनुर्निर्गत्वरीं सत्वरं भिंदंतीं कमलानि चिन्मयघनानंदप्रबोधोद्धुरां ॥ संक्षुब्ध
श्चवमंडलामृतकरप्रस्यंदमानामृतस्रोतः कंदलितामंदतडिदाकारां शिवां भावयेत् ॥८१॥ आनंदमौलिमनिशं श्रुति
मौलिमृग्यमर्द्धेंदुभूषणमधिष्ठितसर्वलोकं ॥ भक्तार्तिभंजनपरं परमीश्वरस्य रत्यांबुभानि नियतं वपरं विकायाः ॥८२॥
मंजुसिंजितमंजीरं वाममर्द्धं महेशितुः ॥ आश्रयामि जगन्मूलं यन्मूलं वचसामपि ॥८३॥ स्थूलेन्द्रनीलरुचिरं कुचभारनम्रं
भास्वत्तुभूषणगणैः प्रविभक्तशोभं ॥ विश्वैकमूलमनिशं श्रुतिमौलिमृग्यमर्द्धं महेशितुरखंडितमाश्रयामि ॥ ८४ ॥ ॥

क्रम ॥ महाकपिलराजे ॥ मात्राः पंचपरित्यज्य ततः कारणपंचके ॥ दिव्यंतकारणं कृत्वा यो जपेत्परमं पदं इति ॥ अत एव शून्येऽरूपे निरालंबने ॥ आधारहीने ॥
त्मानंज्ञीवात्मानं निश्चलश्रिया ॥ निवेश्य योगफलं प्रयाति ॥ ग्रंथकर्त्ता स्ववंशपरंपरास्तानाख्याति ॥ ० ॥ ० ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

महावलायेत्यादिना॥ तत्वसंख्येः पंचविंशतिसंख्ये अत्राद्यः पटलः सृष्टिप्रतिपादकत्वेन मूलप्रकृतिप्रतिपादनपरः॥ मध्येत्रयोविंशतिपटलाः॥ प्रकृतिप्र
तिपादनपराः॥ अंत्यपटल ः प्रकृतिव्यतिरिक्तपुरुषप्रतिपादनपरः॥ एवंपंचविंशतितत्वात्मकत्वमस्यग्रंथस्योक्तंभवति॥ परदेवतैवमध्युयैतिकर्मसक्त

दिक्कालादिविवर्जितेपरशिवेचैतन्यमात्रात्मिकेशून्येकारणपंचकस्यविलयंनीतेनिरालंबने॥ आत्मानंविनिवेश्यनिश्चल
धियानिर्लीनसर्वेन्द्रियोयोगीयोगफलंप्रयातिसुलभंनित्योदितंनिष्क्रियं॥ ८५॥ महाबलापप्रणतोस्मितस्मैसंविच्चतालिंग
नशीतलाय॥ येनार्पितंमुक्तिफलंविपक्वमाम्नायशाखाभिरुपाश्रितेभ्यः॥ ८६॥ तस्मादभूदखिलदेशिकवाररीन्द्रः षट्क
र्मसागरविहारविनोदशीलः॥ यस्यत्रिलोकविततंविजयाभिधानमाचार्यपंडितइतिप्रथयंतिसंतः॥ ८७॥ तन्नंदनोदेशि
कदेशिकोभूच्छ्रीकृष्णइत्यभ्युदितप्रभावः॥ यस्मादकारुण्यसुधाभिषेकाल्लक्ष्मींपरामश्नुवतेकृतार्थाः॥ ८८॥ आचार्यवि
द्याविभवस्यतस्यजातःप्रभोर्लक्ष्मणदेशिकेन्द्रः॥ विद्यास्वशेषासुकलासुसर्वास्वपिप्रथांयोमहतींप्रपेदे ८९ आरायसा
रमखिलंनिखिलागमेभ्यःश्रीशारदातिलकनामचकारतंत्रं॥ प्रीतःसएवपटलैरिहतत्वसंख्यैःप्रीतिप्रदानविधयेविदुषां
चिराय ९० अनाद्यंतात्शंभोर्वपुषिकलितार्द्धेनवपुषाजगद्रूपंशश्वत्सृजतिमहनीयामपिगिरं॥ सदर्थाशब्दार्थस्तनभर
नताशंकरवधूर्भवद्भूत्यैभूयाद्भवजनितदुःखौघशमनी॥ ९१॥ इतिश्रीशारदातिलकेपंचविंशःपटलः॥ २५॥ समाप्तः॥

लतंचार्थमुपसंहरन्नाशिषांगंमंगलंकरोति॥ अनाद्यंतेति॥ इतिश्रीमहामहोपाध्यायपीरामसंप्रदायप्रवर्तकश्रीमन्माधवभट्टविरचितायांशारदाटीकायां
गूढार्थदीपिकायांपंचविंशःपटलः २५ समाप्तोयंग्रंथः॥ सम्वत् १९४१ शाके १८०६ मीतीमार्गशीर्षशुक्ल २ वारबुधवार॥ भगवत्यैनमः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शारदा

॥श्री काशी विश्वनाथपुरी मे महल्ला भदयइनी दिवाकर छापाखाने मे शारदा तिलक गूढार्थदीपि
का सहित छापा गया शिवचरन के इहां लिखा महीपनारायण पांडे छापनेवाले माता दयाल शोधा पंडि
त वटुकनाथ जिसै लेना होय उसे चाननी चौक मे कुंजगली के पास शिवचरन के दुकान पर मिलेगा ॥

सम्वत् १९४१ मीती पौष वदी ७ वार मंगल

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

B.B.N.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry